पाठ्यक्रमविकासकेन्द्रम्

# इतिहासपुराणम्

कक्षा १०



# इतिहासपुराणम्

कक्षा १०

नेपालसर्वकारः
शिक्षाखेलकुदमन्त्रालयः
**पाठ्यक्रमविकासकेन्द्रम्**
सानोठिमी–भक्तपुरम्

प्रकाशकः

**नेपालसर्वकारः**

**शिक्षाखेलकुदमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०८३

अस्य पाठ्यपुस्तकस्य विषये रचनात्मकपरामर्शदानार्थमन्तर्जालपुटसङ्केतः
coordination@moecdc.gov.np

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति। विद्यार्थिषु राष्ट्रं राष्ट्रियतां च प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽप्यत्वे आवश्यको दृश्यते। अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते। शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति। शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम्। एवं व्यक्तेर्नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षाया आवश्यकता समाजेऽवलोक्यते। तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः। एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते। इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य 'इतिहासपुराणम्' इति विषयकपाठ्यक्रमस्याधारेण दशम्याः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते।

इदं पुस्तकं प्रा.डा. ध्रुवप्रसादः भट्टराई, प्रा. नवराजः घिमिरे, डा. नेत्रविनोदः भट्टराई, श्री गणेशः तिमिल्सिना, पुरुषोत्तमः घिमिरे-प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति। अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां शिल्पानामनुसरणं कृतमस्ति। अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः युवराजः पौडेल, प्रा.डा. माधवशरण उपाध्यायः, प्रा.डा. आनन्दप्रसादः घिमिरे, प्रा.डा. ऋषिरामः पौडेल, निश्चलः अधिकारी, शिवराजः लामिछाने, केशवः भट्टराई, राजुः श्रेष्ठ, विनोदराजः भट्ट-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते। अस्य चित्राङ्कनं कुलदीपजङ्गबहादुर गुरुङ- इत्याख्येन महानुभावेन रूपसज्जा च भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राश्च पाठ्यक्रमेण लक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावादध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः
**शिक्षाखेलकुदमन्त्रालयः**
पाठ्यक्रमविकासकेन्द्रम्

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| प्रथमः पाठः | इतिहासस्वरूपम् | १ |
| द्वितीयः पाठः | पुराणवाङ्मयम् | ८ |
| तृतीयः पाठः | पौराणिकं वाङ्मयम् | १६ |
| चतुर्थः पाठः | पुराणं दशलक्षणम् | २४ |
| पञ्चमः पाठः | भक्तितत्त्वम् | ३२ |
| षष्ठः पाठः | गुरुभक्तिः | ४० |
| सप्तमः पाठः | एकलव्यस्य साधना | ४७ |
| अष्टमः पाठः | पितृभक्तिः | ५६ |
| नवमः पाठः | पितृभक्तः श्रवणकुमारः | ६३ |
| दशमः पाठः | विदुरोपदेशः | ७० |
| एकादशः पाठः | पौराणिका व्यासाः | ७६ |
| द्वादशः पाठः | वेदव्यासः | ८६ |
| त्रयोदशः पाठः | वेदव्यासस्यावदानम् | ९३ |
| चतुर्दशः पाठः | मानदेवांशुवर्मणोः सुराज्यम् | १०१ |
| पञ्चदशः पाठः | चाँगुनारायणाभिलेखः | १०७ |
| षोडशः पाठः | मल्लशासकाः | ११४ |

प्रथमः पाठः

# इतिहासस्वरूपम्

इतिहासः खलु मानवसभ्यतायाः स्मृतिसञ्चयो भवति । अयं मानवपरम्पराया दर्पणो मन्यते । भूतकाले घटितानां घटनानां यथार्थविवरणम्, तादृशीनां घटनानां कार्यकारणसम्बन्धस्य वस्तुगतं विश्लेषणञ्चेतिहासस्य वास्तविकं स्वरूपं भवति । इतिहासशब्दे इतिह इति समुदितमव्ययपदमुपदेशपरम्परार्थकम्, आस्तेऽस्मिन् इति विग्रहे उपवेशनार्थकाद् आस्धातोः आधारार्थे घञ्प्रत्ययेन निष्पन्न आसशब्दोऽत्र वर्तते । इतिह पारम्पर्योपदेश आस्तेऽस्मिन् ग्रन्थे इति विग्रहे इतिह+आस इत्यनयोः समासेन इतिहासशब्दो निष्पद्यते । इतिहासशब्दस्यार्थश्च पूर्ववृत्तान्तः पुरावृत्तः प्राचीनकथा इत्यादिरूपेण कर्तुं शक्यते । धर्मार्थकाममोक्षाणामुपदेशसमन्वितः पूर्ववृत्तकथायुक्त इतिहासो भवति । इतिहासस्य धर्मादिसाधकत्वाद् बहूपयोगित्वाच्च कालयापनक्रमे दिवसस्य षष्ठो भागः सप्तमो भागश्च इतिहासपुराणकथादिना यापयेदिति धर्मशास्त्रस्य निर्देशो विद्यते ।



वयांसि ब्रह्मचारिण इति उपनीताः स्युस्तान् उपदिशति इतिहासो वेदः सोऽयमिति इतिहासमाचक्षीत इत्यत्र इतिहासो वेदाद् बाह्यग्रन्थो न अपि तु वेदस्यैवाङ्गभूतो विभागविशेष एव स्वीकृतो वर्तते । अत एव इतिहासो वेद इति प्रत्यक्षतया इतिहासस्य वेदात्मकत्वं स्वीकृतं विद्यते । वयांसि ब्रह्मचारिण इत्यनेन बाल्यकाले ब्रह्मचर्यावस्थायामेव वा इतिहासोऽध्यापनीय इति चावगम्यते । इतिहासः कथाया माध्यमेन धर्मार्थं बोधयति, स च बाल्यकालो बालकानां बुद्ध्यनुकूलो भवति । इतिहासः कथोपदेशमाध्यमेन धर्मोपदेशं करोति । अत एव गुरुः शिष्यान् सोऽयमिति वर्तमानोपयोगिनं धर्मं प्राचीनकथाभिः स्पष्टयति । इतिहासो वेदार्थं बोधयितुं कथारूपेण प्रस्तुतः पूर्ववृत्तानां पूर्वजानां घटनोपघटनानां च यथार्थवर्णनपरकधर्मबोधनाय प्रवृत्तो ग्रन्थविशेष इति ज्ञायते । एष इतिहासो वेदस्यार्थबोधस्य साधनं विद्यते । ऋग्यजुःसामाथर्वाख्याश्चत्वारो वेदा वर्तन्ते । इतिहासः पञ्चमो वेद इति पुराणेषु प्रोक्तमस्ति । लोकानुग्रहात्मकरूपत्वाद् इतिहासो वेदार्थस्य संरक्षणं करोति, बोधं सरलं करोति, धर्मस्य व्यवहारात्मकमादर्शं च दर्शयति । शिष्टा वेदस्य व्याख्यारूपेण च इतिहासं स्वीकुर्वन्ति ।

इतिहासस्य स्वरूपं प्रमाणसमन्वितं कार्यकारणसम्बन्धनिष्ठं तथ्याधृतञ्च भवति । इतिहासे केवलं कवेः कल्पनामात्रं न भवति । तत्र पुरातनाभिलेख-शिलालेख-ताम्रपत्र-क्रोडपत्र-परम्परागतप्रमाणानां समन्वयेन सत्यान्वेषणं क्रियते । इतिहासस्य स्वरूपं महत्त्वाधायकं भवति । संस्कृतवाङ्मये 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति वचनं प्रसिद्धं वर्तते ।

संस्कृतवाङ्मये आदिकवेर्वाल्मीके रामायणम्, कृष्णद्वैपायनस्य महाभारतञ्चेति ग्रन्थद्वयं इतिहासरूपेण स्वीक्रियते । एतयोर्ग्रन्थयो राजवंशानां युद्धादिवर्णनपुरस्सरं विजयगाथया सह धर्मस्य कर्तव्यस्य मूल्यानां च सूक्ष्मोपदेशोऽन्तर्निहितो विद्यते । इतिहासस्योद्देश्यं भूतकालस्य स्मरणेन वर्तमानस्य संरक्षणेन च भविष्यस्य मार्गनिदर्शनं भवति । अतीते विहितानां कार्याणां निर्णयादीनां च परिणाममवलोक्य स्वकीयव्यवहारे मानवो विवेकं प्रयोक्तुं शक्नोति । इतिहासो मानवस्य बौद्धिकसांस्कृतिकविकासस्य आधारस्तम्भो निगद्यते । इतिहासस्य सम्यगध्ययनं चिन्तनं मननमनुसरणं समाजस्योन्नतये आवश्यकं मन्यते ।

इतिहासाध्ययनेन मानवजीवनेऽनेके लाभाः समुपलभ्यन्ते । भूतकालस्यावबोधो जायते । तेन तत्तत्समाजस्य राष्ट्रस्य संस्कृते रीतेः परम्परायाश्च पूर्ववृत्तमवगन्तुं पार्यते । इतिहासाध्ययनेन पूर्वजानां सफलता विफलता वा ज्ञायते । एतस्यैव माध्यमेन पूर्वजैरनुसन्धितानां ज्ञानानां प्राप्तिर्भवति, वर्तमानस्थितेर्मूलकारणानामन्वेषणे साहाय्यं च लभ्यते । अतीतानुभवेन भविष्यनिर्माणायासः कर्तुं शक्यते । राष्ट्रस्यैतिह्यं ज्ञात्वा राष्ट्रगौरवबोधः सञ्जायते । देशप्रेम राष्ट्रभक्तिर्वा समुदेति; विवेको वर्धते । कर्तव्याकर्तव्ययोर्धर्माधर्मयोश्चावबोधो भवति ।

पारम्परिकरीतेः पारम्परिकमूल्यानां सदाचाराणाञ्च संरक्षणमैतिह्यज्ञानेन भवति । तेन एव स्वकीयसंस्कृतेः सुरक्षा भविष्यति । इतिहासस्य सम्यग्ज्ञानेन तर्कयुक्तचिन्तनस्य विश्लेषणकौशलस्य चाभिवृद्धिर्मानवमनसि

सञ्जायते, तेन समालोचनात्मकशक्तेर्विकासश्च भवति । यतो हि इतिहासो वर्तमानस्य बोधाय भविष्यस्य मार्गनिर्देशाय च सहायको भवति ।




इतिहासस्य ज्ञानाभावे वर्तमानभविष्यत्कालयोः परिस्थितिमनुमातुं न शक्यते । इतिहासाध्ययनेन पूर्वजानां वृत्तं ज्ञायते । पूर्वजानां वृत्तज्ञानात् शिक्षाप्राप्तिर्भवति । येन विगतं न ज्ञातं तेन पूर्वजा अपि न ज्ञाताः । येन पूर्वजा न ज्ञातास्तेन स्वकीयमस्तित्वमपि नैव ज्ञातम् । स्वकीयास्तित्वस्याज्ञानेन स्वकर्तव्यं नैव निश्चीयते । तथा सति वर्तमानमपि नश्यति । प्रत्येकं समाजस्य राष्ट्रस्य च स्वकीयपरिचयो भवत्येव । तस्याज्ञानेन स्वमूलपरम्पराया बोधो न भवति । अत इतिहासाज्ञानेन आत्मपरिचयो न जायते । भूतकालिकानां समुचितानुचितानां कार्याकार्याणाञ्चानुभवानां सङ्ग्रह इतिहासः, तस्याज्ञानेन पूर्वकृतदोषाणां पुनरावृत्तिर्जायते । तथैव ऐतिह्यज्ञानेन विना मानवेऽनुभवहीनता सम्पत्स्यते । नीत्यनीत्योः, धर्माधर्मयोः, कर्तव्याकर्तव्ययोश्च विवेचनमितिहासात् समुपलभ्यते । तस्य ज्ञानाभावाद् नीतिविवेको धर्मविवेकः कर्तव्यविवेकश्च मानवजीवनतोऽपक्षीयते । एतेन मानवो नीतिहीनो जायते । राष्ट्रनिर्माणसन्दर्भे वस्तुजातं यथार्थपरकमितिहासज्ञानं सर्वथाऽपरिहार्यं भवति । पूर्वजानां त्यागतपोबलिदानरूपमवदानं च तत एव ज्ञायते । तत्र तेषां ज्ञानाभावे मानवो देशप्रेम्णः कर्तव्यबोधाच्च परिहीयते; राष्ट्रियभावना दुर्बलतां याति ।

संस्कृतिः परम्परा सभ्यता च इतिहासज्ञानेनैव सुरक्षिताः सम्भवन्ति। तस्य ज्ञानाभावेन संस्कृतिर्विलुप्ता परम्परा विच्छिन्ना सभ्यता च समाप्ता भवति। क्रमशः मानवः संस्कृतिपरम्परासभ्यताभ्यो विच्छिन्नो जायते। भविष्यनिर्माणसन्दर्भे इतिहासबोधेनैव कर्तव्यदिक् परिलक्ष्यते। इतिहासज्ञानं विना भविष्ये दृष्टिहीनता सम्पत्स्यते। एवमेव विकृतिविसङ्गत्यसच्चिन्तनानि समाजे प्रसृतानि भवन्ति; मिथ्याविश्वासस्य प्रसारश्च सञ्जायते। अतो मानवजीवनस्य दर्पणरूप इतिहासो नैतिक-धार्मिक-राष्ट्रिय-सामाजिकजीवने महत्त्वपूर्णो वर्तते।

रामचरितस्य वर्णनेन आदिकाव्यं रामायणं कौरवपाण्डवयुद्धादियथार्थवृत्तान्तवर्णनेन महाभारतञ्च उभावपि ग्रन्थौ इतिहासत्वं प्राप्नुतः। इतिहासेषु वेदे प्रतिपादितो धर्म एव जीवनेऽवतरति। वस्तुतस्तु इतिहासा ब्रह्मविद्यायाः प्रचारकाः। एते एव उपास्यबोधका उपनिषदर्थसारा वेदतुल्या वेदार्थस्य जीवितव्याख्यारूपा धर्मस्य व्यावहारिकपक्षनिदर्शकाश्च वर्तन्ते।

इतिहासेषु पुराणेषु च देवगन्धर्वयक्षपन्नगादीनां वर्णनमुपलभ्यते। सद्वृत्तास्ते स्वकर्तव्यात् पराङ्मुखाः स्वकर्तव्यविहीना वा नैव कुत्राप्युपलभ्यन्ते। पुराणकथां मिथकरूपेण मन्यमाना नास्तिका अपि स्वकर्तव्यं कदापि नैव त्यक्तव्यमिति इतिहासाध्ययनेनैव विश्वसन्ति। कर्मणि विश्वासः, भगवति भक्तिः, मानवजन्मनः साफल्यञ्च ततोऽधिगम्यते। एतेषु विषयेषु निरन्तरध्यानाकर्षणाय पुराणेतिहासानां श्रवणं श्रावणमध्ययनमध्यापनञ्चास्माकं समाजे क्रियते।

### शब्दार्थाः

| | | |
|---|---|---|
| क्रोडपत्रम् | = | कर्गदस्य पार्श्ववर्ती लेखः |
| समुपबृंहयेत् | = | व्याख्यां कुर्यात् |
| उपजीवी | = | पराश्रयी |
| अभिव्यनक्ति | = | प्रकटयति |
| ऐतिह्यम् | = | इतिहासः |
| परिहीयते | = | अपक्षीयते |
| सेत्स्यति | = | सम्पत्स्यते |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) इतिहासस्य वास्तविकं स्वरूपं किम् ?

(ख) इतिहासशब्दस्य व्युत्पत्तिः का ?

(ग) दिवसस्य षष्ठः सप्तमश्च भागः कथं यापनीयः ?

(घ) इतिहासपदेन कौ ग्रन्थौ ज्ञेयौ ?

(ङ) वेदस्यार्थः कथं ज्ञायते ?

(च) इतिहासः कस्मिन् वयसि पठनीयः ?

(छ) रामायणस्य रचयिता कः ?

(झ) महाभारतमस्मान् किं शिक्षयति ?

(ञ) कः स्वकर्तव्यं कदापि न त्यक्तव्यमिति शिक्षयति ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) इतिहासज्ञानेन के लाभा जायन्ते ?

(ख) इतिहासाज्ञानेन कीदृश्यो हानयो भवन्ति ?

(ग) इतिहासस्य मूलोद्देश्यं किम् ?

(घ) समाजे पुराणश्रवणं किमर्थं क्रियते ?

(ङ) तात्पर्यं प्रकाशयत

वयांसि ब्रह्मचारिण इति उपनीताः स्युस्तान् उपदिशति इतिहासो वेदः सोऽयमिति इतिहासमाचक्षीत ।

### ३. समाजे दुष्प्रचारः कथं जायते ? सोदाहरणं लिखत ।

### ४. इतिहासपुराणादीनां श्रवणं श्रावणं वा कदा सार्थकतां लभते ? निरूपयत ।

### ५. इतिहासपुराणानां नैतिक-धार्मिक-सांस्कृतिकमहत्त्वं वर्णयत ।

६. **इतिहासस्वरूपाध्ययनेन का शिक्षा अधिगता ? विस्तरेण लिखत ।**

७. **अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

अस्माकं पौरस्त्यसांस्कृतिकपरम्परायां महाभारतं केवलं महाकाव्यरूपेण नैव गृह्यते अपि तु इतिहासरूपेण स्वीक्रियते । तत्र केचनार्वाचीनाः प्रश्नमुद्भावयन्ति यद्- महाभारतस्य ऐतिहासिकाधारः कः ? ऐतिहासिकाधाराभावे इदं केवलं काव्यकल्पनमेव सेत्स्यतीति । प्रश्नस्यैतस्य समाधानायास्य परम्परागतैरन्तःसाक्ष्यैः पुरातात्त्विकप्रमाणैश्च ऐतिहासिकत्वं परीक्षितुं शक्यते ।

महाभारतं स्वयमेवात्मानमितिहासं निर्दिशति । तत्रादिपर्वणि अनुशासनपर्वणि च ग्रन्थस्यास्येतिहासत्वं प्रतिपाद्यते । पौरस्त्यमान्यतायां रामायणमहाभारते इतिहासत्वेन स्वीकृते स्तः । महाभारतस्य रचयिता व्यासः, वैशम्पायनमुनिर्वक्ता कदाचिच्छ्रोता च, जनमेजयश्च श्रोता वर्तन्ते । एतादृशी गुरुशिष्यपरम्परा ऐतिहासिकस्मृतिपरम्परां स्मारयति । विष्णुवायुमत्स्यादिपुराणेषु राजवंशानां कालक्रमो महाभारत इव समुपलभ्यते । राजवंशानामयं कालक्रमो महाभारतस्येतिहासाधारं प्रदर्शयति । केवलं कविकल्पनायां निराधाररूपरूपितायामित्थं सङ्गतिर्भवितुं नार्हति । तत्र महाभारते कुरुप्रभृतिवंशानां सुविस्तृतं वर्णनं समुपलभ्यते ।

भारतीयाधुनिकपुरातत्त्वविद्भिरुत्खननक्रमे हस्तिनापुरेन्द्रप्रस्थ-द्वारकादिस्थानेषु नेपालदेशस्य तिलौराकोटनाम्नि स्थाने च मृद्भाण्डावशेषाः समुपलब्धाः । ते महाभारतकालिका विद्वद्भिः स्वीकृताः । महाभारते वर्णितो नगरविनाशो महाप्रलयसदृशेन जलविनाशचिह्नेन साम्यं भजते । अतिशयोक्त्यल्पता मनोवैज्ञानिकी सूक्ष्मता च महाभारतग्रन्थस्यैतिहासिकत्वं स्मृतिमूलकत्वञ्च प्रमाणयतः । अत्र वर्णिता राज्यशासनव्यवस्था, सभायाः स्थितिः, नारीणां स्थितिः, राजधर्मः, द्यूतव्यसनम्, भ्रातृसङ्घर्षो नैतिकसङ्कटश्च मानवजीवनस्य गभीरालोकं प्रकाशयति । अत्र काव्यविस्तारस्तु पदे पदेऽवलोक्यत एव । एवं सत्यपि अस्यैतिहासिकत्वे न कुत्रापि क्षतिरस्ति । अतो महाभारतमैतिहासिकघटनामाधृत्य विरचितमिति सिद्ध्यति ।

**प्रश्नाः**

(क) महाभारतस्यैतिहासिकत्वं कथं परीक्षितुं शक्यते ?

(ख) किं काव्यं स्वयमेवात्मानमितिहासं निर्दिशति ?

(ग) महाभारतस्यैतिहासिकत्वप्रसङ्गे एकं तर्कं प्रस्तुत ।

(घ) महाभारतस्य रचनाकारः क ?

(ङ) महाभारतस्य वक्ता कः ?

(च) महाभारते कस्य वंशस्य वर्णनं सुविपुलरूपेण विद्यते ?

(छ) पुरातत्त्वविद्भिः कीदृशा अवशेषाः प्राप्ताः ?

(ज) महाभारते मानवजीवनस्य गभीरालोकः कैर्विलोक्यते ?

**८. अधस्तनं वाक्यं व्याख्यात**

राज्यशासनव्यवस्था, सभायाः स्थितिः, नारीणां स्थितिः, राजधर्मः, द्यूतव्यसनम्, भ्रातृसङ्घर्षो नैतिकसङ्कटश्च मानवजीवनस्य गभीरालोकं प्रकाशयति ।

**९. कुत्रचित् समाजे समायोजितां पुराणकथां श्रुत्वा का शिक्षा अधिगता ? कक्षायां श्रावयत ।**

**१०. अभिभावकं कञ्चन विज्ञजनं वा सम्पृच्छ्य 'महाभारतम्' इति नामकरणस्य कारणानि लिखत ।**

## *परियोजनाकार्यम्*


**महाभारतस्यादिपर्वणोऽधो निर्दिष्टं विवरणं निर्माय कक्षायां प्रस्तुत**

| अध्याय-सङ्ख्या | दीर्घतमोऽध्यायः श्लोकसङ्ख्या च | लघुतमोऽध्यायः श्लोकसङ्ख्या च | सम्पूर्णपद्य-सङ्ख्या | स्थानसङ्केतसहितं कयोश्चिदद्वयोः छन्दसोरेकैकं पद्यम् | आदिपर्वणोऽन्तिमपद्यं तस्यार्थश्च |
|---|---|---|---|---|---|
| | | | | | |

द्वितीयः पाठः

# पुराणवाङ्मयम्

संस्कृतवाङ्मये पुराणसाहित्यस्य विशिष्टं स्थानं वर्तते । धार्मिकपरम्परायां वेदानन्तरं पुराणानामेव मान्यता दृश्यते । पौराणिकज्ञानस्याभावे वैदिकसाहित्यस्यार्थावबोधः सर्वथाऽसम्भवो विद्यते । वेदा न केनापि पुरुषेण प्रणीताः सन्ति, अतस्तेऽपौरुषेयाः प्रोच्यन्ते । वेदेषु ये विषयाः सूक्ष्मरूपेण प्रतिपादिताः सन्ति ते एव पुराणेतिहासेषु विस्तृतरूपेण प्रपञ्चिताः सन्ति । ये च पुराणादीनामध्ययनं विना वेदानामर्थमवगन्तुं चेष्टन्ते तेषां वास्तविकं वेदार्थज्ञानमसम्भवं प्रतिभाति । व्यासवाल्मीकिप्रभृतयो महर्षयोऽलौकिकं तपः कृत्वा परमात्मनोऽनुकम्पया वेदानां रहस्यं ज्ञातवन्तः । ततस्तत्प्रचारस्यावश्यकतामनभूतवतां जनानां कृते वेदानां निगूढमर्थं सम्यगवगन्तुं सरसायां सुबोधायां सरलायां सुरुचिपूर्णायाञ्च संस्कृतभाषायां रामायणं महाभारतं पुराणानि च व्यरचयन् । आदिदेवो नारायणो हि द्वापरे पराशरात् सत्यवत्यां व्यासरूपेणावतीर्य पुराणानि रचयामास । सर्वविषयपरिपूर्णानामष्टादशानां महापुराणानां परिचयप्रसङ्गे महर्षिणा व्यासेन विष्णुपुराणे पुराणानां नामक्रमश्चैवंविधः प्रोक्तोऽस्ति -



| | | |
|---|---|---|
| १. ब्रह्मपुराणम् | २. पद्मपुराणम् | ३. विष्णुपुराणम् |
| ४. शिवपुराणम् | ५. भागवतपुराणम् | ६. नारदीयपुराणम् |
| ७. मार्कण्डेयपुराणम् | ८. अग्निपुराणम् | ९. भविष्यपुराणम् |
| १०. ब्रह्मवैवर्तपुराणम् | ११. लिङ्गपुराणम् | १२. वाराहपुराणम् |
| १३. स्कन्दपुराणम् | १४. वामनपुराणम् | १५. कूर्मपुराणम् |
| १६. मत्स्यपुराणम् | १७. गरुडपुराणम् | १८. ब्रह्माण्डपुराणम् |

नारदीयपुराणे त्वेवंक्रमो निर्दिष्टोऽस्ति -

**ब्राह्मं पाद्मं वैष्णवं च वायवीयं तथैव च ।**
**भागवतं नारदीयं मार्कण्डेयञ्च कीर्तितम् ॥**
**आग्नेयं च भविष्यं च ब्रह्मवैवर्तलिङ्गके ।**
**वाराहं च तथा स्कान्दं वामनं कूर्मसंज्ञकम् ॥**
**मात्स्यं च गारुडं तद्वद् ब्रह्माण्डाख्यमिति त्रिषट् ॥**

तथैव श्रीमद्भागवते अष्टादशपुराणानां क्रम एतादृशो वर्तते -

**ब्राह्मं पाद्मं वैष्णवं च शैवं लिङ्गं सगारुडम् ।**
**नारदीयं भागवतमाग्नेयं स्कन्दसंज्ञितम् ॥**
**भविष्यं ब्रह्मवैवर्तं मार्कण्डेयं सवामनम् ।**
**वाराहं मात्स्यकौर्मं च ब्रह्माण्डाख्यमिति त्रिषट् ॥**

केवलमाद्याक्षरसमानताधारेण पुराणानां गणनाक्रमो देवीभागवते विहितोऽस्ति । तद्यथा -

**म-द्वयं भ-द्वयं चैव ब्र-त्रयं व-चतुष्टयम् ।**
**अ-ना-प-लिं-ग-कू-स्कानि पुराणानि प्रचक्षते ॥**

आदौ म-अक्षरेण पुराणद्वयम् - मत्स्यपुराणम्, मार्कण्डेयपुराणम् ।

आदौ भ-अक्षरेण पुराणद्वयम् - भागवतपुराणम्, भविष्यपुराणम् ।

आदौ ब्र-अक्षरेण पुराणत्रयम् - ब्रह्मपुराणम्, ब्रह्मवैवर्तपुराणम्, ब्रह्माण्डपुराणम् ।

आदौ व-अक्षरेण पुराणचतुष्टयम् - वायुपुराणम्, वामनपुराणम्, वाराहपुराणम्, विष्णुपुराणम् ।

आदौ अ-अक्षरेण एकम् - अग्निपुराणम् ।

आदौ ना-अक्षरेण एकम् - नारदीयपुराणम् ।

आदौ प-अक्षरेण एकम् - पद्मपुराणम् ।

आदौ लिं-अक्षरेण एकम् - लिङ्गपुराणम् ।

आदौ ग-अक्षरेण एकम् - गरुडपुराणम् ।

आदौ कू-अक्षरेण एकम् - कूर्मपुराणम् ।

आदौ स्क-अक्षरेण एकम् - स्कन्दपुराणम् ।

एवं प्रकारेण पद्मपुराणस्य पातालखण्डे, शिवपुराणस्योमासंहितायाम्, वायुपुराणे, मार्कण्डेयपुराणे, अग्निपुराणे, ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे, लिङ्गपुराणे, स्कन्दपुराणस्य प्रभासखण्डे, कूर्मपुराणस्य पूर्वार्द्धे, मत्स्यपुराणे, गरुडपुराणे च सङ्क्षेपतो विस्तरतश्चाष्टादशानां महापुराणानां नामक्रमौ निर्दिष्टौ स्तः ।



यद्यपि तत्तत्पुराणेषु पुराणानां गणनाक्रमस्थितौ परस्परं मतभेदो दृश्यते तथापि तेषामष्टादशत्वे केषामपि विमतिर्नास्ति। संस्कृतवाङ्मयेऽष्टादशसङ्ख्या महत्त्वपूर्णा वर्तते। अतो व्यासेन स्वकीयानां कृतीनां सम्बन्धोऽष्टादशसङ्ख्यया सह योजितो दृश्यते। यथा अष्टादश पुराणानि, अष्टादश उपपुराणानि, अष्टादश औपपुराणानि, अष्टादश स्मृतयः, महाभारतस्य मुख्यानि पर्वाणि गीतायाश्चाध्याया अष्टादश सन्ति।

वैदिकप्रक्रियानुसारेण प्रत्येकं ब्रह्माण्डं त्रिषु भागेषु विभक्तम् - पृथिवी, अन्तरिक्षम्, द्यौश्च। पुराणानि एषामेव त्रयाणां लोकानां सृष्टिप्रलयादीनां च निरूपणं कुर्वन्ति। निरुक्तानुसारेण त्रिलोक्याः समस्तपदार्थानां षट् षट् परिणामा भवन्ति- अस्ति, जायते, वर्द्धते, विपरिणमते, अपक्षीयते, विनश्यति चेति। एषां षण्णां भावविकाराणामभिव्यक्तये पुराणान्यष्टादश सन्ति।

वस्तुतः सङ्ख्या नव एव सन्ति परन्तु तन्त्रशास्त्रे नवशक्त्यात्मक-नवशिवात्मकभेदात् शिवशक्त्यात्मकयोगेन सङ्ख्या अष्टादश विद्यन्ते। अत एषां निर्देशकानां पुराणानां सङ्ख्या अष्टादश सन्ति। विशिष्टयज्ञेषु अष्टादश एव ऋत्विजो निर्धार्यन्ते। महाभारते अष्टादश अक्षौहिणी सेनाऽऽसीत्। युद्धमपि अष्टादश दिनानि यावत् प्रचलितम्। पाण्डवपक्षीया महारथिनोऽपि गीतायाः प्रथमाध्याये अष्टादश एव गणिताः सन्ति। सप्तदशभिस्तत्त्वैर्निर्मिते सूक्ष्मशरीरेऽहम्भावो न तिष्ठति। अतस्तस्य गणना तत्र न जायते। यद्यहङ्कारस्य चिदाभासस्य गणना तत्र स्यात्तर्हि अष्टादश तत्त्वानि भवन्ति। एभिरेव अष्टादशभिस्तत्त्वैः पापं सम्भवति अतस्तन्निवृत्तये सदुपदेशप्रदायकानि पुराणानि अष्टादश अभिमतानि सन्ति। एवं पुराणानामष्टादशसङ्ख्याविषये विभिन्नानां विपश्चितां मतवैविध्यं दृश्यते।

### शब्दार्थाः

| | | |
|---|---|---|
| प्रतिभाति | = | मन्यते |
| निगूढम् | = | गुप्तम् |
| लीयते | = | अन्तर्भवति |
| आयतानि | = | विस्तृतानि |
| विपरिणमते | = | परिवर्तते |
| अक्षौहिणी | = | सैन्यगणनाविधिः (२१८७०० संख्यानां सैन्यसमूहः) |

## अभ्यासः

### १. अतिसङ्क्षिप्तोत्तराणि लिखत

(क) वेदेषु प्रतिपादिता विषयाः कुत्र प्रपञ्चिताः ?

(ख) पुराणानां रचयिता कः ?

(ग) नारायणः कस्मिन् युगे कृष्णद्वैपायनरूपेणावतीर्णवान् ?

(घ) पञ्चमस्थाने किं पुराणमायाति ?

(ङ) महापुराणानि कति सन्ति ?

(च) व-अक्षरेण कति पुराणानि सन्ति ?

(छ) पुराणानां कति सङ्ख्याविषये मतभेदो नास्ति ?

(ज) विशिष्टयज्ञेषु कति ऋत्विजो निर्धार्यन्ते ?

(झ) महाभारते मुख्यानि पर्वाणि कति सन्ति ?

(ञ) वैदिकप्रक्रियानुसारेण प्रत्येकं ब्रह्माण्डं कति भागेषु विभक्तम् ?

(ट) कू-अक्षरेण किं पुराणं प्रचलितम् ?

(ठ) पुराणानामध्ययनं विना किमवगन्तुं न शक्यते ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) अष्टादशमहापुराणानां नामानि लिखत ।

(ख) नारदीयपुराणे प्रोक्तमष्टादशमहापुराणानां क्रमं लिखत ।

(ग) केषु महापुराणेषु महापुराणानां नामानि वर्णितानि सन्ति ?

(घ) संस्कृतवाङ्मये पुराणसाहित्यस्य स्थानं कीदृशम् ?

(ङ) पाठमाधृत्य अष्टादशसङ्ख्याया महत्त्वं लिखत ।

### ५. अधो निर्दिष्टमनुच्छेदं पठित्वा प्रश्नानुत्तरयत

पुराणेषु सर्वाभीष्टफलप्रदायकानां देवानां देवीनां च लीलामय्यो गाथा गीताः सन्ति । अत्र तपःपूतान्तःकरणानामृषीणां मुनीनाञ्चाख्यानोपाख्यानानि प्रोक्तानि । तत्र प्रख्यातकीर्तीनां

प्रजापालकानां धार्मिकाणामुदारात्मनां पुण्यश्लोकानां नृपतीनां समुज्ज्वलानि जीवनचरितानि वर्णितानि सन्ति। एवं तत्र इतिहासः काव्यं कला राजनीतिरध्यात्मज्ञानं व्यवहारज्ञानं सर्वविधा विद्याश्च वर्णिता वर्तन्ते। पुराणेभ्यः सर्वे जना यथाधिकारं लाभान्विता भवन्ति। पुराणेषु तत्त्वज्ञानं वर्णितं वर्तते। तत्र प्रसादगुणः सर्वत्र परिपूर्णो विद्यते। पुराणानां सर्वाधिकं वैलक्षण्यं भक्तिरसास्वादनमेव विद्यते। विद्वांसो वेदानां रहस्यं पुराणानां गूढविज्ञानं चावगत्य कृतकृत्या भवन्ति। पुराणानि वेदस्य भाष्यरूपाणि मन्यन्ते। पुराणानि सनातनसंस्कृतेर्हृदयं मन्यते। वेदवदादरणीयस्य, भगवत्प्राप्त्युपायप्रदर्शकस्य, भगवत आज्ञास्वरूपस्य च पुराणसमूहस्य अध्ययनानुशीलनादिकमवश्यं सर्वैः कर्तव्यमेव।

उपपुराणानामौपपुराणानाञ्च रचना महापुराणानामाधारेण जाताऽस्ति। उपपुराणेषु औपपुराणेषु च क्वचन महापुराणानां कथाः सूक्ष्मीकृताः सन्ति, कुत्रचित् परित्यक्ता विद्यन्ते, कुत्रचिच्च चमत्कारानयनाय विलक्षणानां कथानां समावेशः कृतोऽस्ति। मानवजीवने तेषामपि अध्ययनमावश्यकं मन्यते।

**प्रश्नाः**

(क) अनुच्छेदस्य सारांशं लिखत।

(ख) पुराणेषु कीदृशानां नृपतीनां चरितं वर्णितम्?

(ग) विद्वांसः किमवगत्य कृतकृत्या भवन्ति?

(घ) के पुराणेभ्यो यथाधिकारं लाभान्विता भवन्ति?

(ङ) अनुच्छेदमाधृत्य चतुरः प्रश्नान् निर्मात।

**६. पुराणविषये लघ्वनुच्छेदं रचयत।**

**७. शिक्षकस्य अभिभावकस्य अन्तर्जालस्य वा साहाय्येन अक्षौहिण्याः प्रमाणमुपस्थापयत।**

**८. अधो निर्दिष्टमनुच्छेदं पठित्वा प्रश्नानामुत्तरं लिखत**

उपपुराणानां स्रोतांसि महापुराणानि एव। उपपुराणानि अष्टादशैव सन्ति। तन्नामानि यथा-

| | | |
|---|---|---|
| १. आदिपुराणम् | २. नरसिंहपुराणम् | ३. स्कन्दपुराणम् |
| ४. शिवधर्मपुराणम् | ५. दुर्वासःपुराणम् | ६. नारदीयपुराणम् |
| ७. कपिलपुराणम् | ८. वामनपुराणम् | ९. औशनसपुराणम् |

१०. ब्रह्माण्डपुराणम् ११. वरुणपुराणम् १२. कालिकापुराणम्

१३. माहेश्वरपुराणम् १४. साम्बपुराणम् १५. सौरपुराणम्

१६. पाराशरपुराणम् १७. मारीचपुराणम् १८. भास्करपुराणम्

उक्तञ्च कूर्मपुराणे-

**आद्यं सनत्कुमारोक्तं नारसिंहमथापरम् ।**
**तृतीयं स्कान्दमुद्दिष्टं कुमारेण च भाषितम् ॥**
**चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।**
**दुर्वाससोक्तमाश्चर्यं नारदीयमतः परम् ॥**
**कपिलं वामनं चैव तथैवोशनसेरितम् ।**
**ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च ॥**
**माहेश्वरं तथा साम्बं सौरं सर्वार्थसञ्चयम् ।**
**पराशरोक्तमपरं मारीचं भास्कराह्वयम् ॥**

किञ्चिन्नामान्तरेण देवीभागवते (३।१३।१६), स्कन्दपुराणस्य रेवाखण्डे (१।४८-५२), मत्स्यपुराणे (५३ ।५७-६२), गरुडपुराणे च (२१५ ।१७-२०) उपपुराणानां स्पष्टमुल्लेखः प्राप्यते । उपपुराणानां नामविषये मतैक्यं न प्राप्यते । उपपुराणेषु गणेशपुराणस्य नामापि सादरं गृह्यते, एतत् कल्पभेदाद् भवितुं शक्नोति । यथाष्टादशमहापुराणानि, अष्टादशोपपुराणानि सन्ति तथैवाष्टादशौपपुराणान्यपि विद्यन्ते । बृहद्विवेकग्रन्थे औपपुराणानां नामानि प्राप्यन्ते । यथा-

१. सनत्कुमारपुराणम् २. बृहन्नारदीयपुराणम् ३. आदित्यपुराणम्

४. सूर्यपुराणम् ५. नन्दिकेश्वरपुराणम् ६. कौर्मपुराणम्

७. भागवतपुराणम् ८. वसिष्ठपुराणम् ९. भार्गवपुराणम्

१०. मुद्गलपुराणम् ११. कल्किपुराणम् १२. देवीपुराणम्

१३. महाभागवतपुराणम् १४. बृहद्धर्मपुराणम् १५. परानन्दपुराणम्

१६. वह्निपुराणम् १७. पशुपतिपुराणम् १८. हरिवंशपुराणम्

**प्रश्नाः**

(क) उपपुराणानां स्रोतांसि कानि ?

(ख) उपपुराणानां सङ्ख्या कति ?

(ग) उपपुराणानां नामानि कानि ?

(घ) औपपुराणानां नामानि कस्मिन् ग्रन्थे प्राप्यन्ते ?

(ङ) कूर्मपुराणे प्रोक्तस्य श्लोकस्यानुसारेणाष्टादशौपपुराणानां नामानि लिखत ।

**९. शिक्षकस्य साहाय्येन अधो लिखितपद्यस्य सरलार्थं लिखत**

**यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।**
**अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥**

**१०. शिक्षकस्य सहयोगमभियाच्य अधो निर्दिष्टश्लोकस्य भावार्थं लिखत**

**आपत्काले तु सम्प्राप्ते यन्मित्रं मित्रमेव तत् ।**
**वृद्धिकाले तु सम्प्राप्ते दुर्जनोऽपि सुहृद् भवेत् ॥**

**११. देवीभागवतानुसारेण अष्टादशपुराणानां नामानि सश्लोकं वर्णयत ।**

**१२. पुराणानामध्ययनस्य आवश्यकतां प्रतिपादयत ।**

**१३. पुराणानां सङ्ख्याविषयकाणि मतानि प्रदर्शयत ।**

**१४. पुराणानां श्रवणेन पठनेन वा मानवजीवनेऽनुभूयमानं परिवर्तनं वर्णयत ।**

### *परियोजनाकार्यम्*

**स्वस्य आवासक्षेत्रस्य निकटस्थं धार्मिकक्षेत्रं परिभ्रम्य तत्र विधातव्यानि उद्धारकार्याणि अन्विष्य प्रतिवेदनं निर्मात ।**

# पौराणिकं वाङ्मयम्

**पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।**

पुराणानां सृष्टि-नामकरण-रचनाकाल-श्लोकसङ्ख्यादिविषयेषु नैकमतमुपलभ्यते । एतेषु विषयेषु स्वयं पुराणेषु मतान्तराणि सन्ति । कानि महापुराणानि कानि चोपपुराणानि औपपुराणानि वेति विवादो विद्यते । पुराणानामुद्गमस्थलं सृष्टिकर्ता परमेश्वरोऽस्तीति शास्त्रीयवचः प्राप्यते । पुराणानां मतानुसारेण पुराणसाहित्यं विशालतममासीद् यद्देवलोके प्रतिष्ठामवाप । गच्छता कालेन विस्तृतं पुराणसाहित्यं बोद्धुमल्पबुद्धिर्मनुष्यः समर्थो नाभवत् । विष्णोरवताररूपेण सुपूजितो व्यासो लोकमङ्गलकामनया पुराणानि लक्षचतुष्टयश्लोकात्मकानि विधाय अष्टादशमहापुराणनाम्ना प्राकाशयत् । अष्टादशमहापुराणानि व्यासो द्वापरयुगस्यान्ते व्यरचयदिति पौराणिकथनमस्ति । नारदीयमत्स्यपुराणयोरनुसारेण अष्टादशमहापुराणानां नामानि, श्लोकसङ्ख्याश्चात्र प्रस्तूयन्ते-

| **क्रमः** | **पुराणानां नामानि** | **नारदीयपुराणोल्लिखिता श्लोकसङ्ख्या** | **मत्स्यपुराणोल्लिखिता श्लोकसङ्ख्या** |
|---|---|---|---|
| १ | ब्रह्मपुराणम् | १०००० | १३००० |
| २ | पद्मपुराणम् | ५५००० | ५५००० |
| ३ | विष्णुपुराणम् | २३००० | २३००० |
| ४ | शिवपुराणम् | २४००० | २४००० |
| ५ | श्रीमद्भागवतपुराणम् | १८००० | १८००० |
| ६ | नारदीयपुराणम् | २५००० | २५००० |
| ७ | मार्कण्डेयपुराणम् | ९००० | ९००० |
| ८ | अग्निपुराणम् | १५००० | १६००० |
| ९ | भविष्यपुराणम् | १४००० | १४५०० |
| १० | ब्रह्मवैवर्तपुराणम् | १८००० | १८००० |

| | | | |
|---|---|---|---|
| ११ | लिङ्गपुराणम् | ११००० | ११००० |
| १२ | वाराहपुराणम् | २४००० | २४००० |
| १३ | स्कन्दपुराणम् | ८१००० | ८११०० |
| १४ | वामनपुराणम् | १०००० | १०००० |
| १५ | कूर्मपुराणम् | १७००० | १८००० |
| १६ | मत्स्यपुराणम् | १५००० | १४००० |
| १७ | गरुडपुराणम् | १९००० | १८००० |
| १८ | ब्रह्माण्डपुराणम् | १२००० | १२२०० |

श्रीमद्देवीभागवते प्रोक्तानि अष्टादशपुराणनामानि, श्लोकसङ्ख्या च

**चतुर्दशसहस्रं च मात्स्यमाद्यं प्रकीर्तितम् ।**
**तथा ग्रहसहस्रं तु मार्कण्डेयं महाद्भुतम् ॥**
**चतुर्दशसहस्राणि तथा पञ्चशतानि च ।**
**भविष्यं परिसङ्ख्यातं मुनिभिस्तत्त्वदर्शिभिः ॥**
**अष्टादशसहस्रं वै पुण्यं भागवतं किल ।**
**तथा चायुतसङ्ख्याकं पुराणं ब्राह्मसंज्ञकम् ॥**
**द्वादशैव सहस्राणि ब्रह्माण्डं च शताधिकम् ।**
**तथाष्टादशसाहस्रं ब्रह्मवैवर्तमेव च ॥**
**अयुतं वामनाख्यं च वायव्यं षट्शतानि च ।**
**चतुर्विंशतिसङ्ख्यातः सहस्राणि तु शौनक !**
**त्रयोविंशतिसाहस्रं वैष्णवं परमाद्भुतम् ॥**
**चतुर्विंशतिसाहस्रं वाराहं परमाद्भुतम् ।**
**षोडशैव सहस्राणि पुराणं चाग्निसंज्ञकम् ॥**
**पञ्चविंशतिसाहस्रं नारदं परमं मतम् ।**
**पञ्च पञ्चाशत् साहस्रं पद्माख्यं विपुलं मतम् ॥**
**एकादशसहस्राणि लिङ्गाख्यं चातिविस्तृतम् ।**

**एकोनविंशसाहस्रं गारुडं हरिभाषितम् ॥**

**सप्तदशसहस्रं च पुराणं कूर्मभाषितम् ।**

**एकाशीतिसहस्राणि स्कन्दाख्यं परमाद्भुतम् ॥**

**पुराणाख्या च सङ्ख्योक्ता विस्तरेण मयाऽनघाः ॥**

तथैव श्रीमद्भागवते एवमुक्तम्

**ब्राह्मं दशसहस्राणि पाद्मं पञ्चोनषष्टि च ।**

**श्रीवैष्णवं त्रयोविंशच्चतुर्विंशतिः शैवकम् ।**

**दशाष्टौ श्रीभागवतं नारदं पञ्चविंशतिः ।**

**मार्कण्डं नव वाह्नञ्च दशपञ्चचतुःशतम् ।**

**चतुर्दश भविष्यं स्यात्तथा पञ्चशतानि च ।**

**दशाष्टौ ब्रह्मवैवर्तं लिङ्गमेकादशैव तु**

**चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ।**

**स्कान्दं शतं तथा चैकं वामनं दश कीर्तितम् ।**

**कौर्मं सप्तदशाख्यातं मात्स्यं तत्तु चतुर्दश ।**

**एकोनविंशत्सौपर्णं ब्रह्माण्डं द्वादशैव तु ।**

**एवं पुराणसन्दोहश्चतुर्लक्ष उदाहृतः ।**

पुराणेषु महापुराणत्वविषये काचिद् भिन्नता दृश्यते । यथा - केचन श्रीमद्देवीभागवतम्, केचन च श्रीमद्भागवतम्, केचन शिवमहापुराणम्, केचन वायुपुराणं महापुराणं मन्यन्ते । कल्पभेदेन तानि सर्वाण्यपि महापुराणान्येव । प्रकृतिपुरुषात्मके श्रीमद्देवीभागवतश्रीमद्भागवतमहापुराणे । अतोऽनयोर्द्वयोरपि समादरः स्वीकृतो विद्यते । एवमेव शिवपुराणवायुपुराणयोर्द्वयोरपि महत्त्वं समादृतमेव दृश्यते ।

पुराणेषु प्रमुखरूपेण त्रिप्रकारको गणनाक्रम उपलभ्यते

१. सृष्टिप्रक्रियाप्रतिपादको विशिष्टक्रमः

२. सृष्टिप्रक्रियानिरूपको विशिष्टक्रमः

३. वर्णसाम्यक्रमश्च ।

प्रथमो विशिष्टक्रमः श्रीमद्भागवते उपलभ्यते । अस्यैव क्रमस्यानुसरणं लिङ्गपुराणं मार्कण्डेयपुराणञ्च कुरुतः । एषु जीवात्मपरमात्मनोर्व्यावहारिकभेदस्वीकारपूर्वकं ब्रह्मणो ब्रह्माण्डपर्यन्तं विवर्तस्यान्ते तत्रैव लयस्य च क्रमो विस्तरेण वर्णितोऽस्ति ।

द्वितीयो विशिष्टक्रमो मुख्यतया नारदीय-ब्रह्मवैवर्त-अग्नि-विष्णु-मत्स्य-शिव-कूर्म-पद्मपुराणेषु अङ्कितोऽस्ति । अस्मिन् क्रमे जीवात्मपरमात्मनोर्वास्तविकीमेकतामभिलक्ष्य परमात्मनो नामरूपोपाधिद्वारा संसारे प्रतिभासमानस्यान्तेऽविद्यानिवृत्तिपूर्वकं पुनः परमात्मन्येव लयस्य क्रमो दर्शितो विद्यते ।

तृतीयो वर्णसाम्यक्रमः केवलं देवीभागवते उपलभ्यते। तत्र वास्तविकं पौर्वापर्यं परित्यज्य केवलं तुल्यवर्णसाम्यतया मद्वयं भद्वयं चैवेत्यादिना पुराणानामष्टादश नामानि गणितानि सन्ति ।

दृश्यमानस्य ब्रह्माण्डस्य रचयिता कोऽस्ति ? अस्योत्तरं दातुं प्रथमं ब्रह्मपुराणमुपतिष्ठते, तेनेदं सूच्यते यद् ब्रह्म ब्रह्माऽभवत्स्वयमिति । स्थावरजङ्गमात्मकस्य दृश्यमानस्य जगतो निर्मातुर्ब्रह्मणः स्वरूपं बोधयितुं प्रथमं ब्रह्मपुराणं प्रवृत्तम् । ब्रह्मा कुत उत्पन्नः ? इति प्रश्नस्योत्तरं पद्मपुराणं प्रदातुमुपतिष्ठते यद् ब्रह्मा नारायणस्य नाभिकमलादुत्पन्नः । तत्पद्मं कुत उत्पन्नम् ? प्रश्नमिमं समाधातुमुपतिष्ठते तृतीयं विष्णुपुराणम् । नाभिकमलात् पद्ममुत्पन्नम् । ततो ब्रह्मा प्रादुर्भूतः । ब्रह्मणो मूलसृष्टेर्ज्ञानं कथं जातम् ? तदुत्तरं शिवपुराणं ददाति यत् शिवात् (वेदात्) । महाप्रलयदशायां विलीनपदार्थानां कारणात्मकतत्त्वानां पुनः सन्धीकरणं सर्गोऽस्ति । एतद्रहस्यं लिङ्गपुराणं बोधयति । मानवजीवने जन्ममरणादिरहस्यं बोधयितुमौर्ध्वदैहिकक्रियाया विवेचकं षष्ठं गरुडपुराणमुपतिष्ठते । नारं जलं ज्ञानं वा ददातीति नारद उच्यते । इदं तत्त्वं बोधयितुं सप्तमं नारदीयं पुराणमुपतिष्ठते ।

भगवतो भगवत्या वेति व्युत्पत्त्याधारेण पुरुषप्राधान्यात् श्रीमद्भागवतनाम्ना प्रकृतिप्राधान्याद् देवीभागवतनाम्ना च पुराणद्वयं प्रसिद्धमस्ति। ऐश्वर्यषड्गुणसम्पन्नो दक्षिणांशो भगवान् वामांशश्च भगवती अस्तीति रहस्यं बोधयितुमष्टमं भागवतपुराणमुपतिष्ठते । जन्ममरणचक्रे बद्धस्य जीवस्य कल्याणं कथं सम्भवति इत्यस्योत्तरमग्निपुराणं ददाति। यज्ञादिभिः सकामकर्मभिर्जीवस्यात्मकल्याणं कर्तुमवसरोऽग्निमाध्यमेन मिलतीति भावः। दशमं स्कन्दपुराणं भगवतः शिवस्यावतारान् चरित्रं च वर्णयद् ब्रह्मविद्याप्राप्तये तदुपासनाया आदेशं ददाति। 'आरोग्यं भास्करादिच्छेद्' इत्यनुसारेण भगवतो भास्करस्योपासनां बोधयितुमेकादशं भविष्यपुराणमुपतिष्ठते। सर्वविघ्नविनाशार्थं गणेशादिदेवानामाराधनाबोधनाय द्वादशं ब्रह्मवैवर्तपुराणमस्ति। त्रयोदशं मार्कण्डेयपुराणं भगवत्या आद्यशक्तेर्महिम्नः प्रकाशकमस्ति। एवं वामन-वाराह-मत्स्य-कूर्मपुराणानि प्रधानतया भगवतोऽवताराणां निरूपणं कुर्वन्ति। एतानि मुमुक्षुभ्यो भगवतो विष्णोः शरणागतिमुपदिशन्ति। एषु पुराणेषु प्राणिनां कल्याणाय गणेशादिपञ्चदेवतानामुपासना निर्दिष्टाऽस्ति। अन्तेऽष्टादशं ब्रह्माण्डपुराणं समस्तां सृष्टिप्रक्रियामुपसंहरत् स्वमूलतत्त्वं ब्रह्माणं सङ्केतयति। इदमेवाष्टादशपुराणानां विशिष्टक्रमस्य रहस्यमस्ति। यद्यपि प्रतिपुराणं विभिन्ना विषया

वर्णिताः सन्ति तथापि कस्यचिदेकस्य विषयस्य प्राधान्यात् पुराणप्रतिपाद्यविषयाणां निरूपणं क्रमेणानेन कृतमस्ति ।

पद्मपुराणानुसारेण पुराणानि त्रिप्रकारकाणि मन्यन्ते -

(क) सात्त्विकानि पुराणानि

(ख) राजसानि पुराणानि

(ग) तामसानि पुराणानि ।

सात्त्विकेषु विष्णुपुराणम्, नारदीयपुराणम्, श्रीमद्भागवतपुराणम्, गरुडपुराणम्, पद्मपुराणम्, वाराहपुराणञ्चेति षण्णां पुराणानां गणनाऽस्ति । ब्रह्माण्डपुराणम्, ब्रह्मवैवर्तपुराणम्, मार्कण्डेयपुराणम्, भविष्यपुराणम्, वामनपुराणम्, ब्रह्मपुराणञ्चेतीमानि षड् राजसानि पुराणानि सन्ति । तामसेषु मत्स्यपुराणस्य, कूर्मपुराणस्य, लिङ्गपुराणस्य, शिवपुराणस्य, स्कन्दपुराणस्य, अग्निपुराणस्य च गणना वर्तते ।

## शब्दार्थाः

| | | |
|---|---|---|
| कल्पभेदः | = | ब्रह्मणो दिनम्, देवतानां सहस्रद्वययुगम्, यस्मिन्नवधौ स्थितिप्रलयौ भवतः, तद् मनुष्याणां कल्पो भवति । तस्य कल्पस्य भेदः । |
| परिलक्ष्यते | = | प्रकाश्यते |
| जीवात्मा | = | जीवस्याधिष्ठाता |
| परमात्मा | = | परमेश्वरः, निराकारं ब्रह्म |
| उपतिष्ठते | = | समायाति |
| और्ध्वदैहिकक्रिया | = | दशगात्रक्रिया |
| आद्यशक्तिः | = | मूलशक्तिः |
| मुमुक्षुः | = | मुक्तेरिच्छुकः |

## अभ्यासः

### १. अतिसङ्क्षिप्तोत्तराणि लिखत

(क) नारदीयपुराणानुसारेण ब्रह्मपुराणे कति श्लोकाः सन्ति ?

(ख) मत्स्यपुराणानुसारेण शिवपुराणे कति श्लोकाः सन्ति ?

(ग) नारदीयपुराणानुसारेणाग्निपुराणे कति श्लोकाः सन्ति ?

(घ) वाराहपुराणे कति श्लोकाः सन्ति ?

(ङ) महापुराणेषु नामविषये मतभिन्नता अस्ति न वा ?

(च) वेदस्य कोऽर्थः ?

(छ) पुराणेषु प्रमुखरूपेण कति प्रकारको गणनाक्रमः प्राप्यते ?

(ज) समस्तमपि जगत् कुत्र लयमेष्यति ?

(झ) दृश्यमानस्य जगतो रचयिता कः ?

(ञ) नारायणशरीरस्य कस्मादङ्गाद् ब्रह्मणः प्रादुर्भावो जातः ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) मार्कण्डेयवामनपद्मविष्णुपुराणेषु प्रत्येकं कति श्लोकाः सन्ति ?

(ख) केषु पुराणेषु नारदीयमत्स्यपुराणयोः प्रोक्तायां श्लोकसङ्ख्यायां भिन्नता दृश्यते ?

(ग) श्रीमद्भागवते वर्णितान् पुराणश्लोकसङ्ख्याबोधकान् श्लोकान् लिखत ।

(घ) सर्गस्य रहस्यविषयबोधकं पुराणं किम् ?

### ३. अधो निर्दिष्टयोः श्लोकयोः सामूहिकवाचनं कुरुत

(क) वेदोपनिषदां साराज्जाता भागवती कथा ।
अत्युत्तमा ततो भाति पृथग्भूता फलाकृतिः ॥

(ख) इदं भागवतं नाम पुराणं ब्रह्मसंहितम् ।
भक्तिज्ञानविरागाणां स्थापनाय प्रकाशितम् ॥

**४. सात्त्विकराजसतामसपुराणानां नामानि पृथक् पृथक् लिखत ।**

**५. अधो लिखितमनुच्छेदं पठित्वा प्रश्नानुत्तरयत**

पुराणेषु पुराणानां नामानि वर्णितानि सन्ति । तत्र पद्मपुराणस्य पातालखण्डे, विष्णुपुराणे, शिवपुराणस्योमासंहितायाम्, वायुपुराणे, नारदीयपुराणे, मार्कण्डेयपुराणे, श्रीमद्भागवते, अग्निपुराणे, ब्रह्मवैवर्तस्य श्रीकृष्णजन्मखण्डे, लिङ्गपुराणे, स्कन्दपुराणस्य प्रभासखण्डे, कूर्मपुराणस्य पूर्वार्द्धे, मत्स्यपुराणे, गरुडपुराणे च सङ्क्षिप्ततो विस्तरतश्चाष्टादशानां महापुराणानां नामक्रमौ निर्दिष्टौ स्तः । पुराणेषु विष्णोः शरीरावयवत्वकल्पना क्रियते । तद्यथा - अष्टादशसु महापुराणेषु ब्रह्मपुराणं विष्णोर्मस्तकम् । पद्मपुराणं विष्णोर्हृदयम् । विष्णुपुराणं विष्णोर्दक्षिणबाहुः । शिवपुराणं विष्णोर्वामबाहुः । भागवतपुराणं विष्णोर्वक्षःस्थलम् । नारदीयपुराणं विष्णोर्नाभिः । मार्कण्डेयपुराणं विष्णोर्दक्षिणपादः । अग्निपुराणं विष्णोर्वामपादः । भविष्यपुराणं विष्णोर्दक्षिणजानु । ब्रह्मवैवर्तपुराणं विष्णोर्वामजानु । लिङ्गपुराणं विष्णोर्दक्षिणगुल्फः । वाराहपुराणं विष्णोर्वामगुल्फः । स्कन्दपुराणं विष्णो रोमाणि । वामनपुराणं विष्णोस्त्वक् । कूर्मपुराणं विष्णोः पृष्ठम् । मत्स्यपुराणं विष्णोर्मेदः । गरुडपुराणं विष्णोर्मज्जा । ब्रह्माण्डपुराणं विष्णोरस्थि चेति । एवं भगवान् नारायणोऽष्टादशपुराणेषु विराजते । उक्तञ्च पद्मपुराणस्य स्वर्गखण्डे -

**ब्राह्मं मूर्ध्ना हरेरेव हृदयं पद्मसंज्ञितम् ।**
**वैष्णवं दक्षिणे बाहुः शैवं वामो महेशितुः ॥**
**उरु भागवतं प्रोक्तं नाभिः स्यान्नारदीयकम् ।**
**मार्कण्डेयञ्च दक्षाङ्घ्रिर्वामो ह्याग्नेयमुच्यते ॥**
**भविष्यं दक्षिणो जानुर्विष्णोरेव महात्मनः ॥**
**ब्रह्मवैवर्तसंज्ञन्तु वामो जानुरुदाहृतः ॥**
**लैङ्गन्तु गुल्फकं दक्षं वाराहं वामगुल्फकम् ।**
**स्कान्दं पुराणं लोमानि त्वगस्य वामनं स्मृतम् ॥**
**कौर्मं पृष्ठं समाख्यातं मात्स्यं मेदः प्रकीर्त्यते ।**
**मज्जा तु गारुडं प्रोक्तं ब्रह्माण्डमस्थि गीयते ॥**
**एवमेवाभवद्विष्णुः पुराणावयवो हरिः ॥**

**प्रश्नाः**

(क) पुराणानां नामानि कुत्र वर्णितानि सन्ति ?

(ख) पद्मपुराणस्य कस्मिन् खण्डेऽष्टादशमहापुराणानां नामानि प्राप्यन्ते ?

(ग) विष्णोर्मस्तकं किं पुराणं मन्यते ?

(घ) विष्णोः शरीरावयवत्वकल्पना कस्मिन् पुराणे वर्तते ?

(ङ) विष्णोः शरीरावयवत्वकल्पनायां प्रयुक्तानां श्लोकानामर्थं लिखत ।

७. **नारदीयपुराणानुसारेणाष्टादशमहापुराणानां श्लोकसङ्ख्यां लिखत ।**

८. **पुराणानां गणनाक्रमस्य विवरणं प्रस्तुत ।**

९. **अधस्तनश्लोकयोः भावार्थं लिखत**

**यथा सूर्यवपुर्भूत्वा प्रकाशाय चरेद्धरिः ।**
**सर्वेषां जगतामेव हरिरालोकहेतवे ॥**
**तथैवान्तःप्रकाशाय पुराणावयवो हरिः ।**
**विचरेदिह भूतेषु पुराणं पावनं परम् ॥**

१०. **शिक्षकसाहाय्येन देव्या महत्त्वविषयकमनुच्छेदमेकं लिखत ।**

## *परियोजनाकार्यम्*

**स्वस्य पूर्वजैरभ्यसितस्य कस्यचन सांस्कृतिककार्यक्रमस्य तिथिस्थानादिनिर्देशनपूर्वकं विवरणं निर्माय कक्षायां प्रस्तुत ।**

# पुराणं दशलक्षणम्

नैपालकसमाजे पुराणस्य व्यापकप्रभावो महान् समादरश्च वर्तते। मानवजीवनस्य मार्गदर्शनाय सनातनधर्म-संस्कृति-नीतीनां कथनाय च पुराणानामवदानं गुरुतरं मन्यते। सनातनधर्मस्य मूलस्वरूपं पुराणेषु लभ्यते। चतुर्दशविद्यासु पुराणमपि गण्यते। वेदस्योपाङ्गत्वेन पुराणानि गौरवं बिभ्रति। वेदा यं धर्ममादिशन्ति, यत् कर्तव्यं निर्दिशन्ति, यच्च दर्शनं प्रतिपादयन्ति, पुराणानि देवदानवादीनां चरितवर्णनेन सन्मार्गदर्शककथाकथनेन च तदेव तत्त्वचिन्तनं विशदीकुर्वन्ति। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इत्युक्त्यापि इतिहासपुराणाभ्यां वेदार्थस्य विस्तारः कर्तव्यो भवति। राजशेखरः काव्यमीमांसायां पुराणानि वैदिकाख्यानं वर्णयन्तीति उल्लिखति। पुराणानि हि साङ्ख्य-वेदान्त-तन्त्रादिशास्त्राणां गूढविषयमपि सारल्येन व्याकुर्वन्ति। सनातनसमाजे पुराणानां स्थानं महिममण्डितं वर्तते। महाभारते पुराणं पञ्चमो वेद इत्युक्तम्। पुराणानां बाह्यमाभ्यन्तरञ्च स्वरूपं रामायणमहाभारतस्मृतिसमं मन्यते। विद्वांसः पुराणानि प्राचीन-मध्यकालिकसनातनधर्मावलम्बिनां धार्मिकं दार्शनिकमैतिहासिकं सामाजिकं राजनीतिकं सांस्कृतिकं च विश्वकोशं मन्वते। धर्मशास्त्र-राजशास्त्र-राजधर्माऽऽयुर्वेद-व्याकरण-काव्यतत्त्व-शस्त्रविद्या-राजवंशावलि-सङ्क्षिप्तकथाकथनादिविषयाणां वर्णनप्रधानमग्निपुराणं तु विलक्षणमेवाऽस्ति। कथामाध्यमेनोपदेशप्रदानम्, देवतीर्थमहिमानं वर्णयित्वा जनहृदि धर्मभावनायाश्चिरं संस्थापनञ्च पुराणानां मूलमुद्देश्यं वर्तते। पुराणेष्वेव सनातनसंस्कृतेर्विशालवटवृक्षोऽष्टादशशाखासु व्यापृतोऽस्ति।

पुराणानि बृहद्ग्रन्थरत्नानि सन्ति। वेदव्यास आख्यानम्, उपाख्यानम्, गाथा कल्पशुद्धिश्चेति चतुरो विषयान् अवलम्ब्य पुराणरूपान् बृहद्ग्रन्थान् व्यरचयदिति विष्णुपुराणे उल्लिखितं वर्तते-

**आख्यानैश्चाप्युपाख्यानैर्गाथाभिः कल्पशुद्धिभिः।**
**पुराणसंहितां चक्रे पुराणार्थविशारदः॥**

वायुपुराणेऽपि-

**यस्मात्पुरा ह्यतिनीदं पुराणं तेन हि स्मृतम्।**
**निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते॥**

वेद-ब्राह्मणाऽऽरण्यकोपनिषत्प्रभृतिवैदिकसाहित्यस्य सर्वाणि अङ्गानि पुराणस्य प्राचीनत्वं प्रमाणयन्ति । मत्स्यपुराणे उक्तमस्ति - पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः इति । 'पुराणम्' इति नामकरणात् प्राक् 'प्राचीनकथा,' 'प्राचीनविवरणम्' वेति नाम्ना पुराणानि परिचीयन्ते स्म । अथर्ववेदे पुराणशब्दस्य प्रयोग एतेषां प्राचीनत्वं पुष्णाति । यथा -

**ऋचः सामनिच्छन्दांसि पुराणं यजुषा सह ।**

**उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रितः ॥**

तत्रैव उक्तम् -

**इतिहासस्य च वै स पुराणस्य च गाथानां नाराशंसीनां स प्रियं धाम भवति य एवं वेद ॥**

शतपथब्राह्मणे 'पुराणं वेदः' इत्युल्लिखितं वर्तते । छान्दोग्योपनिषदि इतिहासपुराणं पञ्चमवेदस्य रूपेण समादृतं चतुर्भिर्वेदैः सह एवं संस्थापितञ्च -

**स होवाच ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम् ॥**

याज्ञवल्क्यस्मृतौ चतुर्दशविद्या धर्मस्य स्थानानि इत्युदीर्य पुराणं प्रथमस्थाने निहितमस्ति । यथा -

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥**

पुराणानि प्राचीनानि सन्त्यपि नवीनानीव विभान्ति । निरुक्ते पुराणस्य व्युत्पत्तिरित्थं कृता - 'पुराणं कस्मात् ? पुरा अपि नवं भवति ।' अनेन प्राचीनं सदपि यन्नवीनतामवलम्बते तदेव पुराणमिति सिद्ध्यति । छान्दोग्योपनिषदः सूत्रग्रन्थेभ्यश्च एतत् स्पष्टं भवति यद् वास्तविकपुराणानि उपनिषदां सूत्राणाञ्च समये पूर्णतां प्रापुः ।

इतिवृत्तस्याधिक्यात् पुराणमितिहासोऽभिधीयते परं पुराणमितिहासात् किञ्चिद् भिन्नं वर्तते । उभौ स्वतन्त्रौ विषयौ मन्येते । वैदिकसाहित्यस्य भाष्यकारयोः सायणशङ्कराचार्ययोर्मतानुसारेण वेदे प्रकीर्णं देवासुरसङ्ग्राम-संवादपरकवर्णनमितिहासः परं जगतः प्रथमावस्थातः सृष्टिक्रियाया विकासोपस्थापकप्रखण्डः पुराणमिति ।

पुराणानां केचिदंशाः काव्यात्मकगुणसम्पन्नाः सन्ति । भागवतमहापुराणे कविप्रतिभाप्रसूतानि अनेकान्युपकरणानि विलसन्ति । भाषिकसौष्ठव-कथाकथनकौशलच्छन्दःसौन्दर्य-भावमाधुर्यादि-

वैशिष्ट्यैर्वैदेशिका विद्वांसोऽपि भागवतमुत्कृष्टं साहित्यं मन्वते । महाकविः कालिदासो मालविकाग्निमित्रमिति नामके काव्ये पुराणपदं सौचित्यं प्रयुनक्ति- पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम् । रघुवंशे च 'पुराणपत्रापगमादनन्तरम्' इत्युक्तं वर्तते ।

केषुचित्पुराणेषु अमरकोशे च पुराणं पञ्चलक्षणं प्रसिद्धम् -

**सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।**

**वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ॥**

सर्गः, प्रतिसर्गः, वंशः, मन्वन्तरम्, वंशानुचरितमिति पुराणस्य लक्षणानि सन्ति । कानिचन पुराणानि इमानि लक्षणानि उपपुराणस्य सन्तीति प्रतिपादयन्ति । महापुराणाय दशलक्षणानि आवश्यकानि भवन्ति । एभिर्लक्षणैः सह महापुराणस्यातिरिक्तं लक्षणपञ्चकमित्थं निर्दिष्टम् - वृत्तिः, रक्षा, मुक्तिः, हेतुः, अपाश्रयश्च ।

श्रीमद्भागवतमहापुराणं पुराणानां लक्षणविषये एवमुल्लिखति -

**सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ।**

**वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ॥**

**दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।**

**केचित् पञ्चविधं ब्रह्मन् महदल्पव्यवस्थया ॥**

पुराणस्य सर्गः, विसर्गः, वृत्तिः, रक्षा, मन्वन्तरम्, वंशः, वंशानुचरितम्, संस्था, हेतुः, अपाश्रयश्चेति दश लक्षणानि सन्ति । पुराणविदो दशलक्षणयुतं ग्रन्थं पुराणमिति वदन्ति । केचन महदल्पव्यवस्थाभेदेन पुराणस्य पञ्च लक्षणानि ब्रुवन्ति । लक्षणेन पुराणेषु किं किं वर्णितमिति विषयवस्तुविवरणं ज्ञायते । दशलक्षणानां स्वरूपमधो निर्दिश्यते -

१. सर्गः - सृष्टिः ।

२. विसर्गः - विसर्गो नाम जीवस्य सृष्टिः । परमेश्वरानुग्रहेण ब्रह्मा सृष्टिसामर्थ्यमवाप्य महत्तत्त्वादिपूर्वकर्मानुसारेण सुवासनादुर्वासनयोः प्राधान्यस्य हेतोर्यच्चराचरशरीरात्मकोपाधिना विशिष्टजीवस्य सर्जनकार्यं करोति तद् विसर्गो निगद्यते । भागवते उक्तम् -

**पुरुषानुगृहीतानामेतेषां वासनामयः ।**

**विसर्गोऽयं समाहारो बीजाद् बीजं चराचरम् ॥**

यथैकबीजादपरबीजं जायते तथैव एकस्माद् जीवतोऽपरजीवस्य सृष्टिर्विसर्ग उच्यते । विसर्गो हि पुनः सृष्टिर्वर्तते ।

३. वृत्तिः - जीवनसञ्चालनाय मनुष्यो यानि वस्तूनि उपयोजयति सैव तस्य वृत्तिर्भवति । अन्नादीनि वृत्त्यन्तर्गतं समापतन्ति । मनुष्यः काञ्चन वृत्तिं स्वभावेन स्वेच्छया निश्चित्य गृह्णाति काञ्चन च शास्त्रादेशं परिपाल्य अङ्गीकरोति । उभयोरेवोद्देश्यं मानवजीवनस्य धारणं संरक्षणञ्चास्ति । भागवतस्यानुसारेण जीवानां जीवननिर्वाहस्य सामग्री चरपदार्थानां कृतेऽचरप्राणिन एव वृत्तिर्जीवननिर्वाहस्य साधनं वा भवति । यथा -

**वृत्तिर्भूतानि भूतानां चराणामचराणि च ।**

**कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥**

४. रक्षा - रक्षा नाम भगवदवतारो भवति । भगवान् हि युगे युगे पशुपक्षिमनुष्यर्षिदेवतादिरूपाणि गृहीत्वा धराधामनि अवतीर्य नैकलीलाविलासं करोति; वेदविरोधिनो धर्मध्वंसिनश्च निहन्ति । अवतारस्य प्रयोजनं जगद्रक्षणमिति भागवतं दर्शयति-

**रक्षाच्युतावतारेहा विश्वस्यानु युगे युगे ।**

**तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैस्त्रयीद्विषः ॥**

५. मन्वन्तरम् - मनोः कालविभागः ।

६. वंशः - देवतानां वंशपरम्परा ।

७. वंशानुचरितम् - राज्ञां वंशवृत्तम्

८. संस्था - वैपरीत्येन सृष्टिः प्रलयो वा संस्था उच्यते । भागवते जगतः स्वभावतो नित्यः, नैमित्तिकः, प्राकृतिकः, आत्यन्तिकश्चेति चतुर्विधप्रलयो भूयो भूयो भवति; यं विद्वांसः संस्थां प्रवदन्तीति उक्तम् -

**नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।**

**संस्थेति कविभिः प्रोक्ता चतुर्धास्य स्वभावतः ॥**

९. हेतुः - हेतुशब्दो जीवबोधको वर्तते । अविद्यया कर्मणः कर्ता जीवो बुध्यते । जगतः सृष्टौ जीवः कथं कारणमिति जिज्ञासा समाधीयते यद् जीवस्यादृष्टेन प्रयुक्तत्वाद् जगतः सर्गप्रतिसर्गादयो जायन्ते । ततो जीवः स्वादृष्टेन विश्वसृष्टेर्विश्वप्रलयस्य वा कारणं भवति । इत्यभिप्रायेण भागवते हेतुशब्दः प्रयुक्तः । यथा -

**हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ।**

**यं चानुशयिनं प्राहुरव्याकृतमुतापरे ॥**

१०. अपाश्रयः - अपाश्रयो ब्रह्मबोधकपदम् । जीवस्य जाग्रत्स्वप्नसुषुप्तिनाम्न्यस्तिस्रोऽवस्था वृत्तयो वा भवन्ति । एतासु साक्षिरूपेण यत् सततं प्रतीयते तदेवाधिष्ठानरूपमपाश्रयतत्त्वं वर्तते । एतद् एताभ्योऽवस्थाभ्यः परं तुरीयतत्त्वरूपेण लक्ष्यते । भागवते उक्तम् -

**व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।**

**मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः ॥**

जीवस्य मायामयीषु जाग्रत्स्वप्नसुषुप्त्यावस्थासु अन्वयव्यतिरेकाभ्यां नित्यं सिद्धत्वेनाधिष्ठितं ब्रह्मतत्त्वमेव अपाश्रयोऽस्ति । यथा घटादिपदार्थेषु मृत् कार्यरूपेण व्याप्नोति ततो बहिश्च अधितिष्ठति तथैव नामरूपेण सत्तातत्त्वस्य व्याप्तिस्तद्भिन्नमस्तित्वञ्च विद्यते । एवं रीत्या शरीरस्य जन्मतो मृत्युपार्यन्तिकासु सर्वासु अवस्थासु अन्वितं शरीराद् भिन्नमात्मतत्त्वमपाश्रयो निगद्यते । भागवते एवोक्तम् -

**पदार्थेषु यथा द्रव्यं सन्मात्रं रूपनामसु ।**

**बीजादिपञ्चतान्तासु ह्यवस्थासु युतायुतम् ॥**

## शब्दार्थाः

| | | |
|---|---|---|
| अवदानम् | = | योगदानम् |
| उपाङ्गम् | = | सहायकमङ्गम् |
| व्याकुर्वन्ति | = | व्याख्यानं कुर्वन्ति । |
| पुष्णाति | = | पुष्टीकरोति |
| निहितम् | = | संस्थापितम् । |
| हातव्याः | = | त्यक्तव्याः |
| लीलाविलासः | = | भगवतो लौकिकालौकिककार्याणि |
| अन्वयव्यतिरेकः | = | कस्यचन वस्तुनोऽस्तित्वेऽपरस्य वस्तुनोऽस्तित्वमन्वयः, कस्यचन वस्तुनोरभावेऽपरवस्तुनोऽभावः व्यतिरेकः । |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) पुराणानामवदानं कीदृशं मन्यते ?

(ख) राजशेखरः किं कथयति ?

(ग) सनातनसंस्कृतेर्विशालवटवृक्षः कः ?

(घ) 'पुराणम्' इति पदस्य कोऽर्थः ?

(ङ) छान्दोग्योपनिषदि इतिहासपुराणं कथं समादृतम् ?

(च) निरुक्ते पुराणस्य कीदृशी व्युत्पत्तिः कृतास्ति ?

(छ) पुराणस्य पञ्च लक्षणानि कानि ?

(ज) प्रतिसर्गस्य कोऽर्थः ?

(झ) वंश-वंशानुचरितयोः किं पार्थक्यम् ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) पुराणानि किं विशदीकुर्वन्ति ?

(ख) पुराणानि कथं विश्वकोशं मन्यन्ते ?

(ग) पुराणानां मूलोद्देश्यं किम् ?

(घ) 'पुराणम्' इति नामकरणात् प्राक् पुराणानि कथं परिचीयन्ते स्म ?

(ङ) याज्ञवल्क्यस्मृतौ पुराणानां विषये किं कृतमस्ति ?

(च) इतिहासपुराणयोः पार्थक्यं निर्दिशत ।

(छ) तात्पर्यं प्रकाशयत

इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।

### ३. पुराणानां प्राचीनत्वं विवेचयत ।

### ४. पुराणानां दश लक्षणानि प्रतिपादयत ।

### ५. पुराणानां धार्मिक-सांस्कृतिक-नैतिकमहत्त्वं निरूपयत ।

## ६. पुराणानां पञ्चलक्षणदशलक्षणयोः साम्यवैषम्ययोः सूचीं निर्मात ।

## ७. अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत

दशमशताब्द्याः प्रारम्भे राजशेखरो नाम कविः काव्यशास्त्री च बभूव । स महाराष्ट्रदेशनिवासी प्रतीयते । स आत्मानमकालजलदस्य प्रपौत्रं दुर्दकशीलवत्योः पुत्रञ्च कथयति स्म । स आत्मानं मन्त्रिसुतञ्च मनुते स्म । तेन एतस्य पिता कस्यापि राज्यस्य अमात्य आसीदिति अनुमीयते । राजशेखरस्य अवन्तिसुन्दरीनाम्नी पत्नी आसीत् । सा विदुषी साहित्यविद्याविचक्षणा चावर्ततेति राजशेखरस्य ग्रन्थादवगम्यते । राजशेखरो यायावरकुले जनिं लेभे । यायावरस्तस्य कोऽपि कुलपुरुषो भवेदिति अनुमातुं शक्यते । राजशेखरो बालरामायणम्, बालभारतम्, विद्धशालभञ्जिका, कर्पूरमञ्जरी चेत्यादीनि नाट्यकाव्यानि व्यरचयत् । काव्यमीमांसा राजशेखरस्य कीर्तिशेखर इव काव्यशास्त्रीयग्रन्थो वर्तते । काव्यमीमांसायामष्टादश अधिकरणानि आसन्निति श्रुतिपरम्परायां सत्यामपि ग्रन्थस्यास्य सम्प्रति प्रथमाधिकरणमेवोपलभ्यते । तत्र अष्टादश अध्यायाः सन्ति । लौकिकसाहित्यस्य विषयं विवृण्वन् राजशेखरश्चत्वारि शास्त्राणि पौरुषेयाणि वदति – पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतिश्च । केचन पुराणस्यैव भेद इतिहास इति ब्रुवन्ति । इतिहासो द्विविधो वर्तते - परक्रिया पुराकल्पश्च । परक्रिया एकनायकयुता भवति । रामायणं परक्रियाया उदाहरणं मन्यते । पुराकल्पे बहवो नायका वर्ण्यन्ते । महाभारतं पुराकल्पस्योदाहरणमस्ति । आन्वीक्षिकी द्विधा विभज्यते - पूर्वपक्षः, उत्तरपक्षश्च । पूर्वपक्षे जैनबौद्धचार्वाकनामानि त्रीणि दर्शनानि सन्ति । उत्तरपक्षेऽपि त्रीणि दर्शनानि गण्यन्ते - साङ्ख्यन्यायवैशेषिकभेदेन । तर्कोपस्थापने तिस्रः कथा भवन्ति - वादः, जल्पः, वितण्डा च । वादो नाम उभयोः पक्षयोर्मध्यस्थस्य तत्त्वज्ञानार्थं याथार्थ्यकथनं भवति । प्रतिपक्षिणि विजयं कामयमानेन स्वमतसिद्ध्यर्थं छलजातिनिग्रहादीनामाश्रयणं जल्पो निगद्यते । स्वमतपरिपोषणेन विना केवलं परपक्षस्य दूषणं वितण्डा भवति । मीमांसा वेदवाक्यानां सहस्रैरनेकैर्वा तर्कैर्विवेचनपरा विद्या उच्यते । मीमांसा द्विविधा - विधिर्वेदान्तश्च । विधिमीमांसा कर्मविवेचिका भवति, वेदान्तमीमांसा तु ब्रह्मनिदर्शिनी । वेदार्थस्मारिका विद्या स्मृतिर्भवति । स्मृतयः प्राधान्येन अष्टादश सन्ति । विद्यानां नामसङ्ख्यादिविषये मतैक्यं न दृश्यते । चतुर्दश विद्याः स्वीकुर्वतां पुरो राजशेखरः काव्यं पञ्चदशीं विद्यां मनुते । चतस्रो विद्या मन्वानां पुरस्तु स पञ्चमीं साहित्यविद्यामङ्गीकरोति । साहित्यविद्या हि चतसृणां विद्यानां निस्यन्द इत्यस्य कवेस्तर्को विद्यते । विद्यायाः सार्थकत्वं तदैव फलति यदेयं धर्मार्थयोः साधिका भवेत् ।

**प्रश्नाः**

(क) राजशेखरस्य जन्मशताब्दी का ?

(ख) काव्यमीमांसायाः स्वरूपं किम् ?

(ग) राजशेखरः कानि शास्त्राणि पौरुषेयाणि वदति ?

(घ) परक्रियापुराकल्पयोः को भेदः ?

(ङ) जल्पस्य स्वरूपं किम् ?

(च) मीमांसा कीदृशी विद्या वर्तते ?

(छ) साहित्यविषये राजशेखरस्य कीदृशं मतमस्ति ?

(ज) विद्याया विद्यात्वं कथं सार्थकं भवति ?

(झ) 'विवृण्वन्', 'निस्यन्दः' इति पदद्वयं प्रयुज्य द्वे सार्थकवाक्ये रचयत ।

(ञ) तर्कोपस्थापने का कथा अवलम्बनीया ? कारणं दर्शयत ।

**८. अधस्तनपद्यस्य सरलार्थं लिखत**

न वासुदेवात् परमस्ति मङ्गलं न वासुदेवात् परमस्ति पावनम् ।
न वासुदेवात् परमस्ति दैवतं तं वासुदेवं प्रणमन् न सीदति ॥

**९. अधोलिखितश्लोके प्रयुक्तस्य 'पुराणः' इति पदस्याभिप्रायः कः ? स्पष्टं कुरुत**

न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥

**१०. अभिभावकं सम्पृछ्य प्रबुद्धजनेन सह सम्मिल्य वा यथेच्छं कस्यचन पुराणस्य बालचरितयुतां नीतिशिक्षादायिनीं लघुकथां विलिख्य शिक्षकं दर्शयत ।**

## *परियोजनाकार्यम्*

**श्रीमद्भागवतमहापुराणस्य विषये प्रदत्तं विवरणं निर्माय कक्षायां प्रस्तुत**

| | | | | |
|---|---|---|---|---|
| दीर्घतमः स्कन्धोऽध्यायः तत्ततच्छ्लोक-सङ्ख्या च | लघुतमः स्कन्धोऽध्यायः तत्ततच्छ्लोक-सङ्ख्या च | सम्पूर्ण-पद्यसङ्ख्या | स्थानसङ्केतसहितं शार्दूलविक्रीडितमन्दाक्रान्तो-पजातिशिखरिणीद्रुतविलम्बित-वसन्ततिलकाच्छन्दसामेकैकं पद्यम् | द्वादशस्कन्धस्या-न्तिमपद्यम् |

# भक्तितत्त्वम्

भजनं भक्तिः, भज्यतेऽनयेति भक्तिः, भजन्त्यनया इति भक्तिर्वेति विग्रहेषु भज सेवायामित्यस्माद्धातोर्भावे क्तिन्प्रत्ययेन भक्तिशब्दो निष्पद्यते । भक्तिशब्देन लोकव्यवहारे ईश्वरस्य मातापित्रोर्गुरूणाञ्च भक्तिरित्यपि बोध्यते । मानवस्य धर्मार्थकाममोक्षाख्यपुरुषार्थेषु चरमं पुरुषार्थं मोक्षरूपं साधयितुं कश्चन मार्गोऽपेक्ष्यते । मोक्षाख्यफलाय बहुभिर्बहवो मार्गाः समुपदिष्टाः सन्ति । केचन ज्ञानमार्गमुपदिशन्ति, अपरे कर्ममार्गं वदन्ति चेदपरे भक्तिमार्गं निर्दिशन्ति । तत्र कतमो मार्गः सरलो गरीयान् वेति मतभेदो विद्यते । तेषु मार्गेषु भक्तिमार्गः सहजः सरलश्च वर्तते ।



अस्माकं पौरस्त्यपरम्परायां भक्तिरेव मानवजीवनस्य परमसाधनत्वेन प्रतिष्ठिता वर्तते। कर्म-ज्ञान-भक्तियोगेषु भक्तिरेव सर्वसुलभा मन्यते। वेदा उपनिषद इतिहासपुराणादयो विविधा आगमाः स्मृतयश्च विविधप्रकारैर्भक्तेर्महत्त्वं प्रतिपादयन्ति।

भगवतो सेवा, भगवत्यनुरागश्च भक्तौ अन्तर्भवन्ति। भक्तेरमूर्तरूपत्वेन भावविशेषश्चैतन्यात्मकजीवस्य स्वाभाविकप्रवाहश्च भक्तिरित्यवगम्यते। तत्र लौकिकमनुरागं विहाय पारमार्थिकः, निरपेक्षः, निष्कामश्च अनुरागो भवति। भगवत्यनन्यप्रेमरूपा अमृतस्वरूपा च वृत्तिरेव भक्तिः। भगवति प्रेम, आसक्तिः, श्रद्धा, अनुरागः, मनसः स्थिरीकरणञ्च भक्तिपदेन व्यवह्रियते। 'यमैवेष वृणुते तेन लभ्यः' इत्याद्युपनिषद्वाक्येन जीवे ईश्वरस्य कृपापात्रताऽवलोक्यते। एवमेव श्रीमद्भागवतादिपुराणेषु च भक्तिर्धर्मस्य परमस्वरूपा निरूपिता वर्तते।

भक्तिः कर्मणो ज्ञानस्य च विरोधिनी न, अपि तु उभयोरपि परिपाकस्वरूपा मन्यते। निष्कामकर्मणा चित्ते शुद्धता जायते। शुद्धे चेतसि च ज्ञानप्रकाश उदेति। समृद्धे ज्ञाने भक्तिरुत्पद्यते। ततो भक्तिर्दृढा भवति। 'भक्त्या मामभिजानाति' इति गीताया वचनेन ज्ञायते यद् ज्ञानस्योदयोऽपि भक्त्या एव सम्भवति। तर्केण पारमार्थिकं ज्ञानं नैवोत्पद्यते। अतो भक्तिरेव मोक्षस्य साधनमस्ति।

विविधशास्त्रेषु भक्तेर्नानाविधा अवस्था वर्णिता विद्यन्ते। शास्त्रविधिमनुल्लङ्घ्य भजनीया शास्त्रनियमाधीना विधिसम्मता भक्तिः वैधीभक्तिः कथ्यते। एवं सहजभावा स्वाभाविका प्रेमरूपा रागानुगा भक्तिः, अभ्यासावस्थारूपा साधनाभक्तिः, साध्यावस्थामापन्ना प्रेमलक्षणा पराभक्तिः साध्याभक्तिर्वा कथ्यते।

भक्तेश्चरमफलं सायुज्यपूर्वकः सान्निध्यविशेषो वर्तते। आनन्दस्वरूपे भगवति निरन्तरानुभव एव मोक्षो निगद्यते। अतो भक्तिस्तत्त्वज्ञानसमन्वित आध्यात्मिकमार्गो वर्तते। भावात्मकमनुभवमविहाय तत्त्वज्ञानसमन्वित आध्यात्मिकमार्ग एव भक्तिमार्गोऽस्ति। भक्तिं विना कस्यापि मनोरथस्य सिद्धिर्न सम्भवति। भगवत्प्राप्तिरूपः परमकल्याणकारकविषयो भक्तिं विना न लभ्यते। सगुणं साकारञ्च ब्रह्माणं विना भक्तिमूलिकोपासना असम्भवा एव। तेन सगुणनिर्गुणयोः साकारनिराकारयोश्च भक्तिमार्गे सगुणस्य साकारस्य च ब्रह्मण उपासना विधीयते। भगवानपि स्वकीयान् भक्तान् भजते, भक्तश्च भगवन्तं भजते इति गीताया वचनेन ज्ञायते - ये यथा मां प्रपद्यन्ते ताँस्तथैव भजाम्यहम्।

उपनिषत्सु ब्रह्मणः सगुणनिर्गुणयोः सविशेषनिर्विशेषयोरुभयोरपि विभावयोर्विवरणं दृष्टिगोचरं भवति। तत्र परब्रह्मणः सगुणस्य सविशेषस्य विभावस्य वर्णनप्रसङ्गे देवानामीश्वराणां महेश्वराणां च वाचकाः शब्दा प्रयुक्ता दृश्यन्ते। 'यस्य देवे परा भक्तिः' इत्यादिना भक्तिशब्दः श्वेताश्वेतरोपनिषदि दृश्यते। एवमेव कठोपनिषदि 'नायमात्मा प्रवचनेन लभ्यो न मेधया, न बहुना श्रुतेन। यमैवेष वृणुते तेन

लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम् ॥ (१/२/२३)' इति रीत्या अयमात्मा शास्त्रव्याख्यानेन मेधया पाण्डित्येन च नैव प्राप्तुं शक्यते इति प्रतिपादितम् । आत्मा यं वृणुते, यस्मिँश्चानुग्रहं करोति, स एव परमात्मानं प्राप्नोतीति ततो लभ्यते ।

भक्तितत्त्वं ज्ञातुं प्राथम्येन अस्या मूलाधारोऽवगन्तव्यो भवति । अहङ्कारविसर्जनम्, कर्तृत्वभोक्तृत्वयोरभिमानत्यागः, ईश्वरसर्वकर्तृत्वस्वीकारश्च भक्तितत्त्वस्य मूलाधाराः स्वीक्रियन्ते । सांसारिकजीवनेऽपि भक्तियुक्तो जनोऽहङ्काररहितः तृष्णारहितः, सर्वत्र समभावेन व्यवहर्ता, लब्धानन्दश्च दृश्यते ।

यथाविधि विहिता भक्तिर्भक्ताय अनेकानि फलानि प्रयच्छति । तेषु चरमफलं सच्चिदानन्दस्वरूपे भगवति लीनता अथवा आनन्दाख्यो मोक्षलाभो मन्यते । भक्तेः फलविषये उक्तमस्ति-

**कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन ।**

**अपारसंवित्सुखसागरेऽस्मिन् लीने परं ब्रह्मणि यस्य चेतः ॥**

अस्मिन् असारसंसाररूपचैतन्यसुखसागरे यस्य जनस्य चेतः परब्रह्मणि लीनं भवति तस्य समग्रं कुलं पवित्रं भवति । तस्य जनन्यपि कृतार्था भवति । तस्यैव कर्मणा पृथिवी च पुण्यवती भवति । परमात्मनि लीनभक्तिको नर एतत्सर्वं कर्तुं पारयति ।

इष्टदेवे परमानुरक्तिः, एकान्तनिष्ठा, फलत्यागात्मिका निष्कामता च भक्तेर्लक्षणानि सन्ति । एवं कारणनिरपेक्षितात्मिका अहैतुकता, कर्तृत्वभोक्तृत्वविसर्जनात्मकोऽहङ्कारत्यागः, सातत्यबुद्धिरूपात्मकं निरन्तरस्मरणञ्च भक्तिलक्षणानि विद्यन्ते । एवमेव स्वानुभूतिलक्षणात्मिका आनन्दस्वरूपता, स्वस्वामिसम्बन्धबोधात्मकमात्मनिवेदनम्, ईश्वरप्रसादनात्मिका भगवत्प्रीतिजनकता च भक्तिलक्षणे समायान्ति ।

परमसिद्धिरूपा भक्तिर्नवधा वर्णिता विद्यते -

**श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।**

**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ॥**

भक्तिर्विष्णोः श्रवण-कीर्तन-स्मरण-पादसेवनार्चन-वन्दन-दास्यात्मनिवेदनरूपा वर्तते । भक्तिलाभाय भक्तिभूमिकावश्यकी भवति । शास्त्रेषु भक्तेः क्रमिकविकासो भूमिकारूपेण निरूपितो दृश्यते । विभिन्नग्रन्थेषु नामभेदो भवितुं शक्नोति परन्तु तत्त्वतो भावस्य परिपाकक्रम एव तत्रापि प्रतिपाद्यते । ताश्च यथा-

**प्रथमं महतां सेवा तद्दयापात्रता ततः ।**
**श्रद्धाथ तेषां धर्मेषु ततो हरिगुणश्रुतिः ॥**
**ततो रत्यङ्कुरोत्पत्तिः स्वरूपाधिगतिस्तथा ।**
**प्रेमवृद्धिः परानन्दे तस्यार्थस्फुरणं ततः ॥**
**भगवद्धर्मनिष्ठान्तस्तस्मिँस्तद्गुणशालिता ।**
**प्रेम्णोऽथ परमा काष्ठेत्युक्ता च भक्तिभूमिका ॥**

सज्जनानां सेवा कर्तव्या भवति । तदनन्तरं तेषां दयापात्रता प्राप्यते । तेषां धर्मेषु भगवन्नामलीलादिकथनेषु श्रद्धा जायते । तदनन्तरं हरिकथाश्रवणम्, ततो रत्यङ्कुरोत्पत्तिः सञ्जायते । तदनन्तरं भगवत्स्वरूपानुभूतिर्भवति । ततः परानन्दे भगवति प्रेम प्रवर्द्धते । ततश्चित्तेऽनुरागस्य स्फुरणं भवति । ततो भगवद्धर्मे निष्ठा समुत्पद्यते । ततस्तद्गुणशालिता च समुत्पद्यते । अन्त्ये च प्रेम्णः परमा काष्ठा अनुभूयते । एष एव भक्तेः सोपानक्रमो विद्यते । सैव भक्तिभूमिकेति कथ्यते ।

भक्तेर्महत्त्वं बहुधा वर्णयितुं शक्यते । भक्तिर्मोक्षस्य साधनमस्ति । इयं सर्वसुलभा भवति । इयं कर्मणो ज्ञानस्य च परिपाकस्वरूपा विद्यते । इयमेव ईश्वरजीवयोः सम्बन्धस्य प्रत्यक्षमनुभवं जनयति, अहङ्कारं नाशयति, आनन्दस्वरूपं च प्रापयति । भक्तिर्नीतिमतो मानवजीवनस्याधारो वर्तते । इयं शरणागतजीवनं परिपूर्णतां नयति । इयमेव भक्तं सन्मार्गे प्रवर्तयति । 'वेदैश्च सर्वैरहमेव वेद्य' इत्यादिवचनैर्भक्तिः समस्तशास्त्राणां सारः सिद्ध्यति । अतो भक्तिर्मानवजीवनस्य परमा सिद्धिरपि कथ्यते ।



## शब्दार्थाः

| | | |
|---|---|---|
| मोक्षः | = | मुक्तिः |
| गरीयान् | = | गुरुतरः |
| पारमार्थिकः | = | ब्रह्मतत्त्वस्वरूपः |
| निरपेक्षः | = | अपेक्षारहितः |
| निष्कामः | = | कामनारहितः |
| परिपाकः | = | परिपक्वः |
| सच्चिदानन्दः | = | सत्यस्वरूपं चेतनस्वरूपमानन्दस्वरूपञ्च परब्रह्म |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) भक्तिशब्दस्य व्युत्पत्तिः का ?

(ख) मोक्षलाभाय कति मार्गा निर्दिष्टाः ?

(ग) भक्तिशब्दस्य सामान्यार्थः कः ?

(घ) भक्तेश्चरमं फलं किम् ?

(ङ) धर्मस्य परमस्वरूपता का ?

(च) भक्तिभूमिकायां प्रथमा भूमिका का ?

(छ) भक्तेर्नवप्रकाराः के ?

(ज) नवधा भक्तिः कस्य साधनात्मकं रूपं वर्तते ?

(झ) भगवति भक्तिः कदा कर्तव्या ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) भक्तेरवस्थाः काः ?

(ख) भक्तेराधाराः के वर्तन्ते ?

(ग) एकस्मिन्ननुच्छेदे भक्तेः परिचयं दत्त ।

(घ) तात्पर्यं प्रकाशयत

कुलं पवित्रं जननी कृतार्था वसुन्धरा पुण्यवती च तेन ।
अपारसंवित्सुखसागरेऽस्मिन् लीने परं ब्रह्मणि यस्य चेतः ॥

**३. भक्तिसाधनाक्रमे किमर्थं सगुणब्रह्मण उपासना क्रियते ? लिखत ।**

**४. भक्तेर्लक्षणानि निरूपयत ।**

**५. भक्तेर्महत्त्वं प्रतिपादयत ।**

**६. नवविधभक्तेः स्वरूपं प्रदर्शयत ।**

**७. अधस्तनगद्यभागं पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत**

धार्मिककार्येषु सङ्कल्पस्य महती आवश्यकता वर्तते । अस्य मूलभूतं महत्त्वं शास्त्रसम्मतं गवेषणीयं भवति । तत्र सङ्कल्पो नाम कर्मणश्चेतनाधिष्ठानरूपो यत्र बाह्याचरणसहितोऽन्तःसाक्षिधर्मरूपेण फलप्रदो भवति । सङ्कल्पः कस्यापि कर्मण आत्मा इव मन्यते । सम्यक् कृतो निश्चयः, अथवा मनसो निर्णय एव सङ्कल्प इत्युच्यते । तत्र धार्मिककर्मणि देशकालकर्तृदेवतोद्देश्यफलाभिलाषादीनां निश्चयः सङ्कल्पवाक्ये विधीयते । सङ्कल्पवाक्यादेव कर्म प्रारभ्यते । असङ्कल्पितं कर्म अकर्म इव निष्फलं भवति । सङ्कल्पस्य कर्तव्यता श्रुतिष्वपि 'यद्यद्ध्यायति, तद् वाचा वदति, तत् कर्मणा करोति' इत्यादिवाक्यैः सङ्केतिता वर्तते । असङ्कल्पितानि कर्माणि निष्फलानि भवन्तीति धर्मशास्त्रीयसिद्धान्तश्च वर्तते । अतः सङ्कल्परहितं कर्म फलोत्पादनेऽक्षमं भवति । सङ्कल्प एव कर्मविशेषस्य निर्णायको भवति । सकामनिष्कामत्वेन प्रायश्चित्तत्वेन च भिन्नप्रकारकं कर्म फलवैविध्यप्रदायकं भवति । तत्र कर्मण उद्देश्यवैविध्ये फलवैविध्यञ्च जायते । यथा दानकर्मणि काम्यसङ्कल्पेन काम्यफलमवाप्यते, निष्कामसङ्कल्पेन चित्तशुद्धिर्जायते, प्रायश्चित्तसङ्कल्पेन च ज्ञाताज्ञातकृताकृताशुभदोषनाशो भवति । यत्र भगवतो मुखोल्लासाय प्रसादनाय वा सङ्कल्पः क्रियते चेत् तत्रेश्वरार्पणभावो दृश्यते । यत्र च फलत्यागपूर्वकं कृतं कर्म भक्तिरूपेण परिणमते । अतः कर्मणो मूलं धर्मस्य प्राणाः फलस्य नियामकोऽशुभनिवारणस्योपायश्च सङ्कल्प एवेति निश्चीयते ।

सङ्कल्पवाक्ये प्रमुखरूपेण सङ्कल्पस्य षडङ्गानि स्मर्यन्ते। तान्यङ्गानि च देशकालकर्तृदेवतोद्देश्यफलानि सन्ति। एतेषां समुच्चारणेन सङ्कल्पितं कर्म सुव्यवस्थितं जायते। धर्मशास्त्रनिर्णीतान्येतान्यङ्गानि कर्मभूमौ सुमुहूर्ते कर्त्रा देवानां प्रीतये प्रयोजनं फलादिकं च स्मृत्वा कर्माणि सम्पाद्यन्ते। कर्माणि च नित्यनैमित्तिककाम्यभेदेन त्रिधा भवन्ति। सन्ध्यावन्दनादीनि नित्यकर्माणि पित्रोः क्षयाहादितिथौ विधेयानि श्राद्धादीनि नैमित्तिककर्माणि, कामनासिद्धये सम्पादनीयानि काम्यकर्माणि भवन्ति। तत्र कर्मणः प्रकृतिं दृष्ट्वा निषिद्धदिनादिकं विवर्ज्य कर्माणि सम्पादनीयानि भवन्ति। यथा काम्यकर्माणि निषिद्धवेलां विहाय ज्योतिर्विदादिष्टसुमुहूर्ते सम्पादनीयानि भवन्ति। निषिद्धकाले विवर्जितानि कार्याणि सुसङ्कल्प्य विहितान्यपि फलभाञ्जि न भवन्ति।

सुमुहूर्ते कृतेन कर्मणा फलसिद्धिर्जायते। अतः कर्माणि कालशुद्धिरपेक्ष्यते। तत्र संवत्सरायन-ऋतु-मास-पक्ष-तिथि-वार-नक्षत्र-योग-करणादीनां चन्द्र-सूर्य-गुरूणां स्थितिश्च समुच्चार्यते। एतेन देवर्षिपितृणां साक्षिभावशुद्धिर्भवति। तदनु कर्मभूमावेव कर्तव्यकर्मणो निर्देशः शास्त्रसम्मतो वर्तते। देशभेदादपि कर्मणः फलभेदो भवति। अतः स्थानशुद्धये कर्मभूम्या देशादिकं निर्देष्टव्यं भवति। कर्मणः स्वामी च कर्मकर्ता भवति। कर्तुर्वेद-शाखा-गोत्र-प्रवर-राशि-नामादिकमत्रोच्चारणीयम्, तच्च कर्तृत्वनिश्चयार्थमत्यावश्यकं भवति। कर्तुर्निश्चयानन्तरं कर्म समुच्चार्यते। अत्र किं कर्म क्रियमाणं वर्तते तस्य स्पष्टोच्चारणं कर्तव्यम्। यथा यज्ञः, दानम्, व्रतम्, मन्त्रजपः, पाठपारायणम्, श्राद्धम्, हवनं वा क्रियमाणं कर्मोच्चारणीयं भवति। तदनु विधीयमानं कर्म कस्मै देवाय समर्प्यते, तस्योच्चारणं कर्तव्यं भवति। यथा लक्ष्मीनारायणप्रीतये, उमामहेश्वरप्रीतये, दुर्गादेवीप्रीतये इत्यादिकमुच्चारणीयम्। देवताभेदेन कर्मभेदोऽपि निश्चीयते। प्रधानदेवस्योच्चारणं विधाय कर्मणः प्रयोजनमुद्देश्यं वा समुच्चार्यते। यथा काम्यफलार्थम्, निष्कामभावेन, प्रायश्चित्तार्थम्, धर्मार्थकाममोक्षाख्यचतुर्विधफलसिद्ध्यर्थमित्यादिकमत्रोच्चारणीयं भवति। तदनु विहितस्य कर्मणः फलत्यागोऽथवा कर्मार्पणभावः प्रदर्शनीयो भवति। अत्र परमेश्वरेच्छया यत्कृतं तत्सर्वं श्रीपरमेश्वरार्पणमस्तु इत्यादिकमुच्चार्यं भवति। एतान्येव सङ्कल्पस्य प्रमुखानि अङ्गाानि सन्ति।

### प्रश्नाः

(क) सङ्कल्पस्य महत्त्वं किम् ?

(ख) सङ्कल्पस्य प्रयोजनं किम् ?

(ग) सङ्कल्पस्याभावे विधीयमानं कर्म किमिव भवति ?

(घ) सङ्कल्पस्याङ्गानि कानि ? प्रत्येकं परिचयं दत्त।

(ङ) प्रथमानुच्छेदस्य सारांशं लिखत ।

(च) शिक्षकसहयोगेन रुद्राभिषेककर्मणः सङ्कल्पस्य स्वरूपं निर्मात ।

(छ) प्रायश्चित्तगोदानस्य सङ्कल्पनिर्माणं कृत्वा शिक्षकं दर्शयत ।

(ज) निष्कामस्य कर्मणो विहितदोषशमनाय प्रायश्चित्तार्थं चोच्चार्यमाणसङ्कल्पस्वरूपं पृथक् पृथग् निर्माय कक्षायां प्रस्तुत ।

## ८. अधस्तनश्लोकान् स्वगिरा व्याख्यात

प्रथमं महतां सेवा तद्दयापात्रता ततः ।
श्रद्धाथ तेषां धर्मेषु ततो हरिगुणश्रुतिः ॥
ततो रत्यङ्कुरोत्पत्तिः स्वरूपाधिगतिस्ततः ।
प्रेमवृद्धिः परानन्दे तस्यार्थस्फुरणं ततः ॥
भगवद्धर्मनिष्ठान्तस्तस्मिँस्तद्गुणशालिता ।
प्रेम्णोऽथ परमा काष्ठेत्युक्ता च भक्तिभूमिका ॥

## *परियोजनाकार्यम्*

**भक्तिभावं पुरस्कृत्य नेदीयस्यास्तीर्थभूम्या वर्णनं देवोपासनाक्रमं चोल्लिख्य यात्राविवरणं लिखित्वा शिक्षकं दर्शयत ।**

# गुरुभक्तिः

अस्माकं शास्त्रेषु मातुः पितुर्गुरोरीश्वरस्य च भक्तेर्महिमा वर्णितो वर्तते । तेषु गुरोर्गुरुभक्तेश्च महिमा सर्वोपरि मन्यते । माता पुत्रं जनयति, तस्य लालनपालनादिकं च करोति । पिता तस्य सर्वविधानामावश्यकतानां परिपूर्तये प्रयत्नं करोति, शिक्षणाय तं पाठशालां प्रेषयति । शिक्षादीक्षादिना तस्य कल्याणन्तु गुरुरेव साधयति । गुरुः शिष्यं सर्वतोभावेन शिक्षयति, सन्मार्गं दर्शयित्वा तमनुसर्तुं प्रेरयति च । गुरुर्न केवलं पुस्तकस्थान् पाठान् पाठयति अपि तु शारीरिकीं नैतिकीं व्यावहारिकीं बौद्धिकीं शिक्षां च प्रददाति । स सदाचारस्य, संयमस्य, विनयस्य, विवेकस्य, यमस्य, नियमस्य, दयायाः, दाक्षिण्यस्य, शीलस्य, सद्व्यवहारस्य चोपदेशं करोति । गुरुरज्ञानान्धकारं दूरीकृत्य ज्ञानरूपेण दिव्यप्रकाशेन शिष्यमालोकयति । गुरुशब्दस्य विश्लेषणं गुरुगीतायां कृतमुपलभ्यते -

**गुकारश्चान्धकारस्तु रुकारस्तन्निरोधकः ।**

**अन्धकारविनाशित्वाद् गुरुरित्यभिधीयते ॥**



गुरुः शिष्यस्य पशुभावमपनीय तं वस्तुतो मानवं कल्पयति। गुरुरुपदेशामृतं पाययित्वा मृत्युभयाद् मोचयति। कुमार्गात् सन्मार्गे प्रवर्तयति। वस्तुतोऽपारे संसारसागरे निमज्जताम्, उन्मज्जताञ्च जनानां समुत्तारे निपुणो नाविको गुरुरेव वर्तते। गुरुरेव अन्धकारमय्यां भवाटव्यामितस्ततो भ्रमतां भ्रान्तानां पथश्च्युतानां पथिकानां मार्गदर्शको महादीपोऽस्ति। अनेनैव कारणेन शास्त्रेषु गुरुसेवाया गुरुभक्तेर्गुरुपूजायाश्च महन्माहात्म्यं वर्णितं विद्यते। उक्तञ्च महाभारते -

**शरीरमेव सृजतः पिता माता च भारत।**
**आचार्यशिष्टा या जातिः सा दिव्या साऽजराऽमरा॥**

प्रसन्ने गुरौ शिष्यस्य सर्वतोमुखी प्रतिभा जायते, बुद्धेर्विकासो भवति, विद्या सफलतां गच्छति, सर्वत्र यशः प्रसरति, सर्वविधं च मङ्गलं जायते।

किं कर्तव्यं किं च न कर्तव्यम्, केन पथा चलितव्यम्, केन च न चलितव्यम्, कुत्र गन्तव्यम्, कुत्र च न गन्तव्यम्, कस्य सङ्गतिः कर्तव्या कस्य च न कर्तव्या इत्यादिकं सर्वमेव गुरुः शिष्यं शिक्षयति। विविधविद्याशिक्षणेन सदुपदेशप्रदानेन सततसंरक्षणेन पुत्रवत् पालनेन सन्मार्गप्रदर्शनेन असन्मार्गनिवर्तनेन च यथा गुरुः शिष्यस्य कल्याणं साधयति, तथान्यः कोऽपि कर्तुं न पारयति। यथा जगतः प्रकाशकः सूर्यनारायणः तथैव बुद्धिदानेन शिष्यस्य प्रकाशको गुरुरस्ति। उक्तञ्च पद्मपुराणे -

**सर्वेषामेव लोकानां यथा सूर्यः प्रकाशकः।**
**गुरुः प्रकाशकस्तद्वच्छिष्याणां बुद्धिदानतः॥**

गुरुः सनातनसंस्कृतेस्मूलस्तम्भो विद्यते। स विद्यादाता जीवनमार्गस्य प्रदर्शकश्चास्ति। गुरुः शिष्याणां सद्गुणानां संस्कारकः, आत्मज्ञानस्य उद्घाटकश्च वर्तते। गुरुर्विद्यामेव न ददाति किन्तु तस्याः सारतत्त्वमुपयोगशक्तिं च शिष्ये प्रतिष्ठापयति। गुरुः शिष्यस्य बुद्धौ शुद्धताम्, हृदि विनयम्, आचरणे नीतिवत्त्वं चोद्भावयति। स उत्साहं वर्धयित्वा शिष्यस्यान्तःशक्तिं जागरयति। शिष्यस्याध्यात्मिकोन्नयने गुरोर्मार्गदर्शनमपरिहार्यं भवति। अतो गुरुर्ब्रह्मविष्णुमहेशरूपेण परब्रह्मरूपेण च पूज्यते। यथा चोक्तं गर्गसंहितायाम् -

**गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः।**
**गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः॥**

अनेन गुरोर्दिव्यं महत्त्वं प्रतिपाद्यते। गुरुर्ज्ञानस्य जीवनसन्दर्भेषु समुपयोगविधिं च शिक्षयति। शास्त्रेषु ब्रह्मज्ञानस्य प्राप्तये गुरोरनिवार्यता प्रतिपादिता विद्यते।

मानवजीवने गुरोर्महत्त्वं पदे पदेऽनुभूयते। गुरोः सान्निध्यं विना मानवो मानवो भवितुं न शक्नोति। शास्त्रेषु गुरुः परब्रह्मरूपेण वर्णितो वर्तते। ब्रह्मवैवर्तपुराणं गुरुमीश्वररूपेण प्रस्तौति -

**मन्त्रदस्तन्त्रदश्चैव सुराणाञ्च चतुर्गुणः ।**

**नारायणश्च भगवान् गुरुः प्रत्यक्ष ईश्वरः ॥**


गुरोरनुसरणेनैव मानवः संसारसागरादुद्धर्तुं प्रभवति । गुरुकृपां विना मनुष्यस्तत्त्वज्ञानं प्राप्तुं न पारयति ।

भगवान् श्रीकृष्णोऽपि ज्ञानार्जनाय सान्दीपनिं गुरुं स्वीकृतवान् । चतुःषष्टिर्दिनानि यावदुज्जयिन्यां गुरुकुले स्थित्वा श्रीकृष्णो विद्याध्ययनमकरोत् । श्रीकृष्णो लोकान् शिक्षयितुं गुरोर्महत्त्वं प्रदर्शयितुमपि सामान्यमानववद् गुरोः सेवामकरोत् । विद्याध्ययनानन्तरं गुरवे दक्षिणा दातव्या भवतीत्यपि लोकानशिक्षयत् । स मृतं गुरुपुत्रमानीय दक्षिणारूपेण गुरवे समार्पयत् ।

अस्माभिः सर्वदैव गुरोर्भक्तिः सेवा पूजा च कर्तव्या । तेषामादेशाः पालनीयाः । ते यथा वर्तेरँस्तथैव वर्तितव्यम्, यथा चालयेयुस्तथैव चलेयुः, यथा वाज्ञापयेयुस्तथैव विधातव्यम् । सर्वदा तेषां सेवायां सत्कारे च सावधानैर्भवितव्यम् ।

न कदाचिद् गुरुसन्निधौ उच्चैर्हसितव्यम् । न च पादौ प्रसार्य पुरस्तात् स्थातव्यम् । न हि तत्र चञ्चलता प्रकटनीया । न चोद्दण्डता न च विवादः कर्तव्यः । नासत्यं वक्तव्यम् । नापलापो विधेयः । नाविनयो दर्शनीयः । न ह्यभद्रा वाचः समुच्चारणीयाः । न च तत्समक्षं कलहः कोलाहलो वा विधेयः । न च स्वप्नेऽपि गुरुषु ईर्ष्या द्वेषो मात्सर्यं वा कदाचिद् विदधीत । शिष्याणामिमे एवाचारा इमे एव च व्यवहाराः प्रशंसनीया भवन्ति । एतादृशैरेवाचारैरीदृशैरेव व्यवहारैर्गुरवः शिष्येषु प्रसीदन्ति, दयां कुर्वन्ति, अनुरक्ता भवन्ति, सर्वं वेदितव्यं वेदयन्ति, अखिलं चोपदेष्टव्यमुपदिशन्ति ।

गुरुगतां विद्यां प्राप्तुं गुरुसेवा एवोपाय इत्युक्तं वर्तते-



**यथा खनन् खनित्रेण नरो वार्यधिगच्छति ।**
**तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥**

अतो ये छात्रा आत्मनः कल्याणमिच्छन्ति, यशः समीहन्ते, सफलतामभिलषन्ति, विशिष्टञ्च वैदुष्यं कामयन्ते, तैः सदैव गुरुभक्तिः कर्तव्या । विनयेन, सेवया, श्रद्धया, सत्कारेणादर्शपालनेन, पितृवत्पूजनेन, उपचारेण च सर्वदैव गुरवः प्रसादनीयाः ।

### शब्दार्थाः

| | | |
|---|---|---|
| दाक्षिण्यम् | = | अनुकूलता |
| निमज्जनम् | = | जले अवगाहनम् |
| उन्मज्जनम् | = | निमग्नाज्जलाद् बहिर्निष्क्रमणम् । |
| मात्सर्यम् | = | ईष्या |

## अभ्यासः

### १. अतिसङ्क्षिप्तोत्तरं लिखत

(क) गुरुः किं दूरीकरोति ?

(ख) गुरुः किं पाययित्वा मृत्युभयाद् रक्षति ?

(ग) शिष्याणां सर्वतोमुखी प्रतिभा कथं जायते ?

(घ) कः सूर्य इव प्रकाशकः ?

(ङ) मानवजीवने पदे पदे किमनुभूयते ?

(च) कुत उद्धर्तुं गुरुर्नौका इव ?

### २. सङ्क्षिप्तोत्तरं लिखत

(क) गुरुसन्निधौ किं किं नाचरणीयम् ?

(ख) यथा खनन् खनित्रेणेति श्लोकस्य तात्पर्यं किम् ?

(ग) कीदृशेन व्यवहारेण गुरवः प्रसन्ना भवन्ति ?

(घ) कर्तव्यपालनस्यावश्यकता किमर्थं भवति ?

(ङ) गुरोः समीपे केषु विषयेषु सावधानैर्वर्तितव्यम् ?

(च) गुरोर्महत्त्वमधिकृत्य पञ्च वाक्यानि रचयत ।

## ३. अधो लिखितमनुच्छेदं पठित्वा प्रश्नानामुत्तरं लिखत



श्रीकृष्णस्य शिक्षा सान्दीपनिमुनेराश्रमे सम्पन्ना । तत्र श्रीकृष्णो विशुद्धभावेन भूमिशायी आसीत् । स साधारणं वस्त्रं धारयति स्म । वयस्यैः सह सामूहिकरूपेण पठति स्म । यद्यपि तेन प्रतिदिनमेकं शास्त्रमधिगतं तथापि तस्य मनस्यहं सर्वज्ञ इति भावो नासीत् । तस्य चरित्रे दिव्यशक्तिरपि विनयेन प्रकाशिता भवति स्म । तस्य शिष्यभावोऽद्वितीय आसीत् । तेन गुरोराहारव्यवस्था, गुरुगृहकार्यसम्पादनम्, समिदानयनादिकं सर्वं कार्यं सम्पाद्यते स्म । तस्य गुरौ ईश्वरभावः, गुरुदारेषु मातृभावः, गुरुपुत्रादिषु सतीर्थ्येषु च भ्रातृभाव आसीत् ।

श्रीकृष्णश्चतुःषष्टिर्दिनानि यावद् गुरुकुले स्थित्वा विद्याध्ययनं सम्पाद्य गृहप्रत्यावर्तनसमये गुरुदक्षिणारूपेण मया किं दातव्यमिति अपृच्छत् । भार्यया सह सम्मन्त्र्य गुरुरुवाच- मम मृतः पुत्रः

पुनरागच्छतु । श्रीकृष्णः 'अस्तु' इत्युदतरत् । स समुद्रं प्राविशत् । समुद्रानुरोधेन पञ्चजननामकं शङ्खासुरमहनत् । तत्र गुरुपुत्रमप्राप्य पाञ्चजन्यशङ्खं वादयन् यमलोकं प्राप्नोत् । श्रीकृष्णं दृष्ट्वा यमः सविनयं गुरुपुत्रं प्रायच्छत् । श्रीकृष्णश्च गुरुपुत्रमानीय गुरवे समार्पयत् ।

**प्रश्नाः**

(क) श्रीकृष्णः कीदृशः शिष्य आसीत् ?

(ख) गुरुकुले श्रीकृष्णस्य दिनचर्या कीदृशी आसीत् ?

(ग) गुरोर्मृतपुत्रमानेतुं सर्वतः प्रथमं श्रीकृष्णः कुत्र गतवान् ?

(घ) कतिदिनपर्यन्तं श्रीकृष्णो गुरुकुले स्थितः ?

(ङ) गुरुदक्षिणारूपेण भगवता श्रीकृष्णेन गुरवे किं प्रदत्तम् ?

(च) भगवतः श्रीकृष्णस्य शङ्खस्य नाम किम् ?

(छ) अस्याः कथायाः कः सन्देशः ?

**४. अधो लिखितानि पदानि प्रयुज्य एकैकं वाक्यं रचयत**

गत्वा, कथम्, तु, तथापि, अतीव, एव

**५. अधो निर्दिष्टयोः श्लोकयोर्भावार्थं लिखत**

(क) मृगा मृगैः सङ्गमनुव्रजन्ति गावश्च गोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः समानशीलव्यसनेषु सख्यम् ॥

(ख) निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ॥

**६. शिष्याणां कर्तव्यं किम् ? प्रतिपादयत ।**

**७. शिष्यस्य जीवने गुरोर्भूमिकां विवेचयत ।**

**८. ब्रह्मवैवर्तपुराणस्य पाठे प्रयुक्तस्य गुरोर्महत्त्वप्रतिपादकस्य श्लोकस्यार्थं लिखत ।**

**९. गुरुसेवया प्राप्तव्यान् लाभान् प्रदर्शयत ।**

## परियोजनाकार्यम्

**शास्त्रेषु अन्विष्य गुरुजनान् स्पृष्ट्वा वा अधः प्रदत्तेषु कस्यचनैकस्य गुरोर्जीवनचरितं विलिख्य मित्रैः सह विमृशत ।**

(क) द्रोणाचार्यः

(ख) सान्दीपनिः

(ग) योगी नरहरिनाथः

(घ) बालगुरुः षडानन्दः

# एकलव्यस्य साधना

मानवजीवने गुरोर्भूमिका पदे पदे वर्तते । गुरुं विना मनुष्यः सन्मार्गे चलितुं न पारयति । आधुनिककालेऽपि गुरोर्महत्त्वं न न्यूनम् । यद्यपि इदानीं शिक्षानीतिः परिवर्तिता तथापि समाजस्य निर्माणे गुरोः स्थानं दृश्यते । गुरूणामनुग्रहेणैव वैज्ञानिकविकासः, कलासाहित्यसमृद्धिः, सामाजिकनैतिकोन्नतिश्च सम्भवति । गुरोर्महत्त्वं केवलमाध्यात्मिकक्षेत्रे एव न, अपि तु लौकिकजीवनेऽप्यनिवार्यम् । पौराणिकसमये देवदानवचरितेऽपि गुरूणां महती भूमिका दृश्यते । यथा देवानां गुरुर्बृहस्पतिः, दानवानां गुरुः शुक्राचार्यः । देवा यदा यदा कष्टमनुभवन्ति स्म तदा तदा गुरोर्बृहस्पतेः शरणं गत्वा सुखमनुभवन्ति स्म । बृहस्पतिना बहुवारं देवाः सङ्कष्टान्मोचिताः । देवराज इन्द्रस्तु सर्वदा गुरोः शरणं प्राप्यैव कष्टान्मुक्तो भवति स्म । तथैव दानवा गुरुणा शुक्राचार्येण सह परामर्शं कृत्वैव देवैः सह युद्धार्थमुद्यता भवन्ति स्म । शुक्राचार्यः सकलविद्यापारङ्गत आसीत् । तपसा आशुतोषं भगवन्तं शङ्करं प्रसाद्य स मृतसञ्जीवनीविद्यामवाप ।

पौराणिकसमये गुरूणां समादरः सर्वत्रैव दृश्यते स्म । तस्मिन् काले छात्राः, गृहस्थाः, राजानश्च गुरुभक्ता भवन्ति स्म । आरुण्युपमन्युध्रुवप्रह्लादहनुमत्प्रभृतीनां गुरुभक्तानां प्रेरणास्पदा गुरुभक्तिकथाः पुराणेषु प्राप्यन्ते । शिष्या गुरुं पितुरप्यधिकं मत्वा समादरं कुर्वन्ति स्म । गुरवोऽपि शिष्याणां पुत्रवच्छिक्षणं पालनं च विदधति स्म । गुरोर्महत्त्वं प्रतिपादयच्छास्त्रं कथयति-

**अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।**

**चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥**

अज्ञानरूपेण तिमिरेण अन्धीकृतस्य मम नेत्रे ज्ञानरूपेणाञ्जनशलाकया गुरुरेव उन्मीलितवान् । येन गुरुणा मह्यं ज्ञानदृष्टिः प्रदत्ता तं श्रीगुरुमहं नमस्करोमि । गुरुरज्ञानावृतचेतसः शिष्यस्य ज्ञानचक्षुरुन्मीलयति, विवेकदृष्टिं चोद्घाटयति । अतो गुरुः सदा प्रणम्यः ।

प्राचीनकाले बहवो गुरुभक्ता बभूवुः । तेषामुपाख्यानं श्रुत्वा पठित्वा च गुरुशिष्यपरम्परायां महती श्रद्धा समुत्पद्यते । श्रीरामः स्वयमेव शिष्यो भूत्वा वसिष्ठविश्वामित्रागस्त्यादिभ्यः शिक्षां जग्राह । आरुणिर्निजगुरोः

क्षेत्ररक्षणाय स्वशरीरमेव बन्धरूपमकरोत्। एकलव्यो गुरोर्मृत्तिकामयीं मूर्तिं निर्माय तां पुरतः शस्त्राभ्यासं कृत्वा शस्त्रविद्यायां कुशलतामवाप। अस्यैव गुरुभक्तिपरायणस्य एकलव्यस्य प्रेरणास्पदा कथाऽत्र प्रस्तूयते-

पुरा भारते भरतवंशस्य राज्ये हस्तिनापुरं नाम नगरमासीत्। तत्र पाण्डवाः कौरवाश्च राजकुमारा द्रोणाचार्यस्याधीने स्थित्वा धनुर्विद्याया अध्ययनं कुर्वन्ति स्म। तदानीं हेमवतीनदीतीरे हिरण्यधनुर्नामा निषादराज आसीत्। तस्य परमविनीतः सुत एकलव्योऽभवत्। धनुर्वेदे सर्वोत्तमः कथं भवेयमिति तस्य एक एव महाभिलाष आसीत्। तस्मिन् समये शस्त्रविद्यायां द्रोणाचार्यस्य महतीं प्रतिष्ठां श्रुत्वा एकलव्योऽपि धनुर्विद्यां प्राप्तुं द्रोणाचार्यमभ्याजगाम। द्रोणाचार्यमुपसृत्य स सविनयं निजगाद, "भगवन्! मां शिष्यमुपकल्पय, धनुर्वेदं च शिक्षय" इति। द्रोणाचार्योऽचिन्तयत्- 'क्षत्रियबालकाः शस्त्रविद्यां प्राप्य देशस्य रक्षणं कुर्वन्ति, देशरक्षार्थं स्वप्राणानपि अर्पयन्ति, राजगुरुत्वान्नाहं राजपुत्रेतरान् विद्येच्छुकान् वनवासिनोऽध्यापयामि। अत एकलव्याय दत्ता शस्त्रविद्या दुरुपयोगाय भविष्यति' इति। एवं चिन्तयित्वा स एकलव्यं स्वशिष्यं न स्वीचकार।



एकलव्यो द्रोणाचार्यं शिरसा प्रणम्य पुनररण्यमनुप्राप्य द्रोणाचार्यस्य मृत्तिकामयीं मूर्तिं निर्मितवान्। आचार्यत्वेन तां मूर्तिमेव श्रद्धया पूजयन् परया गुरुभक्त्या महता परिश्रमेण च स धनुर्विद्याभ्यासमकरोत्। गच्छता कालेन स धनुर्विद्याकुशलोऽभवत्।

एकदा द्रोणेन आज्ञप्तास्तस्य शिष्याः कौरवाः पाण्डवाश्च मृगयायै वनं गताः। कश्चित् पुरुषोऽपि मृगयादर्शनोत्कण्ठया श्वानमादाय राजकुमारान् अनुजगाम। स श्वा इतस्ततश्चरन् कृष्णं मलिनाङ्गं जटाधरमेकलव्यं दृष्टवान्। तं दृष्ट्वा स दूरत एव भषन् तस्थौ। भषतस्तस्य शुनो मुखे एकलव्यो

युगपदेव सप्त शरान् मुमोच । सप्तभिः शरैर्विद्धमुखः स श्वा तेन पुरुषेण पाण्डवानां पुरस्तादानीतः । तथाविद्धं श्वानं दृष्ट्वा सर्वेऽपि विस्मयमागताः, ते धनुर्धरस्य शब्दवेधनैपुण्यं प्रशशंसुः । तमदृष्टपूर्वं धनुर्धरं द्रष्टुं प्रस्थितास्ते धनुर्विद्याभ्यासरतमेकलव्यमपश्यन् । विकृतदर्शनं तमजानन्तश्चापृच्छन्- 'को भवान् ?' इति । एकलव्य उवाच- "निषादाधिपतेर्हिरण्यधनुषः सुत एकलव्योऽहं धनुर्वेदे कृतश्रमो द्रोणशिष्यः ।"

वनात् प्रत्यागत्य पाण्डवाः सर्वमेकलव्यवृत्तं द्रोणाय निवेदितवन्तः । अर्जुनस्तु द्रोणमेकान्ते समासाद्य प्रणयादब्रवीत्, "अहं भवता पूर्वमुक्तो यद् मद्विशिष्टोऽन्यः कोऽपि भवतः शिष्यो न भविष्यति । तर्हि भवतः शिष्य एकलव्यो मद्विशिष्टो लोकविशिष्टश्च धनुर्धरः कथं सञ्जातः ?" इति । द्रोणो मुहूर्तं चिन्तयित्वा अर्जुनमादाय एकलव्यसमीपं गतवान्, तत्र च जटिलं, चीरवाससं, धनुष्पाणिमनिशं धनुर्विद्याभ्यासरतमेकलव्यं ददर्श । एकलव्यस्तु द्रोणमायान्तमवलोक्य, प्रत्युद्गम्य, शिरसा प्रणम्य, आत्मानं शिष्यं निवेद्य, द्रोणस्याग्रतः प्रणामाञ्जलिस्तस्थौ । द्रोणाचार्यस्तु तस्याद्वितीयं कौशलं गुरुभक्तिञ्च दृष्ट्वा परमविस्मयमवाप ।

द्रोणाचार्य एकलव्यमुवाच, "यदि त्वं मे शिष्योऽसि तर्हि गुरुदक्षिणा दातव्या ।" एकलव्योऽवदत्, "आचार्य ! न हि किञ्चिद् गुरवेऽदेयं ममास्ति । तद् भवानेवाज्ञापयतु किं प्रयच्छानि ?"

द्रोणो जगाद,

**गुरुदक्षिणया वत्स ! दातव्यं यत् त्वया मम ।**
**अङ्गुष्ठं दक्षिणं देहि धर्मो हि गुरुमुद्धर ॥**

त्वं यदि मे शिष्यस्तर्हि दक्षिणकराङ्गुष्ठो गुरुदक्षिणारूपेण दीयतामित्यर्थः ।

गुरोर्द्रोणाचार्यस्य दारुणं वचः श्रुत्वाऽपि गुरुभक्त एकलव्य आत्मनः प्रतिज्ञां रक्षन् झटित्येव स्वं दक्षिणं कराङ्गुष्ठं कर्तित्वा गुरवे द्रोणाचार्याय निवेदितवान् ।

**श्रुत्वैव गुरुशुश्रूषुः प्रहृष्टो नातिदुःखितः ।**
**आचिच्छेद स्वयं वीर्यादङ्गुष्ठं गुरुदर्शनात् ॥**

गुरुवचनं श्रुत्वा एकलव्योऽविलम्बेन स्वयमेव अङ्गुष्ठं छित्त्वा समर्पितवानिति भावः ।

एकलव्यस्य गुरुभक्तिः, श्रद्धा, समर्पणभावना चाद्यापि आदर्शरूपेण कीर्त्यते । अतो ये विद्यार्थिन आत्मनः कल्याणमिच्छन्ति, यशः समीहन्ते, साफल्यमभिलषन्ति, विशिष्टञ्च वैदुष्यं कामयन्ते, तैः सदैव गुरुभक्तिः कर्तव्या । विनयेन, सेवया, श्रद्धया, सत्कारेण, आदेशपालनेन, पितृवत्पूजनेन, उपचारेण च सर्वदैव गुरवः प्रसादनीयाः । अत एवोक्तम्-

गुरुर्गरीयान् पितृतो मातृतश्चेति मे मतिः । इति ।

## शब्दार्थाः

| | | |
|---|---|---|
| ज्ञानाञ्जनशलाका | = | ज्ञानलिप्ततीक्ष्णबुद्धिः |
| अभ्याजगाम | = | सम्प्राप्तः |
| निषादः | = | गिरिकाननगोचरो जातिविशेषः |
| लुण्ठन्ति | = | अपघ्नन्ति |
| भषन् | = | बुक्कन् |
| समासाद्य | = | सम्प्राप्य |
| प्रत्युद्गम्य | = | प्रत्युत्थाय |
| छित्त्वा | = | कर्तित्वा |
| गरीयान् | = | अयमनयोरतिशयेन गुरुः |

## अभ्यासः

१. **अतिसङ्क्षिप्तरूपेण उत्तरयत**

(क) देवानां गुरोर्नाम किम् ?

(ख) के गुरुणा बहुवारं कष्टान्मोचिताः ?

(ग) देवराजः कस्य परामर्शेन सङ्कष्टान्मुक्तो भवति स्म ?

(घ) हस्तिनापुरं नाम नगरं कुत्र आसीत् ?

(ङ) पाण्डवाः कस्माद् धनुर्विद्याध्ययनं कुर्वन्ति स्म ?

(च) हिरण्यधनुर्नाम निषादराजः कुत्र निवसति स्म ?

(छ) हिरण्यधनुषः पुत्रस्य नाम किमासीत् ?

(ज) एकलव्यो महता परिश्रमेण किं करोति स्म ?

(झ) अविरतपरिश्रमेण एकलव्यः कीदृशो धनुर्धरो जातः ?

(ञ) गुरुदक्षिणारूपेण एकलव्येन गुरवे किं दत्तम् ?

(ट) बृहस्पतिशुक्राचार्ययोः प्रसिद्धाः शिष्याः के ?

(छ) कौरवाः पाण्डवाश्च कस्मै प्रयोजनाय वनं गतवन्तः ?

(ज) दानवगुरुणा शुक्राचार्येण कथं मृतसञ्जीवनी प्राप्ता ?

## २. सङ्क्षेपेणोत्तराणि लिखत

(क) प्राचीनकाले गुरुभक्त्या प्रसिद्धाः शिष्याः के ?

(ख) गुरुर्द्रोणः किं विचार्य एकलव्यं शिष्यं न स्वीचकार ?

(ग) एकलव्येन कथं धनुर्विद्याभ्यासः कृतः ?

(घ) राजपुत्रैरदृष्टपूर्वघटना का आसीत् ?

(ङ) एकलव्यः स्वपरिचयं कथमदात् ?

(च) द्रोणाचार्यः किमर्थं विस्मयं गतः ?

## ३. अधोनिर्दिष्टौ श्लोकौ सलयं वाचयत

(क) आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ॥
लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद ! त्वं रक्ष रक्षाधुना ॥

(ख) अत्यम्बुपानाद्विषमाशनाच्च दिवाशयाज्जागरणाच्च रात्रौ ।
संरोधनान्मूत्रपुरीषयोश्च षड्भिः प्रकारैः प्रभवन्ति रोगाः ॥

## ४. शिक्षकसाहाय्येनाधो लिखितपद्यस्य भावार्थं लिखत ।

यस्याः प्रभावमखिलं न हि वेद धाता नो वा हरिर्न गिरिशो न हि चाप्यनन्तः ।
अंशांशका अपि च ते किमुतान्यदेवास्तस्यै नमोऽस्तु सततं जगदम्बिकायै ॥

## ५. अधो लिखितमनुच्छेदं पठित्वा प्रश्नानुत्तरयत

सनातनपरम्परायामायोदधौम्यस्य त्रयः शिष्या विख्याताः– आरुणिः, उपमन्युः, वेदश्च । एतेषु आरुणिर्गुरुभक्त्या, आज्ञापालनस्य दृढतया, आत्मत्यागेन च विशेषकीर्तिमलभत ।

आरुणिर्बाल्यकाले एव पितुर्गृहं त्यक्त्वा शिक्षायै आयोदधौम्यस्याश्रमं प्राप्तवानासीत् । स गुरोः समादरपूर्वकं मनोयोगेन सर्वकार्येषु प्रवृत्तो भवति स्म । यद्यपि तस्य गुरुकुलजीवने शारीरिका मानसिकाश्चानेके क्लेशाः समभवन् तथापि स न कदापि क्लेशैः क्लान्तो बभूव । स नितरां श्रद्धयैव कार्यं करोति स्म ।

एकदा गुरुरारुणिमाज्ञापितवान्- "हे आरुणे ! कृषकस्य क्षेत्रं जलधारया पूर्यते, तस्मात् तत्र गत्वा बन्धं निर्माय जलबन्धनं कुरु" इति । गुरोराज्ञां पालयन्नारुणिस्तत्क्षणमेव ततो जगाम । आकाशाज्जलवृष्टिः सञ्जायमाना आसीत् । आर्द्रः सन् स क्षेत्रं प्राप । तत्र प्राप्तः स मेखलाभङ्गेन कुल्यातः क्षेत्रे यथातथं वहमानं जलं ददर्श । जलेन कृषकस्य धान्यपूर्णं क्षेत्रं विनश्यमानमासीत् । आरुणिर्यत्नपूर्वकं तृणादिकम्, पाषाणान्, मृत्तिकां च सञ्चित्य बन्धनिर्माणायासं चकार किन्तु जलस्य तीव्रवेगात् तस्य प्रयासो विफलतां गतः । स चिन्तितवान्- "गुरोराज्ञा तु पालनीयैव । जलं न रुध्यते । किं कर्तुं शक्यम् ?" क्षणं विचार्य स स्यन्दमानं जलं रोद्धुं स्वशरीरमेव जलप्रवाहदिशि स्थापयित्वा कुल्याया मेखलायां संयोज्य प्रवहमाणं जलं निरुरोध । दिवाकालो व्यतीतः, रात्रिः सम्प्राप्ता, शैत्यं च क्रमशो वृद्धिमगच्छत् किन्तु आरुणिर्विचलितो न बभूव । स कुल्यायां शयान एवासीत् ।

रात्रावपि आरुणिराश्रमं न प्रत्याजगाम । तेन गुरुरायोदधौम्यश्चिन्तितो बभूव । सोऽन्यैः शिष्यैः सह तमन्वेष्टुं निर्गतः । जलेन वारं वारं स्खलन्तस्ते क्षेत्रं प्रापुः । तमसा आरुणिमनवलोकयन्तस्ते उच्चस्वरेण तं समबोधयन्- "आरुणे ! कुत्रासि ?" इति । तां ध्वनिं श्रुतवानारुणिर्मन्दस्वरेण निजगाद- "गुरो ! अत्रास्मि जले" इति । आरुणेर्ध्वनिं श्रुत्वा ध्वनिमनुसृत्य गतवन्तस्ते आरुणिमुपाजग्मुः ।

आरुणिं जलान्तःशरीरं शीतात् पीडितं च दृष्ट्वा करुणाऽऽर्द्रो धौम्यस्तमुत्थापयामास । गुरुभक्तिपरायणमारुणिं दृष्ट्वा सन्तुष्टः सन् स उद्घोषितवान्- "अद्यप्रभृति त्वमारुणिर्न किन्तु उद्दालकनाम्ना ख्यातो भविष्यसि, यतो हि त्वया गुरोराज्ञां पालयितुं स्वदेहस्यापि मोहो न कृतः" इति । धौम्यस्याशीर्वादेन वेदान्तदर्शने सिद्धिं प्राप्य स उपनिषदामुपदेशको बभूव ।

**प्रश्नाः**

(क) आयोदधौम्यस्य कति शिष्या विख्याताः ? के च ते ?

(ख) आरुणिर्बाल्यकाले गृहं त्यक्त्वा कुत्र गतवान् ?

(ग) आरुणिः कथं कार्यं करोति स्म ?

(घ) गुरुः आरुणिं किमादिशत् ?

(च) आरुणिः कथं सेतुबन्धं कर्तुमारभत ?

(छ) आरुणेः प्रयासः किमर्थं विफलः ?

(ज) गुरोराज्ञां पालयितुं न कमप्यन्यमुपायं दृष्ट्वा आरुणिः किं कृतवान् ?

(झ) शिष्यमन्वेष्टुं धौम्यः कैः सह क्षेत्रं गतवान् ?

(ञ) धौम्यः सन्तुष्टः सन् किमुदघोषयत् ?

(ट) आरुणिकृताया गुरुभक्तेः कथासारः कः ?

## ६. अधोनिर्दिष्टं श्लोकं सस्वरं वाचयत

लक्ष्मीस्ते हृदि भारती च वदने मौलौ सदा केशवः,
चण्डी ते भुजदण्डयोर्गुणनिधे गेहे कुबेरस्थितिः ।
चित्तं नाथ तवास्तु धर्मसदने दानप्रसङ्गः करे,
सर्वास्ते विपदः प्रयान्तु विपिने त्वं दीर्घजीवी भव ॥

## ७. गुरोर्महत्त्वं प्रदर्श्य लघ्वनुच्छेदं लिखत ।

## ८. 'आधुनिकसमाजे छात्राणां मनोभावः' इति विषये निबन्धं लिखत ।

## ९. अनुच्छेदं पठित्वा प्रश्नानुत्तरयत

एकदा द्रोणाचार्यः शिक्षितसर्वास्त्रविद्यान् स्वशिष्यान् कौरवान् पाण्डवांश्च समानीय तेषां प्रहरणज्ञानस्य परीक्षां कर्तुमैच्छत् । स शिल्पिभिः कृत्रिमं भासं निर्माय वृक्षस्योपरि स्थापितवान् । स कुमारैरविज्ञातं तं भासं तेषां लक्ष्यभूतमकरोत् । तेनादिष्टाः सर्वेऽपि कुमाराः शीघ्रमेव स्वानि धनूंषि समादाय तत्रोपस्थिताः । द्रोणः सर्वानुवाच- "सर्वे यूयमेतं भासं समुद्दिश्य इषुं सन्धाय तिष्ठत । मया य आदिश्यते तेन भासस्यास्य शिर इषुणा छेत्तव्यम्" इति । सर्वेऽपि कुमारास्तदा भासमुद्दिश्य सन्धितेषवोऽतिष्ठन् । सर्वतः प्रथमं द्रोणाचार्यो युधिष्ठिरस्यान्तिकं गत्वा तमकथयत्, "वत्स, त्वया भासस्य शिरोभागमुद्दिश्य बाणः सन्धातव्यः । यदा चाहं बाणं मोक्तुमादिशामि तदैव मोक्तव्यः" इति । यदा युधिष्ठिरो लक्ष्यमुद्दिश्य बाणं सन्धाय अतिष्ठत्, तदा तं द्रोणः पृष्टवान्,"किं त्वमिदानीं

भासं पश्यसि ?" युधिष्ठिर आह," आम्, अहं भासं पश्यामि।" द्रोणः पुनराह, "किं वृक्षमपि पश्यसि ?" युधिष्ठिर आह, "आम्, वृक्षमपि पश्यामि।" द्रोणः पुनरपृच्छत्, "किं भ्रातॄन् मां चापि पश्यसि ?" युधिष्ठिर आह, "आम् सर्वानपि पश्यामि।" तदा द्रोणस्तमकथयत्," तर्हि प्रतिसंहर बाणम्। न त्वया लक्ष्यमेतद् वेद्धुं शक्यम्।"

अनेनैव क्रमेण भीमादीन् पाण्डवान्, दुर्योधनादीन् धार्तराष्ट्रान्, अन्यदेशजान् राजकुमारांँश्च द्रोणः पर्यपृच्छत्। सर्वैरपि युधिष्ठिरेणेव उत्तराणि दत्तानि। द्रोणाचार्यः सर्वानपि अयोग्यान् ज्ञात्वा अर्जुनस्यान्तिकं गत्वा तमपि सन्धितेषुं विधाय पर्यपृच्छत्, "किं त्वमिदानीं मां वृक्षं च पश्यसि ?" अर्जुनः प्राह, "न, अहं वृक्षं भवन्तं च न पश्यामि।" द्रोणः पुनः पृष्टवान्, "किं त्वं भासं पश्यसि ?" अर्जुनः प्राह, "अहं केवलं भासस्य शिरः पश्यामि, तदतिरिक्तं न किमपि पश्यामि।" अर्जुनस्योत्तरं श्रुत्वा द्रोणोऽतीव प्रसन्नो भूत्वा तं लक्ष्यवेधाय आदिदेश। तेनादिष्टोऽर्जुनः सत्वरमेव बाणं मुमोच। तेन बाणेन छिन्नं भासस्य शिरो भूमौ निपपात। अर्जुनस्य शस्त्रविद्यानैपुण्येन प्रीतो द्रोणस्तं भूयः प्रशशंस।

**प्रश्नाः**

(क) गुरुद्रोणाचार्यः किमैच्छत् ?

(ख) द्रोणाचार्यः शिष्यान् किमादिशत् ?

(ग) द्रोणाचार्यः युधिष्ठिरं किं पृष्टवान् ?

(घ) केन भासस्य शिरो भूमौ निपातितम् ?

(ङ) द्रोणचार्यस्यार्जुनप्रशंसायां को हेतुः ?

**१०. गुरोर्महत्त्वविषये गुरुगीतायामुक्तमधो निर्दिष्टं श्लोकत्रयमाधृत्य गुरोर्महिमप्रकाशनेन एकमनुच्छेदं रचयत**

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन।<br>
लब्ध्वा कुलगुरुं सम्यग्गुरुमेव समाश्रयेत्॥<br>
गुकारं च गुणातीतं रुकारं रूपवर्जितम्।<br>
गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः॥<br>
यज्ञिनोऽपि न मुक्ताः स्युर्न मुक्ता योगिनस्तथा।<br>
तापसा अपि नो मुक्ता गुरुतत्त्वात्पराङ्मुखाः॥

## ११. सन्धिविच्छेदं कुरुत

एकलव्योऽभवत्, मलिनाङ्गम्, भषतस्तस्य, शुनो मुखे, पुरस्तादानीतः, पूर्वमुक्तः ।

## १२. अस्य श्लोकस्य भावार्थं लिखत

ये बालभावान्न पठन्ति विद्यां ये यौवनस्था ह्यधनात्मदाराः ।

ते शोचनीया इह जीवलोके मनुष्यरूपेण मृगाश्चरन्ति ॥

## १३. एकलव्यस्य गुरुभक्तिविषये मित्राणां धारणा कीदृशी अस्ति ? मित्राणि स्पृष्ट्वा त्रीणि मतानि प्रस्तुत ।

## *परियोजनाकार्यम्*

**गुरुपूर्णिमायां गुरुसम्मानार्थमायोज्यमानस्य कार्यक्रमस्य निदर्शनस्वरूपं निर्माय कक्षायां प्रस्तुत ।**

# पितृभक्तिः

अस्माकं पौरस्त्यपरम्परायां मातापितरौ प्रत्यक्षदेवतारूपेण प्रतिष्ठितौ सम्मानितौ च वर्तेते। पौरस्त्यवाङ्मयस्य मूलं वेदा एव। तेषु वेदेषु मातापित्रोः स्थानमतीव महत्त्वपूर्णमत्युन्नतञ्च प्रतिपादितं विलोक्यते।



मातृदेवो भव, पितृदेवो भव इत्यादिवैदिकवाक्यैर्मातुः पितुश्च महत्त्वं प्रकटितं विद्यते। अतो मातापित्रोः सदा सेवा कर्तव्या, तयोराज्ञापालनं च नितरां विधातव्यम्। मातुः पितुश्च सेवा चित्तशुद्धेः साधनतामावहति। शास्त्राणि जीवानामहङ्कारत्यागाय प्रयतन्ते, न तु सामाजिककर्तव्यत्यागाय। तेन मातापित्रोः सेवाया विरोधं कदापि कोऽपि नानुमनुते।

आत्मा वै जायते पुत्र इति श्रुतिवाक्यं पुत्रस्य पितुर्द्वितीयरूपतां प्रतिपादयति। एतदनुसारेण पिता एव पुत्ररूपेण जनिं लभते। तथा -

**पूर्वे वयसि सम्प्राप्ते पिता पुत्र इति स्मृतः ।**

**उत्तरे च सुतस्तातः पालनान्न तु पूजनात् ॥**

पूर्वे वयसि बाल्यावस्थायां स्वयमेव जनिं लब्ध्वा तातः पुत्रो भवति । उत्तरे वयसि वृद्धावस्थायां च पितुः पालनात् प्रसूतोऽपि पुत्रस्तातो भवति ।

यतो हि -

**पिता धर्मः पिता स्वर्गः पिता हि परमं तपः ।**

**पितरि प्रीतिमापन्ने प्रीयन्ते सर्वदेवताः ॥**

पिता एव धर्मोऽस्ति, पिता एव स्वर्गो विद्यते, परमं तपश्च पिता एव वर्तते । पितरि सन्तुष्टे सति तस्य पुत्रस्य कृते सर्वे देवाः प्रीयन्ते ।

पुत्रः पितरमिष्टदेवतुल्यं मत्वा पूजयेत् । पुत्रवच्च तस्मिन् स्नेहं कुर्यात् । मनसापि तद्वचनं कदापि न लङ्घयेत्, अन्यथा न कुर्यादिति शास्त्रस्य निर्देशो वर्तते । उक्तं च-

**देववत् पूजयेत्तातं स्नेहं कुर्याच्च पुत्रवत् ॥**

**न लङ्घयेद् वचस्तस्य मनसापि कदाचन ॥**

मानवो देवानामृषीणां पितॄणां च ऋणं समूह्यैव धरायामवतरति । तत्र देवर्णान्मुक्तये जनो विविधयज्ञानुष्ठानादीनि अनुतिष्ठति, प्रकृतिसंरक्षणं करोति, दानादिकं विदधाति, सत्कर्म आचरति, परोपकारं सम्पादयति, सद्धर्मं च परिपालयति । ऋष्यृणमपाकर्तुं च जनः पुराणवेदोपनिषदादिधार्मिकग्रन्थानामध्ययनम्, गुरोर्वचनानामनुसरणम्, समाजस्य हितायावदानम्, सद्विद्याया ज्ञानस्य च प्रचारणम्, सत्कर्मधर्माचरणं च विदधाति । पितृणाद् विमुक्तये च जनः, मातापित्रोः सेवाम्, सन्तानोत्पादनम्, क्षयाहादितिथिश्राद्धविधानम्, पितृभ्यः पिण्डदानादिकम्, तिलजलादिभिः पितृतर्पणम्, विविधदेयवस्तुदानम्, सदाचारपालनादिकं च समाचरति ।

वेदस्मृतिपुराणादिषु मातुः पितुश्च सेवा परमधर्मत्वेन निर्दिष्टा वर्तते । मातृपित्रोर्महत्त्वं धर्मशास्त्रदृष्ट्या, समाजदृष्ट्या, मनोवैज्ञानिकदृष्ट्या, नैतिकदृष्ट्या च विशिष्टमेवास्ति । पितुर्गौरवमुपाध्यायात्, आचार्याच्चाधिकं मन्यते । मातुर्महत्त्वं तु पितुरप्यधिकं भवति । अत एवोच्यते-

**उपाध्यायान्दशाचार्य आचार्याणां शतं पिता ।**

**सहस्रं तु पितॄन् माता गौरवेणातिरिच्यते** ॥ इति ।

मातुर्महत्त्वं तु 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति सूक्तिरपि सम्पोषयति ।

मातापितरौ जीवनस्य प्रथमौ गुरू वर्तेते । तौ धर्मस्याद्योपदेष्टारौ संस्कारनिर्माणस्य मूलाधारौ च स्तः । परिवारः समाजस्य लघुतमं रूपमस्ति । तस्य परिवाररूपस्य समाजस्य प्रमुखौ पितरौ एव भवतः । परिवारे जातस्य बालकस्य भाषाचार-मूल्यबोध-सामाजिकव्यवहारादयो मातापित्रोरनुकरणेनैव पल्लविताः पुष्पिताः फलिताश्च भवन्ति । यस्मिन् समाजे मातापित्रोः सम्मानं लुप्यते तस्मिन् समाजे नीतेः, धर्मस्य, समाजस्य च क्षयः शीघ्रमेव जायते । अतः सामाजिकस्थिरतायै मातापित्रोः समादरस्यानिवार्यत्वं भवति ।

मातापितरावेव सन्ततीनां भावनात्मकविकासेऽत्यन्तमहत्त्वपूर्णौ भवतः । बाल्यकाले मातुः पितुश्च स्नेहाभावः मानसिकासन्तुलनस्य कारणं भवतीति मनोविज्ञानदृष्ट्यापि विचारयितुं शक्यते । विश्वासात्मसम्मान-सहानुभूत्यादयो गुणा मातुः पितुश्च दैनन्दिनव्यवहारतो बालमनस्युत्पद्यन्ते । अतो मातापितरावेव सन्ततीनां पोषकौ मानसिकसंरक्षकौ च भवतः । मातापित्रोः सेवा तौ प्रति कृतज्ञताज्ञापनस्याधारो वर्तते, यतो हि मातापितरौ सन्ततीनां जीवनाय स्वसुखं परित्यजतः ।

मातृपितृरूपदेवता जीवनस्य मूलभूताः, धर्मस्य नैतिकतायाश्चाधारभूमयः, संस्काराणां बीजभूताः, समाजस्थिरतायाः कारणरूपाश्च वर्तन्ते । अतस्तेषां जीवितदेवानां सम्मानं सेवाशुश्रूषादिकञ्च मानवजीवनस्य परमं भूषणमस्ति ।

**जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात् ।**

**गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥**

पौराणिकमान्यतानुसारेण मातुः पितुश्च जीवितावस्थायां सश्रद्धं सेवाशुश्रूषापुरःसरं तयोराज्ञायाः पालनेन, मृतावस्थायां क्षयाहादितिथिषु पर्याप्तभोजनादिदानेन गयायां ब्रह्मकपालादितीर्थेषु च श्राद्धपिण्डदानादिना चैभिस्त्रिभिः कार्यैः पुत्रस्य पुत्रता सफलायते । यत्र पितरौ तिष्ठतः, मातृपितृशुश्रूषणरतस्य पुत्रस्य कृते तत्क्षेत्रं गयापुष्करादिरिव गङ्गास्नानजन्यफलदायकं तीर्थं भवति । उक्तञ्च-

**तत्र गङ्गागयातीर्थं तत्र पुष्करमेव च ।**

**यत्र माता पिता तिष्ठेत् पुत्रस्यापि न संशयः ॥**

**अन्यानि तत्र तीर्थानि पुण्यानि विविधानि च ।**

**भवन्त्येतानि पुत्रस्य पितुः शुश्रूषणादपि ॥**

दत्तस्य दानस्य चीर्णस्य तपसः फलञ्च पित्रोः सेवैव सत्पुत्राय प्रददाति । तदतिरिक्ततीर्थानि दानादिधर्मादयश्च केवलं श्रम एव भवतीति शास्त्रस्य निश्चयो वर्तते ।

**पितुः शुश्रूषणात्तस्य दानस्य तपसः फलम् ।**
**सत्पुत्रस्य भवेद्विप्र ! अन्यधर्मः श्रमायते ॥**
**पितुः शुश्रूषणात् पुण्यं पुत्रः प्राप्नोत्यनुत्तमम् ।**
**स्वकर्मणस्तु सर्वस्वमिहैव च परत्र न ॥**
**जीवमानौ गुरू त्वैतौ स्वमातापितरौ तथा ।**
**शुश्रूषते सुतो भूत्वा तस्य पुण्यफलं महत् ॥**

मातुः पितुश्च यः पादौ नित्यं प्रक्षालयति तस्य भागीरथीस्नानजन्यपुण्यप्राप्तिरहन्यहनि समुपजायते । यः स्वाद्विकैः मिष्टान्नपानादिभिः सादरं सश्रद्धञ्च पितरौ भोजयति सोऽश्वमेधयज्ञजन्यपुण्यफलं प्राप्नोति । यस्तौ वस्त्रादिना भूषयते, ताम्बूलान्नमिष्टपेयादिना सन्तोषयति, सभक्ति च पूजयति, स यशःकीर्त्यादिकं लभते, भूमिदानपुण्यं च प्राप्नोति ।

यस्य कस्यापि जनस्योन्नतये देवानां गुरूणां पितृणाञ्चाशीर्वाद आवश्यको भवति । मातुः पितुश्च सेवया विना तयोराशीर्वादो भगवतो भक्तिस्ततोऽनुग्रहश्च दुर्लभ एव । पिता स्वक्लेशं स्वकाठिन्यं स्वार्थभावञ्च निगूह्य पुत्रस्य शिक्षायै पालनाय भविष्यसुरक्षायै च निरन्तरं प्रयतते । तस्य श्रम एव पुत्रस्य सफलजीवनस्य आधारस्तम्भो भवति । यथा देवता लोकस्य धारका भवन्ति तथैव पितरावपि पुत्रस्य जीवनमार्गस्य धारकौ मार्गदर्शकौ च भवतः । अतोऽस्माभिः सर्वथा सर्वदा पितरौ सेवनीयौ । सर्वसुखैश्वर्याशीर्वादावाप्तये वयं मातरं पितरञ्च नमस्करवाम ।

### *शब्दार्थाः*

| | | |
|---|---|---|
| पितरौ | = | जनकजनन्यौ |
| जनिः | = | जन्म |
| नङ्क्ष्यति | = | विनाशं प्राप्स्यति |
| चीर्णस्य | = | तप्तस्य |
| निगूह्य | = | गोपायित्वा |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) पितृभक्तिः कीदृशी साधना वर्तते ?

(ख) पितृभक्तिशब्देन किं गृह्यते ?

(ग) मातुः पितुश्च सेवया कुत्र विहितस्य स्नानस्येव पुण्यफलं प्राप्यते ?

(घ) आचार्यात् पितुर्महत्त्वं कियद् वर्तते ?

(ङ) कीदृशो धर्मः केवलं श्रमायते ?

(च) केन कारणेन सत्पुत्रस्य सफलता भवति ?

(छ) स्वस्योन्नतये केषामाशीर्वाद आवश्यको भवति ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) देवताः कथं प्रीयन्ते ?

(ख) पितृभक्तस्य शास्त्रसम्मतं फलं किमस्ति ?

(ग) निर्दिष्टस्य पद्यस्य तात्पर्यं प्रकाशयत

जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥

### ३. पितुर्मातुश्च भक्त्या को लाभो जायते ? पाठानुशीलनेन लिखत ।

### ४. पितृभक्तेर्महत्त्वं प्रतिपादयत ।

### ५. पितृभक्तेरुदाहरणस्य काञ्चन कथां पुराणादिभ्योऽन्विष्य स्वभाषया लिखत ।

### ६. यूयं मातापित्रोः सेवायै किं किं कुरुथ ? सूत्ररूपेण लिखित्वा कक्षायां दर्शयत ।

### ७. अधस्तनं गद्यभागं पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत

नेपालदेशस्य पूर्वदिग्भागे धराननामकमतीव रमणीयं नगरं वर्तते । अस्य नगरस्योपरिभागे पर्वतशृङ्गे विजयपुरनामकं क्षेत्रं विद्यते । अस्यैवापरं नाम रुद्राक्षारण्यं वर्तते । तत्र दन्तकाल्याः पीठमस्ति ।

पौराणिकमान्यतानुसारेण सतीवियोगेन विक्षिप्तो महादेवः प्राणप्रियायाः सतीदेव्या मृतदेहं स्कन्धे निधाय पृथिवीभ्रमणं कृतवान् । बहुकालपर्यन्तं सतीदेहं धृत्वा भ्रमतो महादेवस्य स्कन्धे निहितायाः सतीदेव्या अङ्गानि यत्र तत्र पतितानि । यत्र यदङ्गमपतत् तत्र तन्नाम्न्या देव्याः समुत्पत्तिर्जाता । विजयपुरे च भगवत्याः सतीदेव्या दन्तानां पतनमभवत् । अतस्तत्र दन्तकाल्या भगवत्या उत्पत्तिः सञ्जातेति स्कन्दपुराणस्य कथनं वर्तते । सत्यामनुरागाधिक्यात् तत्र महादेवोऽपि पिण्डेश्वरनाम्ना लिङ्गरूपेणावस्थितः । तत्तीर्थद्वयं नेपालदेशेऽत्यन्तं प्रसिद्धं परम्परासिद्धञ्च वर्तते ।

भगवत्या दन्तकाल्याः स्वरूपमुग्रं वर्तते । दन्तकाली चैतन्यशक्तियुता उद्यद्भानुसहस्राभा अहङ्काराविद्याभेदनतत्परा घोरदंष्ट्रा करालिनी मुण्डमालाभिर्विभूषिता चतुर्भुजा च विद्यते । तस्या हस्तयोः खड्गो मुण्डमाला च वर्तेते । सा वराभयकरा विद्यते । दन्तकाली सर्वदा रक्तवस्त्राण्येव धारयति । सा महाकालीरूपिणी वर्तते । दन्तकाल्या भक्तो ध्यानावस्थायां स्वकीयान्तःकरणशुद्ध्यर्थं करुणातत्त्वसमन्वितां चिच्छक्तिं ध्यायति । दन्तकाली कालीबीजतत्त्वेनोपास्यते । 'ॐ ह्रीं क्रीं दन्तकाल्यै नमः' इति दन्तकाल्या बीजमन्त्रो वर्तते । सा 'क्रीं' इति केवलं बीजमन्त्रेण चोपास्यते । अहङ्कारत्यागपूर्वकं शरणागतिभावं प्रदर्शयितुं 'दन्तकाल्यै नमः' इति नाममन्त्रस्योच्चारणं जपो वा क्रियते । भगवत्या दन्तकाल्याः समाराधनया भयशोकविषादानां क्षयो भवति, अहङ्कारशैथिल्यं जायते, लेखनविचारचिन्तनादिषु तीक्ष्णबुद्धिर्लभ्यते, अन्तर्मुखसाधनायां परिपाकश्च भवति । भगवत्या दन्तकाल्याः प्रखरदंष्ट्रा जीवात्मनो दृढाहङ्कारं भिनत्ति । साधकस्य देहाभिमान-कर्तृत्वाभिमान-भोक्तृत्वाभिमानादीन्यभिमानानि दन्तकाल्याः दर्शनेन कम्पन्ते, शनैः शनैः पलायन्ते च । भगवत्या दन्तकाल्या उपासना मृत्युभयशोकविषादग्रस्तानां जनानामभयप्रदानकर्त्री भवति । कालस्वरूपा दन्तकाली कालभयं नाशयति । तन्त्रशास्त्रेषु दन्तकाली वीरभावसाधनायां चेतनासाधनायां बन्धमोक्षविद्यायाञ्चात्यन्तं प्रभावशालिनी मन्यते । अत्र साधको भयसाधनां विधाय भयातीतो भवति । भगवती दन्तकाली सृष्टिस्थितिसंहाराणां कारणरूपा स्वीक्रियते । दन्तकाल्या भगवत्या उपासना मोक्षकरी भवति । दन्तकाली समस्तशोकदुःखभयादिनाशिका भगवती अस्तीति स्थानीयजनानां विश्वासो वर्तते । अतो वयमपि भगवतीं दन्तकालीं स्वाभीष्टफलप्राप्तये, भक्त्याः परिपाकाय, ज्ञानोत्पत्तये, मोक्षमार्गप्रवर्तनाय च वारं वारं स्मराम ।

**प्रश्नाः**

(क) दन्तकाल्याः पीठं कुत्र वर्तते ?

(ख) दन्तकाल्या विषये पौराणिकी मान्यता कीदृशी वर्तते ?

(ग) दन्तकाल्याः स्वरूपं कीदृशमस्ति ?

(घ) वयं किमर्थं दन्तकालीं नमामः ?

(ङ) अस्य गद्यांशभागस्य सारांशं लिखत ।

**१०. अस्माकं परिवारे समाजे च कीदृशी पितृभक्तिर्विधीयमाना दृश्यते ? विस्तरेण विवेचयत ।**

### *परियोजनाकार्यम्*

कञ्चन वृद्धाश्रमं गत्वा तत्र स्थितान् पुत्रादिपरिवारजनैस्त्यक्तान् ज्येष्ठनागरिकान् सम्मिल्य तेषामवस्थादिकं ज्ञात्वा विवरणं निर्माय कक्षायां प्रस्तुत ।

नवमः पाठः

# पितृभक्तः श्रवणकुमारः

वाल्मीकिरामायणे बहुविधा आदर्शदर्शिन्य उपदेशप्रधानाश्च कथाः सन्ति। ताः कथाः सर्वेषु जनेषु श्रद्धा-भक्ति-विश्वासान् उद्भावयितुं परस्परं सम्मान-मर्यादा-सदाचारान् वर्धयितुञ्च क्षमा वर्तन्ते। तासु श्रवणकुमारस्य कथा मातापितरौ सेवितुं तदिच्छां पूरयितुञ्च अस्मान् सदैव प्रेरयति। कथेयं रामायणस्य अयोध्याकाण्डे निबद्धास्ति।

श्रवणकुमारोऽन्धकमुनेः पुत्र आसीत्। तस्य मातापितरौ चक्षुषाऽन्धौ आस्ताम्। मातापित्रोर्भक्तः श्रवणकुमारस्तयोरिच्छां पूरयितुं सदैव तत्परो भवति स्म। कदाचिन्मातापितरौ तीर्थयात्रां कर्तुमीषतुः। तयोरिच्छां बुद्ध्वा श्रवणकुमारो मातापितरौ विवधे समूह्य तीर्थयात्रामारेभे।

श्रवणकुमारो वनात् कन्दमूलान्यानीय मातापितरौ भोजयित्वा स्वयञ्च खादति स्म। अन्यैर्दत्तमन्नमपि स न खादति स्म। एवं भ्रामं भ्रामं सोऽयोध्यायाः समीपवर्ति वनं प्राप। रात्रौ मातापितरौ तृषार्तौ बभूवतुः। श्रवणकुमारो जलमानेतुं तुम्बिकां गृहीत्वा सरयूतटं जगाम।



महाराजो दशरथस्तदा एकाकी आखेटाय वनं गतवान् आसीत्। तदा अयोध्याया निकटवर्तिनि वने वनगजा वसन्ति स्म। श्रवणकुमारो यदा जले तुम्बिकाममज्जयत् तदा तादृशो ध्वनिरुत्पन्नो यं श्रुत्वा महाराजो दशरथो गजो जलं पिबन्नस्तीति मेने। युद्धं विहाय गजमारणं निषिद्धं सदपि दशरथः शब्दभेदिबाणमत्यजत्। बाणः श्रवणकुमारस्य वक्षस्थलं बिभेद। स सक्रन्दनं भूमौ पपात आर्तनादञ्च चकार। महाराजः ससम्भ्रममार्तनादं निशम्य तत्र प्राप। स भूमौ क्रन्दन्तं वल्कलधारिणं निर्दोषं श्रवणकुमारं ददर्श। तस्य जटा विकीर्णाः, जलपात्रं पतितम्, शरीरं धूल्या रुधिरेण च विलिप्तमासीत्। महाराजं दृष्ट्वा स करुणकम्पितस्वरेण अवदत्, "राजन्! मया किमपराद्धम्? त्वं किमर्थं मां हंसि? मम मातापितरौ दुर्बलौ दृष्टिविहीनौ च स्तः। तयोः कृते जलमानेतुमहमत्र समागत आसम्। तौ मां प्रतीक्षमाणौ भवेताम्। मम इदानीन्तनीमवस्थां तौ कथं जानीयाताम्? यदा ज्ञास्यतस्तदा किं करिष्यतः? त्वया बाणेन नाहमेव अपि तु मम मातापितरौ अपि घातितौ। मातापितरौ स्मारं स्मारमतीव दुःखितोऽस्मि। तत्र गत्वा मम अवस्थां श्रावय। जलं पाययित्वा तयोस्तृषाञ्च शमय।"

महाराजो दशरथः शोकेन व्याकुल आसीत्। स श्रवणमपृच्छत्, "तव मातापितरौ कुत्र वसतः? तत्र गमनाय मार्गः कः?" श्रवणो यथाकथञ्चित् पित्रोः स्थानं मार्गञ्चावदत्। स महाराजं समाश्वासयत्, "वैश्योऽहं न हि ब्राह्मणः। ब्रह्महत्यायाः पापं नावाप्स्यसि। अतिशयं कष्टमनुभवामि। ममोरसो बाणं कर्ष्टुमर्हसि।"

इषौ कृष्टे व्यथितो वेपथुवपुः श्रवणः शरीरं तत्याज। ततो महाराजो दशरथः पश्चात्तापेन ज्वलन्निव श्रवणस्य पात्रे सरयूजलमादाय तस्य पित्रोः सन्निधौ प्रापत्। दुःखेन दग्धो भीतोऽवरुद्धकण्ठश्च दशरथो दीनस्वरेण स्वापराधमवर्णयत्। राज्ञोऽपराधं श्रुत्वा वृद्धदम्पती शोकाकुलौ बभूवतुः। अश्रूणि मुञ्चन्तौ तौ राजानमकथयताम्, "आवयोर्मृतपुत्रस्य शरीरं यत्रास्ति तत्र नौ नयतु।" महाराजो दशरथ उभौ एव स्कन्धे समारोप्य तत्रानयत्।

श्रवणकुमारः पित्रोः सेवाफलेन दिव्यरूपः सन् विमानमधिष्ठाय स्वर्गं प्रतिष्ठन्नासीत्। राजा तद् विलोक्य विस्मयपदं जगाम। दीनौ मातापितरौ दृष्ट्वा तौ समाश्वासयन् श्रवणो जगाद, "भवत्सेवया मया इयमुत्तमा गतिर्लब्धा। मयि शोको न क्रियताम्। भवन्तौ अपि मम पार्श्वेऽचिरादागच्छताम्।"

तदनन्तरं वृद्धदम्पती शुष्केन्धनानि समाहृत्य तदुपरि श्रवणस्य मृतदेहं स्थापयामासतुः। सरयूजले स्नात्वा तौ पुत्राय जलाञ्जलिं ददतुः, तस्यामेव चितायां निपत्य शरीरञ्च तत्यजतुः। अन्तिमसमये दुःखवेगातिशयेन तौ महाराजं शेपतुः, "यथा पुत्रवियोगेन आवां म्रियमाणौ स्वः तथैव तव शरीरमपि पुत्रवियोगेन कालकवलितं भविष्यति।" यथा वाल्मीकिरामायणे उक्तम् -

**पुत्रव्यसनजं दुःखं यदेतन्मम साम्प्रतम्।**
**एवं त्वं पुत्रशोकेन राजन् कालं करिष्यसि॥**

श्रवणकुमारस्य मातापितरौ अपि स्वपुत्रस्य पुण्यप्रभावेणोत्तमलोकं प्रापतुः । इत्थं श्रवणो मातापितरौ संसेव्य यं धर्मं लेभे तस्य प्रभावेण तौ अपि उद्दधार ।

## शब्दार्थाः

| | | |
|---|---|---|
| विवधः | = | शाकादिभारवाहनाय प्रयुज्यमाना तुलाकारा मञ्जूषा (खर्पन इति नेपालीभाषायाम्) |
| तुम्बिका | = | जलपात्रम् |
| विलिप्तम् | = | आप्लुतम् |
| समाहृत्य | = | सङ्कलय्य |
| शेपतुः | = | शापं दत्तवन्तौ |
| उद्दधार | = | उद्धृतवान् |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) वाल्मीकिरामायणे कीदृश्यः कथाः सन्ति ?

(ख) श्रवणकुमारः कस्य पुत्र आसीत् ?

(ग) श्रवणकुमारः कुत्र प्राप ?

(घ) दशरथः श्रवणकुमारस्य शरीरं कीदृशं ददर्श ?

(ङ) महाराजो दशरथः श्रवणकुमारं किमपृच्छत् ?

(च) श्रवणकुमारस्य मातापितरौ आत्मानौ कुत्र नेतुं दशरथमवोचताम् ?

(छ) श्रवणकुमारो दिव्यरूपेण कुत्र प्रतिष्ठन्नासीत् ?

(ज) श्रवणकुमारस्य मातापितरौ कथमुत्तमलोकं प्रापतुः ?

(झ) श्रवणकुमारः कीदृशं धर्मं लेभे ?

(ञ) दशरथः किमर्थं वनं जगाम ?

## २. सङ्क्षिप्तोत्तराणि लिखत

(क) श्रवणकुमारः पित्रोरिच्छा कथं पूरयामास ?

(ख) दशरथः किमर्थं बाणं प्राहरत् ?

(ग) दशरथः श्रवणकुमारेण सह मातापितरौ कथं हतवान् ?

(घ) श्रवणकुमारो दशरथं किमकथयत् ?

(ङ) दिव्यरूपः श्रवणो मातापितरौ किं जगाद ?

## ३. श्रवणकुमारः पित्रोरिच्छां कथं पूरयामास ? विस्तरेण लिखत ।

## ४. श्रवणकुमारेण दशरथायोक्तं कथनसारं व्याकुरुत ।

## ५. कथामाश्रित्य श्रवणकुमारस्य चरितं वर्णयत ।

## ६. अधः प्रदत्तमनुच्छेदं स्वशब्दैः पुनर्लिखत

मम इदानीन्तनीमवस्थां तौ कथं जानीयाताम् ? यदा ज्ञास्यतस्तदा किं करिष्यतः ? त्वया बाणेन नाहमेव अपि तु मम मातापितरौ अपि घातितौ । मातापितरौ स्मारं स्मारमतीव दुःखितोऽस्मि । तत्र गत्वा मम अवस्थां श्रावय । जलं पाययित्वा तयोस्तृषाञ्च शमय ।

## ७. अर्थापनं कुरुत

पुत्रव्यसनजं दुःखं यदेतन्मम साम्प्रतम् ।
एवं त्वं पुत्रशोकेन राजन् कालं करिष्यसि ॥

## ८. अधो लिखितं कथांशं पठित्वा निर्दिष्टकार्याणि विधत्त

दानवीरेषु महर्षिर्दधीचिः श्रुतनामा अस्ति । तस्य स्त्रिया नाम प्रातिथेयी आसीत् । तयोः पिप्पलादो नाम पुत्रो बभूव । पिप्पलफलभक्षणात् तस्य तन्नाम प्रसिद्धमभवत् । पिप्पलादोऽपि महान् तपस्वी आसीत् । पिप्पलादः कदाचित् शुश्राव यद् देवास्तस्य पितुरस्थि अयाचन्त । तस्य दानेन पिता पञ्चत्वं जगाम । तेन पिप्पलादोऽधिकक्रुद्धो जातः । स देवान् प्रतिकर्तुं व्यचिन्तयत् । एतदर्थं स भगवतः शङ्करस्य तोषाय उपासनां तपश्च कर्तुमारेभे । स चिराय तपश्चकार । तेन प्रसन्नः शङ्करो वरं याचितुमवोचत् । पिप्पलादो जगाद, "मह्यं तादृशीं शक्तिं प्रयच्छतु ययाहं पितृघातकान्

देवान् विनाशयितुं समर्थः स्याम् ।" पिप्पलादस्य याचनं श्रुत्वा शङ्कर एकां भयदायिनीं राक्षसीं सृष्ट्वा तस्मै ददौ । राक्षसी पिप्पलादं पप्रच्छ, "आज्ञापयतु, किमहं कुर्याम् ?" पिप्पलादोऽवदत्, "त्वं सर्वान् देवान् भक्षय ।" राक्षसी स्वस्य मुखं विस्फार्य पिप्पलादमेव खादितुमुद्यता अभवत् । भीतः पिप्पलादोऽब्रवीत्, "त्वं कथं मामेव खादितुं तत्परा असि ?" राक्षसी प्रत्यवदत्, "समेषां जीवानामङ्गेषु देवता निवसन्ति । यथा - नेत्रयोः सूर्यः, हस्तयोरिन्द्रः, जिह्वायां वरुणश्च । एवं रीत्या अन्या देवता अन्येष्वङ्गेषु तिष्ठन्ति । स्वर्गस्था देवता दूरे वसन्ति । मम पार्श्वे योऽस्ति प्रथमं तमेव भक्षयामि । इदानीं मम पार्श्वे त्वमसि, त्वामेव अद्मि ।"

पिप्पलादो भृशं भयातुरो जातः । स शङ्करस्य शरणं ययौ । शङ्करः पिप्पलादमुपदिदेश, "पुत्र ! क्रोधो हि सर्वेषामनर्थानां कारणम् । क्रोधवशात् सर्वाणि पापानि जायन्ते । यद्यहं राक्षसीमिमां त्वद्भक्षणान्निवारयामि सा सर्वान् अन्यान् जीवान् भक्षयिष्यति । ततस्त्वमेव निखिलजगद्धननस्य पापं लप्स्यसे । नेत्रयोर्देवः सूर्यः, सूर्येण विना सकलजगदन्धतामेति । हस्तयोर्देवता इन्द्रः, इन्द्रस्याभावात् न कोऽपि बाहू सञ्चालयितुं शक्नोति । अनेनैव प्रकारेण येषामङ्गानां या देवताः सन्ति तासां शक्त्यैव जीवानामङ्गानि कार्याणि कुर्वन्ति । यदि देवता न भवन्ति तदा तवाङ्गान्यपि किमपि कर्तुं न शक्नुवन्ति । अतो देवताभ्यः क्रोधं मा कुर्याः । देवतास्तव पितुरस्थि भिक्षायामयाचन्त । दानोपकारभावनया तव पिता ताभ्यः स्वास्थीनि अदात् । त्वं महात्मनः पुत्रोऽसि । पितुः सन्निधौ याचकरूपेण आगताभ्यः देवताभ्यः क्रोधो नोचितः, पुत्र !"

भगवतः शङ्करस्योपदेशेन पिप्पलादस्य क्रोधो व्यपगतः । स जगाद, "प्रभो ! भवदाज्ञया देवताः क्षम्यन्ते ।" राक्षसी च जगाम । पिप्पलादस्य क्षमयास्तुष्टः शङ्करस्तस्मै वरं ददौ, "त्वं यत्र तप आचरसि तत् पिप्पलतीर्थं भविष्यति । तत्र स्नातो जनः सर्वैः पापैर्विमुक्तो भूत्वा भगवद्धाम अवाप्स्यति ।"

पिप्पलादः पितुर्महर्षेर्दधीचेर्दर्शनमिच्छति स्म । देवतानां प्रार्थनया ऋषिलोकान्महर्षिर्दधीचिः पिप्पलादस्य माता प्रातिथेयी च विमाने उषित्वा तत्र आजग्मतुः, पिप्पलादाय आशीर्वादञ्च ददतुः । कालान्तरे पिप्पलादो विख्यातो विद्वान् ब्रह्मर्षिश्च बभूव ।

### (अ) प्रश्नानुत्तरयत

(क) 'पिप्पलादः' इति नामकरणस्य कारणं किम् ?

(ख) पिप्पलादः किं शुश्राव ?

(ग) शङ्करः पिप्पलादं किमवोचत् ?

(घ) पिप्पलादः किमयाचत ?

(ङ) नेत्रयोर्हस्तयोश्च का का देवता निवसति ?

(च) राक्षसी कथं पिप्पलादं खादितुमिच्छति ?

(छ) शङ्करस्योपदेशस्य सारः कः ?

(ज) व्यपगतक्रोधः पिप्पलादः शङ्करं किमुवाच ?

(झ) पिप्पलादस्य मातापितरौ कुत्र आजग्मतुः ?

(ञ) अस्याः कथायाः सन्देशः कः ?

### (आ) अधो लिखितानि पदानि प्रयुज्य एकैकं वाक्यं रचयत

कदाचित्, विस्फार्य, पप्रच्छ, समेषाम्, अद्मि, सन्निधौ, व्यपगतः, प्रभो, दर्शनम्, उषित्वा ।

### (उ) भावविस्तारं कुरुत

क्रोधो हि सर्वेषामनर्थानां कारणम् ।

## ९. अधः प्रदत्तकथामाधृत्य असत्यकथनं सत्यकथने परिवर्त्य पुनर्लेखनं कुरुत

पुत्रकामनया कृतो यज्ञः पुत्रेष्टियज्ञः कथ्यते । पुरा यदा पुत्रप्राप्तौ विलम्बो भवति स्म तदा दम्पतीभ्यां यज्ञोऽयं विधीयते स्म । प्राचीनकालतः पुत्रेष्टियज्ञस्य नैकानि उदाहरणानि प्राप्यन्ते । अयोध्याधिपतिर्दशरथः पुत्रेष्टियज्ञं चकार । तद्यज्ञप्रभावेण तस्य चत्वारो बहुगुणसम्पनाः पुत्रा अजायन्त । कस्यापि बालकस्य दत्तकपुत्रस्य रूपेण ग्रहणावधौ दत्तहोमेन साकं पुत्रेष्टियज्ञः क्रियते स्म । पुरा पुत्रस्यार्थो लघुः कनिष्ठो वेति आसीत् । कालानन्तरं नरकाद् यो रक्षति स पुत्र इत्यर्थः प्रसिद्धिं गतः । पुत्रेण विहितेन श्राद्धेन पित्र्युद्धारो भवतीति शास्त्रीयवच उपलभ्यते । मनुस्मृतौ द्वादशप्रकारकाः पुत्रा उल्लिखिताः सन्ति । तेषु प्रथम औरसपुत्रो यः पत्या पत्न्यामुत्पाद्यते । पुत्र्याः पुत्रो दौहित्रो वा अपरपुत्रः । स्वपत्न्यामन्येन पुरुषेण उत्पन्नः पुत्रः क्षेत्रजो निगद्यते । पत्न्या पतिं विहाय अन्येन पुरुषेण गुप्तरूपेण उत्पन्नः पुत्रो गूढजो भवति । अविवाहितायाः कन्याया य उत्पन्नो भवति स कानीनपुत्रः । पुनर्विवाहितायां पत्न्यामुत्पन्नपुत्रः पौनर्भव इति नाम्ना सम्बोध्यते । पुत्रस्याभावेन अन्यस्मात् परिवारात् क्रोडमानीतो दत्तकपुत्रो भवति । अन्यस्मात् परिवारात् क्रीतः पुत्रः क्रीतक इति प्रसिद्धः । मातापितृभ्यां परित्यक्तः स्वयं समर्पितश्च पुत्रः स्वयन्दत्तोऽभिधीयते । स्वेच्छया अन्यस्मात् परिवारात् पुत्रवत् प्राप्तः पुत्रः कलित उच्यते । अनाथत्वेन लब्ध्वा पालितः पुत्रोऽपविद्धः कथ्यते । प्राचीनकाले यद्यपि सर्वेषां पुत्राणां परिवारे समानस्थानं नासीत् तथापि तेषां पालनपोषणं भवति स्म । वर्तमानयुगे इयं प्रथा क्षीयमाणा वर्तते । सम्प्रति औरसो दत्तकश्चैव द्वौ पुत्रौ मान्यौ स्तः ।

(क) पुत्रेष्टियज्ञस्य उदाहरणं न प्राप्यते ।

(ख) प्राचीनार्वाचीनकालयोः पुत्रशब्दस्य समानार्थो वर्तते ।

(ग) औरसपुत्रात् क्षेत्रजपुत्रो वरम् ।

(घ) स्वपत्न्यामन्येन पुरुषेण उत्पन्नः पुत्रः कानीनो भवति ।

(ङ) द्विवारं पुत्रत्वेन अवलम्बितः पौनर्भवपुत्रः कथ्यते ।

(च) सम्प्रति सर्वेषां पुत्राणां व्यवस्था पूर्ववद् वर्तते ।

(छ) समाजे गूढजदत्तकपुत्रयोः प्रतिष्ठा दृश्यते ।

## १०. अधो लिखितानि कथनान्याधृत्यानुच्छेदमेकं लिखत

(क) यः प्रीणयेत् सुचरितैः पितरं स पुत्रः ।

(ख) पुत्रेण लोकान् जयति ।

(ग) जीवतो वाक्यकरणात् क्षयाहे भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥

## *परियोजनाकार्यम्*

**अधो लिखितानि शीर्षकाण्याश्रित्य प्रतिशीर्षकं पञ्चभिर्वाक्यैर्भगवता श्रीरामेण निर्व्यूढस्य कर्तव्यस्य सारिणीं निर्मात**

(क) पुत्रः (ख) पतिः (ग) राजा (घ) सखा

(ङ) मित्रम् (च) भ्राता (छ) धर्मसंरक्षकः (ज) विष्णोरवतारः

# विदुरोपदेशः


महर्षिर्माण्डव्यो बाल्ये मौनव्रती आसीत्। कदाचिच्चौरास्तस्याश्रमे चोरितं धनं निहितवन्तः। राजपुरुषास्तं चौरसहायकममन्वत। अतो निर्दोषोऽपि माण्डव्यः शूले आरोपितः। पश्चात् स धर्मराजं पप्रच्छ–"केन कारणेन मया एतादृशं दुःखं प्राप्तम् ?" धर्मराजोऽवदत्- "बाल्ये भवान् कीटं कण्टकेन विद्धवान्। तस्यैव कर्मण इदं फलम्।" माण्डव्य एतदन्याय्यं मत्वा धर्मराजं शप्तवान्- "त्वं मनुष्यलोके दासीपुत्ररूपेण जन्म प्राप्स्यसि" इति। तस्य शापस्य फलरूपेण धर्मराजो विदुररूपेण जनिं लेभे।

शन्तनोः पुत्रौ चित्राङ्गदो विचित्रवीर्यश्चास्ताम्। चित्राङ्गदस्य मृत्योः पश्चाद् विचित्रवीर्यो राजा अभवत्। भीष्मो विचित्रवीर्याय अम्बाम् अम्बिकाम् अम्बालिकाञ्चेति काशिराजस्य तिस्रः कन्या आनयत्। अम्बा शाल्वराजमिच्छति स्म, अतः सा विचित्रवीर्येण सह विवाहं नाकरोत्। अम्बिका-अम्बालिकयोर्विचित्रवीर्येण सह विवाहो जातः। किन्तु विचित्रवीर्योऽपुत्र एव मृतवान्। वंशरक्षणाय सत्यवती स्वपुत्रं व्यासमाहूतवती। नियोगविधिना अम्बिकाया गर्भाद् अन्धो धृतराष्ट्रः, अम्बालिकाया गर्भात् पाण्डुरोगी पाण्डुर्जातः। पुनर्दास्या गर्भाद् धर्मज्ञः, न्यायप्रियः, नीतिवेत्ता च विदुर उत्पन्नः।

गच्छता कालेन वेदवेदाङ्गपारङ्गतः सत्यधर्मन्यायवेत्ता अविचलितन्यायनिष्ठापालनकुशलो धर्मात्मा विदुरः पाण्डवानां परामर्शदाताऽभवत्। दुर्योधनविहितविविधकूटवञ्चनादिकार्याणां लाक्षागृहषड्यन्त्रस्य च सूचनाप्रदानेन स पाण्डवानां जीवनरक्षणं विहितवानासीत्। विदुरस्य वाणी निर्णयशक्तिर्विवेकश्च सर्वदा धर्माधिष्ठित आसीत्। स सर्वदा सत्यस्य धर्मस्य च पक्षे आत्मानं स्थापयति स्म। शान्तिदूतरूपेण हस्तिनापुरं प्राप्तो भगवान् श्रीकृष्णो विदुरभवने निवासमकरोत्। कौरवपाण्डवयुद्धविरोधे विदुरो मन्त्रिपदं च त्यक्तवान्। विदुरो धृतराष्ट्रं राज्यस्य सुसञ्चालनाय पुत्रमोहत्यागाय च बहुधोपदिष्टवान्। स एवोपदेशो विदुरोपदेशनाम्ना विदुरनीतिनाम्ना वा लोके परिचीयते। सोऽद्यापि नीतिसम्मतराज्यसञ्चालनस्य आदर्शरूपेण गृह्यते। पुत्रस्नेहजन्याधर्मनिवारणाय विदुरेण य उपदेशः प्रदत्तः स राजधर्मदृष्ट्यात्यन्तं महनीयो वर्तते।

विदुरमतेन राजा धर्मस्याधिष्ठाता भवति। राजधर्मस्यापरं नाम न्यायपालनम्, प्रजाहितचिन्तनम्, आत्मसंयमः, सत्यवचननिष्ठा च भवति। एतानि राजधर्मस्याङ्गानि वर्तन्ते। राजा यदि धर्ममार्गे स्थितो भवति तर्हि

राज्यं स्वतः स्थिरं भवति। राजधर्मे पुत्रभ्रातृस्वजनादिषु भेदा न भवन्तीति विदुरस्य धृतराष्ट्रं प्रति स्पष्टं सम्बोधनमासीत्। दुर्योधनद्वारा विधीयमानेष्वन्यायेषु धृतराष्ट्रस्य मौनं राज्यधर्मभ्रष्टतायाः कारणमभवत्। अन्धस्नेहः स्नेहकर्तुर्विवेकं नाशयति। न्याय एव राजधर्मस्य प्राणाः। इदृग्विधं सत्यन्यायधर्मादिपोषकं वचः विदुरस्योपदेशस्य पृष्ठभूमिर्लक्ष्यञ्च वर्तते। दोषिणे दण्डदानमवश्यमेव निर्दोषस्य संरक्षणायात्यावश्यकं भवति। पाण्डवान् प्रति विहितमन्याय्यं कौरवकुलविनाशस्य बीजमिति विदुरः पूर्वमेव सूचितवानासीत्। सत्यवचनस्य राजकीयमहत्त्वं प्रतिपादयन् विदुरः कथयति- "राजा सत्यप्रतिज्ञो भवेत्। असत्येन राज्यं क्षणिकमेव भवति, सत्येन च दीर्घकालिकी स्थिरता लभ्यते। राजवचनमेव शासनस्याधारो भवति। राजा इन्द्रियजयी भवेत्। राज्ञः क्रोधो निर्णयदूषको भवति। लोभोऽन्यायजनको भवति चेद् मोहो विवेकहरो भवति। राज्ञ एते दोषा राज्येऽवश्यमेवाव्यवस्थां कुर्वन्ति। अतो राज्ञा क्रोधलोभमोहादिकं परित्यक्तव्यम्" इति।



महामन्त्री विदुरो राज्ञः कर्तव्यं धृतराष्ट्रं बोधयन् कथयति- "राजा केवलं स्तुतिकारिणामेव न, अपि तु हितवक्तॄणां सर्वेषां राजाऽस्ति। अतस्तेषां वचनं राजा सर्वथा शृणुयात्। कदाचिद् अप्रियं हितवचनमपि राजधर्मस्य पोषकमेव भवति। अतो राज्ञा मन्त्रणाकारिणां वचनमवश्यमेव श्रोतव्यम्। सुजनसङ्गतिरावश्यकी। राजदण्डो भयहेतुर्न स्यादपि तु धर्मसंरक्षणाय भवेत्। अदोषे दण्डोऽधर्माय, दोषेऽदण्डोऽप्यधर्माय एव भवति। समदृष्ट्या कृतो दण्ड एव राजधर्मसम्मतः" इति।

युद्धं राजधर्मस्य विफलतास्तीति विदुरस्य राद्धान्तो वर्तते । विदुरानुसारेण समये एवान्यायस्य निग्रहो विधीयते चेद् युद्धस्य प्रसङ्ग एव नैवायाति । विहितशुभाशुभकर्मणां फलमनिवार्यतया लभ्यते । अन्यायार्जितं राज्यं दीर्घकालिकं नैव भवति । परिणामदर्शनात्मिका बुद्धिस्तवोत्पद्येत । राज्यस्य शोभाधायकाः शमदमदयारूपा गुणा राजनि अत्यावश्यका भवन्ति । अतस्त्वं राजा शमवान्, दमवान् दयालुरपि भवेः । दुर्योधनादयः शतसंख्यका यथा तव पुत्राः सन्ति तथैव पाण्डुपुत्रा युधिष्ठिरप्रभृतयोऽपि तव पुत्रा एव सन्ति । तेषु कुत्राप्यन्याय्यं नैव कर्तव्यम् । समत्वमेव राजधर्मो भवति इति धृतराष्ट्रं प्रति विदुरस्य समदृष्टिस्थापनार्थक उपदेशो वर्तते ।

धृतराष्ट्रस्य मौनमेव महाभारतयुद्धस्य कारणमिति विदुरस्य विचारो वर्तते । विदुरस्य राजधर्मोपदेशो नीतिप्रधानोऽस्ति । राजा यदि धर्मं रक्षति तर्हि रक्षितधर्मोऽपि राजानं राष्ट्रञ्च रक्षति । विवेकयुक्तो धर्मो राज्यस्य प्राणा एवेति विदुरस्योपदेशेन विज्ञायते । विदुरो दुर्योधनादिषु स्वपुत्रेष्वन्धस्नेहं परित्यज्य धर्ममार्गे स्थित्वा धृतराष्ट्रं सत्यन्यायविवेकसम्मतराज्यशासनसञ्चालनाय वारं वारमन्वरुणत् । नो चेद् हस्तिनापुरस्य राज्यविनाशः कुलनाशो भ्रात्रोर्युद्धञ्चानिवार्यं भविष्यतीति विदुरः पूर्वमेव सूचितवानासीत् ।

**शब्दार्थाः**

| | | |
|---|---|---|
| नैरन्तर्याय | = | निरन्तरतायै |
| नियोगाय | = | गर्भाधानाय |
| अन्वरुणत् | = | अनुरोधमकरोत् |

## अभ्यासः

१. **अतिसङ्क्षेपेणोत्तरयत**

(क) माण्डव्यः किमन्यायममनुत ?

(ख) विदुरः कस्य शापेन जनिं लेभे ?

(ग) चित्राङ्गदविचित्रवीर्यौ कस्य पुत्रौ आस्ताम् ?

(घ) अम्बाया विवाहः किमर्थं नाभवत् ?

(ङ) पाण्डवानां परामर्शदाता क आसीत् ?

(च) शान्तिदूतः श्रीकृष्णः कुत्र निवासमकरोत् ?

२. **सङ्क्षिप्तोत्तराणि लिखत**

(क) माण्डव्यस्य मुनेः कोपस्य कारणं लिखत ।

(ख) भीष्मः काशिराजस्य तिस्रोऽपि कन्याः किमर्थमानीतवान् ?

(ग) राजधर्मस्याङ्गानि कानि ?

(घ) राजधर्मस्य स्वरूपं कीदृशं भवति ?

(ङ) अधस्तनपङ्क्तेर्भावविस्तारं कुरुत

अदोषे दण्डोऽधर्माय, दोषेऽदण्डोऽप्यधर्माय एव भवति ।

३. **विदुरोपदेशं सङ्क्षिप्य लिखत ।**

४. **स्वदेशे राजधर्मस्य कीदृशीं स्थितिं द्रष्टुमिच्छथ ? वर्णयत ।**

५. **अस्य पाठस्योपान्तिमानुच्छेदस्य द्विचतुर्थांशे सारांशं लिखत ।**

६. **विदुरोपदेशानुसारेण राज्यसञ्चालने के लाभा भवन्ति ? विवेचयत ।**

७. **पाठमाधृत्य विदुरस्य चरित्रचित्रणं कुरुत ।**

## ८. अधस्तनमनुच्छेदमधीत्य तदनुवर्तिप्रश्नानामुत्तराणि लिखत

मानवस्यायं स्वभावोऽस्ति यत् स सर्वदा येन केन प्रकारेण स्वकीयाभ्युदयाय प्रयतते, स कदाचिद् देवमाराधयति, मन्त्रान् जपति, भूतप्रेतादीन् वशीकरोति, धनिकान् आश्रयति, विद्यामभ्यस्यति, किं वा महतां चाटुकारितां च कुरुते तथापि स आत्मीयान् मनोरथान् प्राप्तुं नैव क्षमो भवति। एतेष्वप्रशस्तोपायेषु तत्परस्य तस्य न क्वापि मोक्षोऽवलोक्यते। अभ्युदयाय प्रयतमानस्य तस्य विश्वस्मिन् सर्वोत्तम उपायः सज्जनानां सङ्गतिरेवास्ति। सतां सज्जनानां सङ्गतिरेव सत्सङ्गतिरिति कथ्यते। अहो महान् प्रभावः सत्सङ्गतेः। सत्सङ्गतिप्रभावान्मूर्खोऽपि विद्वान् भवति, निर्धनो धनवान् भवति, रोगी नीरोगः, अलसोऽनलसः, पापी धर्मात्मा, अज्ञानी च ज्ञानवान् भवति। मानवानां हीनभावाः सत्सङ्गतिप्रभावाद् अनायासेनैव दूरीभवन्ति। मानवो यादृशीं सङ्गतिमाश्रयति तादृगेव स्वरूपं बिभर्ति। तथोक्तं नीतिशतके-

**सन्ताप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते,**
**मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते।**
**स्वात्यां सागरशुक्तिमध्यपतितं तन्मौक्तिकं जायते,**
**प्रायेणाधममध्यमोत्तमजुषामेवंविधा वृत्तयः॥**

सन्तप्ते अयःपात्रे संस्थितस्य पयसो दर्शनमपि न भवति परन्तु कमलपत्रस्थितं तदेव पयो मुक्ताकारतया शोभते। स्वातीनक्षत्रे समुद्रस्य शुक्तौ पतितं तज्जलमेव मौक्तिकतां लभते। एकस्यैव जलस्य दुष्टसामान्यसत्सम्पर्कादेतादृशी आकारपरिवृत्तिः सम्भवति।

**मलयाचलगन्धेन त्विन्धनं चन्दनायते।**
**तथा सज्जनसङ्गेन दुर्जनः सज्जनायते॥**

यथा किमपि काष्ठं मलयाचलस्य सम्पर्केण चन्दनं भवति तथैव सज्जनसङ्गेन च कश्चिद् दुर्जनोऽपि सज्जनो भवति।

महतां सङ्गो नीचानपि उच्चपदे प्रतिष्ठापयति। पुष्पमालायां निवसन् कीटः पुष्पसङ्गेन महापुरुषाणां शिरसि आरोढुं शक्नोति। महात्मानः स्थापयन्ति चेत् कश्चन पाषाणोऽपि देवत्वं प्राप्य सम्पूज्यते। आध्यात्मिकवृत्तौ कस्यचन सङ्गो दोषाय भवतीति गीतायां स्पष्टं वर्तते-

**सङ्गात् सञ्जायते कामः कामात्क्रोधोऽभिजायते।**

**क्रोधाद् भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः॥**

**स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥**

सङ्गस्यैषा परम्परा सर्वथानर्थदायिनीति विश्वजनीनं सत्यं वर्तते। चेतनशीलेन मानवेन किं कर्तव्यम् इति प्रश्ने कश्चनोक्तवान् -

**सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ।**

**स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम् ॥**

सङ्गतिः सर्वथा परित्याज्या एव। परन्तु कदाचित् त्यक्तुं न शक्यते चेत् सज्जनैः सह एव कर्तव्या। यतो हि सज्जनानां सङ्गतिरौषधरूपा भवति।

**प्रश्नाः**

(क) जनाः स्वकीयाभ्युदयाय किं किं कुर्वन्ति ?

(ख) पाठे प्रदत्तस्य सन्ताप्तायसीति श्लोकस्य भावार्थं लिखत।

(ग) सत्सङ्गस्य महत्त्वं किमस्ति ?

(घ) सत्सङ्गस्य प्रभावः कः ?

(ङ) सज्जनानां सङ्गतिरौषधरूपा भवतीत्यस्याः पङ्क्तेराशयः कः ?

९. **अस्य पाठस्याध्ययनेन राजधर्मविषये का शिक्षाऽधिगता ? लिखत।**

## *परियोजनाकार्यम्*


**अभिभावकस्य परिचितस्य कस्यचन विज्ञजनस्य वा साहाय्येन विदुरोपदेशस्य कांश्चन पञ्च श्लोकानन्विष्य तदर्थं विलिख्य च कक्षायां प्रस्तुत।**

एकादशः पाठः

# पौराणिका व्यासाः

पौरस्त्यपरम्परायां व्यास इति नाम कस्यचिदेकस्य जनस्य कृते व्यवस्थितं न वर्तते । वेदान् व्यस्यति पृथक् करोतीति विग्रहे 'वि आ' इत्युपसर्गद्वयपूर्वकात् क्षेपणार्थकाद् असुधातोर्घञ्प्रत्यये व्यासशब्दो निष्पद्यते । व्यासशब्दः पराशरसुतमुनिभेदरूपेण नारायणस्य पञ्चकलावतारभेदरूपेण च पुराणादौ प्रसिद्धो वर्तते ।

पौरस्त्यसंस्कृतेरितिहासेऽष्टाविंशतिः पौराणिका व्यासाः प्रथिता वर्तन्ते । एते व्यासा न केवलं वेदानां विभाजका अपि तु अतुलनीया महापुरुषा आसन् । एते मन्त्रद्रष्टारः, वेदमन्त्रसङ्कलकाः, महाभारतपुराणादीनां कर्तारः, ब्रह्मसूत्राणां रचयितारः, तेषां ब्रह्मसूत्राणां परम्पराप्रदातारश्चाभवन् । अष्टाविंशतिव्यासेषु अष्टाविंशतितमं कृष्णद्वैपायनमतिरिच्य अन्येषां जन्मादिवृत्तान्तमिदमित्थन्तया नैवाधिगन्तुं शक्यते । कृष्णद्वैपायनस्य विषये तु इत्थं लिखितमस्ति-



**यो व्यस्य वेदाँश्चतुरस्तपसा भगवानृषिः ।**
**लोके व्यासत्वमापेदे कार्ष्णात् कृष्णत्वमेव च ॥**

यो भगवान् द्वैपायनः ऋषिश्चतुरो वेदान् तपसा व्यस्य विभाजनं कृत्वा लोके व्यासत्वं लब्धवान् स श्यामवर्णत्वात् कृष्णनाम्ना प्रथितो बभूव ।

**यया च कुरुते तन्वा वेदमेकं पृथक् प्रभुः ।**
**वेदव्यासाभिधाना तु सा सा मूर्तिर्मधुद्विषः ॥**

या मूर्तिर्भगवतो विष्णोः शरीरेणैकं वेदं चतुर्धा पृथग् विभक्तवती सा मूर्तिर्वेदव्यासनामधेया भगवतो श्रीहरेरेव मूर्तिरस्ति ।

वर्तमानस्य वैवस्वतमन्वन्तरस्य वेदव्यासा अष्टाविंशतिसंख्यकाः सन्ति । तेषां सङ्ख्याविषये मतैक्ये वर्तमानेऽपि नामविषये पुराणान्तरेषु किञ्चित् पार्थक्यं दृश्यते । तत्र युगभेदान्नामभेदोऽभवदिति शास्त्रीया परम्परा वर्तते । ते च यथा-

**वैवस्वतन्तरे त्वस्मिन् द्वापरेषु पुनः पुनः ।**
**वेदव्यासा व्यतीता ये ह्यष्टाविंशतिसत्तमाः ॥**
**चतुर्धा यैः कृतो वेदो द्वापरेषु पुनः पुनः ।**
**द्वापरे प्रथमे व्यस्ता स्वयं वेदाः स्वयम्भुवा ॥**
**द्वितीये द्वापरे चैव वेदव्यासः प्रजापतिः ।**
**तृतीये चोशना व्यासश्चतुर्थे तु बृहस्पतिः ॥**
**सविता पञ्चमे व्यासो मृत्युः षष्ठे स्मृतः प्रभुः ।**
**सप्तमे च तथैवेन्द्रो वसिष्ठश्चाष्टमे स्मृतः ॥**
**सारस्वतश्च नवमे त्रिधामा दशमे स्मृतः ।**
**एकादशे वै त्रिवृषो भारद्वाजस्ततः परम् ॥**
**त्रयोदशे चान्तरिक्षो धर्मश्चापि चतुर्दशे ॥**
**त्रय्यारुणिः पञ्चदशे षोडशे तु धनञ्जयः ॥**
**कृतञ्जयः सप्तदशे ऋणज्योऽष्टादशे स्मृतः ॥**
**ततो व्यासो भरद्वाजो भरद्वाजोत्तरगौतमः ।**
**गौतमादुत्तमो व्यासो हर्य्यात्मा योऽभिधीयते ।**

**अथ हर्य्यात्मनो वेणुः स्मृतो वाजश्रवास्तु यः ।**
**सोमो मुख्यायनस्तस्मात्तृणविन्दुरिति स्मृतिः ।**
**ऋक्षोऽभूद् भार्गवस्तस्माद् वाल्मीकिर्योऽभिधीयते ॥**
**तस्मादस्मात् पिता शक्तिर्व्यासस्तस्मादहं मुने ।**
**जातुकर्णोऽभवन्मत्तः कृष्णद्वैपायनस्ततः ॥**
**अष्टाविंशतिरित्येते वेदव्यासाः पुरातनाः ।**
**भविष्ये द्वापरे चापि द्रौणिर्व्यासो भविष्यति ।**
**व्यतीते मम पुत्रेऽस्मिन् कृष्णद्वैपायने मुनौ ॥**

देवीभागवते च सप्ददशतः क्रमः किञ्चिद् भिन्नो वर्तते । यथा -

**मेधातिथिः सप्तदशे व्रती ह्यष्टादशे तथा ।**
**अत्रिरेकोनविंशेऽथ गौतमस्तु ततः परम् ॥**
**उत्तमश्चैकविंशेऽथ हर्यात्मा परिकीर्तितः ।**
**वेनो वाजश्रवाश्चैव सोमोऽमुष्यायणस्तथा ॥**
**तृणविन्दुस्तथा व्यासो भागर्वस्तु ततः परम् ।**
**ततः शक्तिर्जातुकर्ण्यः कृष्णद्वैपायनस्ततः ॥**

वैवस्वतमन्वन्तरे अद्यावधि अष्टाविंशतिर्वेदव्यासा व्यतीताः । तैर्वेदव्यासैः पुनः पुनरवतीर्य वेदस्य ज्ञानं चतुर्धा विभक्तम् । तत्र सर्वतः प्रथमं प्रथमे द्वापरे स्वयं स्वयम्भुवा ब्रह्मणा व्यासरूपेणावतीर्य वेदा विभक्ताः । ते क्रमशोऽत्र निर्दिष्टा वर्तन्ते ।

| | | | |
|---|---|---|---|
| १. स्वयम्भूः | २. प्रजापतिः | ३. उशना | ४. बृहस्पतिः |
| ५. सविता | ६. मृत्युदेवः | ७. इन्द्रः | ८. वसिष्ठः |
| ९. सारस्वतः | १०. त्रिधामा | ११. त्रिवृषः | १२. भारद्वाजः |
| १३. अन्तरिक्षः | १४. धर्मः | १५. त्रय्यारुणः | १६. धनञ्जयः |
| १७. कृतञ्जयः (मेधातिथिः) | १८. ऋणज्यः (ऋणञ्जयः, व्रती) | १९. भरद्वाजः (अत्रिः) | २०. गौतमः |
| २१. हर्यात्मा उत्तमः | २२. वाजश्रवा वेणः | २३. आमुष्यायणः (सोमः) | २४. तृणविन्दुः |
| २५. ऋक्षः (भार्गवः, वाल्मीकिः) | २६. शक्तिः | २७. जातुकर्णः (जातुकर्ण्यः) | २८. कृष्णद्वैपायनो व्यासः |

आगामिनि द्वापरे च द्रौणिनामा व्यासो भविष्यति ।

व्यासानां नामविषये कूर्मपुराणे एतादृशो विशेषो वर्तते- द्वादशे द्वापरे शततेजाः, त्रयोदशे धर्मः, चतुर्दशे तरक्षुः, पञ्चदशे त्र्यायणः, अष्टादशे ऋतञ्जयः, एकविंशे वाजश्रवाः, द्वाविंशे शुष्मापणः, त्रयोविंशे तृणविन्दुः, चतुर्विंशे वाल्मीकिः, पञ्चविंशे विष्णुः इति । अन्यानि नामानि तु विष्णुपुराणनामभिः साम्यं भजन्ते । येषु पुराणेषु व्यासानां चर्चाऽस्ति तेषु सर्वेष्वपि अष्टाविंशतितमव्यासत्वेन कृष्णद्वैपायन एव स्वीकृतोऽस्ति ।

वेदा अनादयोऽपौरुषेयाश्च विद्यन्ते । वेदा अत्यन्तं विस्तीर्णा अपि सन्ति । प्रत्येकं द्वापरयुगान्ते मानवानां क्षीयमाणां बुद्धिमपक्षीयमाणमायुः न्यूनतां गच्छन्तीं मानवस्मरणशक्तिञ्च दर्शं दर्शं साधारणलोकोपकाराय मानवानां हिताय चैकस्मिन्नेव वेदस्वरूपे स्थितं ज्ञानं कृपालुर्वेदव्यासश्चतुर्धा विभक्तवान् । अतो व्यासपदेन व्यक्तिविशेषमपरिहाय कर्तव्यविशेषोऽपि परिगृह्यते । व्यास इति न कस्यचिदेकस्या व्यक्तेर्नाम अपि तु व्यास इत्युपाधेर्नामेति शास्त्रेषूपलभ्यते । वस्तुतस्तु एकस्मिन् द्वापरे एको व्यासश्चेदन्यस्मिन् द्वापरे अन्यो व्यासस्तदुपाधिमलङ्करोति ।

प्रायशो व्यासकृत्यं त्रिधा विभज्यते । सर्वेऽपि व्यासा एकस्मिन्नेव वेदस्वरूपे ग्रन्थे बहुविस्तीर्णं ज्ञानं लोकोपकाराय ऋग्यजुःसामाथर्वरूपेण चतुर्धा विभक्तवन्तः सन्ति । सर्वेऽपि व्यासा वेदरूपज्ञानविभाजनं वेदस्य विकाराय न, अपि तु व्यवस्थापनाय कृतवन्तः । वेदानां विभाजनं कृत्वा एकैकां वेदसंहितामेकैकं शिष्यं समुपदिश्य शिष्यस्थापनपरम्पराया विकासश्च तैर्विहितः । कृष्णद्वैपायनेनान्तिमव्यासेन च श्रुतिसंरक्षणाय पैलाय ऋक्संहिताम्, वैशम्पायनाय यजुःसंहिताम्, जैमिनये सामसंहितां तथैव सुमन्तवेऽथर्वसंहितामुपदिश्य शिष्यस्थापनपरम्परा व्यवस्थापिता । सर्वेऽपि व्यासाः कथोपकथामाध्यमेन विविधाख्यानानि वंशपरम्परां देवमानवकथाश्च सङ्कलितवन्तः । कृष्णद्वैपायनस्य तु महाभारतसहिताष्टादशपुराणसंहितादयो ग्रन्था व्यवस्थितरूपेण समुपलभ्यन्ते । एतेन चेतिहासपुराणादीनां बीजारोपणं पल्लवनं विकसनादिकञ्च विहितम् ।

अष्टाविंशतिसङ्ख्यकेषु व्यासेषु सर्वेषां कर्तव्यं समानमेव दृश्यते । अस्य वैवस्वतमन्वन्तरस्यास्माकं युगसन्धौ स्थितः कृष्णद्वैपायनो व्यास एव सर्वाधिकप्रसिद्ध इति एतद्युगीना वयं जानीमः । परन्त्वन्ये सर्वेऽपि व्यासाः स्वकाले लोकहितवृद्धिं कुर्वन्तः स्वकालिकप्रसिद्धिं लब्धवन्तः । व्यासपरम्परा वेदस्याविच्छिन्नप्रवाहपरम्परा विद्यते । केचिद् व्यासं विष्णोरवतारमेव मन्वते ।

पुराणेषु तत्राष्टाविंशतेर्व्यासानां नामान्येवोपलभ्यन्ते । कतमो व्यासः किं विशिष्टं कर्म कृतवानिति तत्र नैवोपलभ्यते । प्रतिद्वापरयुगान्तं व्यासोऽवतीर्य वेदादीन् विभजति, पुराणोपपुराणादीनि प्रणयति, ब्रह्मसूत्रादीनि च सूत्रयतीति पुराणेभ्योऽवगम्यते । एतदतिरिच्य सामाजिकव्यवस्थायाः सुसञ्चालनाय समाजधर्मसूत्राणि प्रणीय धर्मपरम्परायाः स्थापनं च व्यासैर्विहितं विलोक्यते ।

यज्ञाध्यापकरूपेण यज्ञकर्मविधिसम्पादनम्, सामाजिकधार्मिकनैतिकन्यायव्यवस्थां विचार्य तदनुरोधिमार्गप्रदर्शनम्, लोकनीतिधर्मनियमितकरणाय वैदिकविज्ञानसम्मतकर्मसु वारं वारं प्रेरणम्, नीतिशास्त्रविवेकप्रदर्शनम्, देवपूजनपरम्परास्थापनम्, देवतानां संवादयोग्यतानिर्धारणम्, उपनिषद्वेदान्तादिमार्गप्रदर्शनपूर्वकमाध्यात्मिकदीपस्य प्रकाशनं चेत्यादिकार्याणि प्रत्येकं व्यासेन विहितानि वर्तन्ते। संस्कृतिसाहित्यसंहितासम्बोधनपुरःसरं भाषावैज्ञानिकदीक्षादानप्रदर्शनम्, धर्माचरणमार्गविस्तारणम्, विविधदर्शनसिद्धान्तप्रदर्शनम्, ज्योतिषसाङ्ख्यश्रुतिक्षेत्रसमन्वयप्रदर्शनम् पुराणराशिसमन्वयसहित-महाभारतादीनां रचनया लोकोपकरणं च सर्वैरपि व्यासैर्विहितमस्ति। एतद् विचार्य सर्वेऽपि व्यासा वेदधर्मपुराणविस्तारे केन्द्रिता विद्यन्ते। कृष्णद्वैपायनव्यासस्यावदानं तु साम्प्रतमपि प्रत्यक्षं ग्रन्थरूपेण द्रष्टुं शक्यते। तेन वेदविभाजनपूर्वकमैतिहासिकधर्मग्रन्थरूपेण लक्षश्लोकात्मकं महाभारतं प्रणीतम्, अष्टादशसङ्ख्यकपुराणसंहिता प्रणीता, उपनिषत्तत्त्वसमन्वितब्रह्मसूत्राणां समाहारश्च सम्पादितः।

विशिष्टकार्ये नियुक्ताः एतेऽष्टाविंशतिर्व्यासा व्यवस्थानिर्धारका वर्तन्ते। नामरूपाणां समायोजनेन व्यासाः केवलं मानवमूर्तय एव नैव सन्ति अपि तु कर्मविशेषे दैवशक्त्याः प्रेरिता देवमानवयोः समन्वयाः सन्ति।

व्यासानतिरिच्य समाजे पुराणसम्पदः श्रुतिस्मृतिपरम्परायाश्च प्रतिष्ठापकाः पुराणविद्याप्रवर्तकाः कथाप्रचारका अन्ये षट् पौराणिका अपि समुपलभ्यन्ते। ते चैवं विद्यन्ते-

**त्रय्यारुणिः कश्यपश्च सावर्णिरकृतव्रणः।**

**वैशम्पायनहारीतौ षड् वै पौराणिका इमे॥**

एतदनुसारेण त्रय्यारुणि-कश्यप-सावर्णि-अकृतव्रण-वैशम्पायन-हारीता निश्चयेन पौराणिका आसन्। एतेषां सङ्क्षिप्तपरिचयोऽधः प्रस्तूयते-

१. **त्रय्यारुणिः** - औद्दालकस्य शिष्यो महर्षिस्त्रय्यारुणिः औपनिषदश्रौतपरम्परायां वैदिकाचार्यरूपेण गुरुशिष्यपरम्पराप्रमुखत्वेन च प्रथित आसीत्। ऋग्यजुःसामेति वेदत्रयस्य आरुणिपरम्परायां स्थितत्वादस्य नाम त्रय्यारुणिर्जातम्। अयं वेदपुराणयोः संयोजनकर्तृरूपेण प्रसिद्धो वर्तते।

२. **कश्यपः** - प्रजापतिवंशविख्यातो महर्षिः कश्यपो देवदानवमनुष्यादीनां वंशप्रवर्तकत्वेन पुराणेषु वर्णितो विद्यते। पौराणिककथानां पृष्ठभूमिः कश्यपपरम्परायां निहिता वर्तते।

३. **सावर्णिः** - सूर्यवंशसम्भूतो महर्षिः सावर्णिः सावर्णिमनुरूपेण मन्वन्तराधिपतिश्च वर्तते। पौराणिकेतिहासस्य कालं विभजन्नयं धर्मपरम्परां सुरक्षितवानासीत्।

४. **अकृतव्रणः** - पौराणिकविद्यायां निपुणो भृगुवंशोद्भवो मुनिरकृतव्रणो विशेषतः पितृवंश-राजवंशेतिहासानां प्रवचनकुशलः कथानां व्यवस्थितप्रचारकश्चासीत्।

५. **वैशम्पायनः** - वेदव्यासस्य शिष्यो महर्षिर्वैशम्पायनो यजुर्वेदाध्यायी महाभारतेतिहासादीनां सम्प्रसारकश्चासीत् । अनेन पौराणिकक्षेत्रे महद्योगदानं ददता पराशरव्यासशिष्यपरम्परा लोकहिताय समानीता दृश्यते ।

६. **हारीतः** - धर्मस्मृतिपरम्परायाः पौराणिकविचारेषु चायमङ्गिरसवंशावतंसो महर्षिर्हारीतो विशेषतः सामाजिकधर्माऽऽचारमूलकथानां व्याख्याता आसीत् ।

एते षट् पौराणिकाः श्रुति-स्मृति-इतिहासपुराणात्मकगुरुपरम्परायाः संवाहका आसन् ।

अपरत्र च ब्रह्मा-नारद-व्यास-शुकशिष्याणां पौराणिकगुरुशिष्यपरम्पराक्रमो विद्यते । सामान्यतया नैमिषारण्यमस्य प्रमुखं केन्द्रमासीत्, यत्र दीर्घसत्रेषु पुराणकथाः श्राव्यन्ते । एते षट् पौराणिकाः पुराणग्रन्थकर्तारः श्रवणवाचनव्याख्यानकर्तारो वंशमन्वन्तरकल्पेतिहासानां संरक्षका गुरुपरम्परया प्राप्तविद्यानां लोके प्रसारकाश्चासन् । इमे व्यासादागताः कथा लोकं प्रति नीतवन्तः । वैशम्पायनादयो व्यासपरम्परायाः प्रवक्तार आसन् ।

अनेकेषु पुराणेषु **इदं पुराणममुकाच्छ्रुतम्, ऋषयः पृष्टवन्तः** इत्यादिवाक्यैरेते पौराणिकाः श्रवणपरम्परायाः साक्षिणो निर्दिष्टा विद्यन्ते । एते पौराणिकाः स्वयं कथां पठित्वा शिष्यान् श्रावयन्ति स्म । एतया वाचनानुवाचनपरम्परया एते देश-काल-श्रोत्रनुसारं कथाया व्याख्यानं कुर्वन्ति स्म । एते षट् पौराणिका व्यासशुकादीनां तत्त्वज्ञानं व्यवहारोपयोगिकथाप्रवचनरूपेण ऋषि-राज-जनसमाजसमक्षं प्रापयन्ति स्म । पुराणश्रवणे एते षट् पौराणिका अष्टाविंशतिर्व्यासाश्च व्यासपरम्परायाः संवाहकाः कथाप्रवचनकर्तारो लोकानां धार्मिकेतिहासबोधकाश्चासन् ।

**शब्दार्थाः**

| | | |
|---|---|---|
| प्रथिताः | = | प्रख्याताः |
| अधिगन्तुम् | = | ज्ञातुम् |
| व्यतीताः | = | पूर्णताङ्गताः |
| अपक्षीयमाणम् | = | न्यूनायमानम्, ह्रसमानम् |
| प्रणयति | = | रचयति |
| अनुसृतम् | = | अनुसरणं कृतम् |
| संवाहकाः | = | प्रचारकाः |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तर

(क) व्यासशब्दस्य निष्पत्तिः कथं भवति ?

(ख) व्यासाः कति भवन्ति ?

(ग) प्रथमो व्यासः कोऽस्ति ?

(घ) अन्तिमो व्यासः कोऽस्ति ?

(ङ) वेदाः कीदृशा भवन्ति ?

(च) प्रतिद्वापरयुगान्तं व्यासाः किमर्थं वेदं विभजन्ते ?

(छ) व्यासस्य प्रमुखाः शिष्याः के सन्ति ?

(ज) व्यासः कं कं शिष्यं कं कं वेदं पाठितवान् ?

(झ) व्यासपरम्परा कस्याविच्छिन्नप्रवाहपरम्परा वर्तते ?

(ञ) षट् पौराणिकाः के सन्ति ?

(ट) श्रवणपरम्परायाः साक्षिणः के ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) अष्टाविंशतिव्यासानां नामानि कानि ?

(ख) लोकाय षण्णां पौराणिकानां किमवदानं वर्तते ?

(ग) व्यासाः किं कृतवन्तः ?

(घ) व्यासादागताः कथा लोके के प्रसारयन्ति ?

(ङ) अकृतव्रणवैशम्पायनहारीतानां पौराणिकानां योगदानं किमस्ति ?

### ३. षण्णां पौराणिकानां कर्तव्यं स्वकीयैः शब्दैर्लिखत ।

### ४. अष्टाविंशतिव्यासानां कर्तव्यं लोकायावदानञ्च विवेचयत ।

**५. 'व्यास इति न कस्या अपि व्यक्तेर्नाम अपि तु तस्योपाधेर्नाम' इति पाठमाधृत्य सुस्पष्टं व्याख्यात ।**

**६. अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

इह खलु जगति मानवजीवनस्य प्रधानं लक्ष्यं चतुर्वर्गफलप्राप्तिर्भवति। यदर्थं भृशं प्रयतमानेषु पुरुषेषु कश्चनैव पुण्यवान् स्वकीयं मनोरथं पूरयितुं समर्थो भवति, यतो हि श्रेयांसि बहुविघ्नानि। श्रेयःपथे अग्रेसरन्तं जनं विघ्नभूता बहवोऽन्तराया बाधन्ते। अन्ततो गत्वा स एव जन उत्तमकोटौ प्राप्स्यति यः कार्यं प्रारभ्य सफलताप्राप्तिपर्यन्तं बद्धपरिकरो भूत्वा निरन्तरं प्रयतते।

**प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्य विघ्नविहता विरमन्ति मध्याः।**
**विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारभ्य चोत्तमजना न परित्यजन्ति ॥**

नीचा जना विघ्नानां भयेन कार्यमेव न प्रारभन्ते। मध्यमजनाः कार्यं प्रारभ्य विघ्नैर्विहताः सन्तो मध्ये एव कार्याद् विरमन्ति। उत्तमजनास्तु विघ्नैः पुनः पुनः प्रतिहन्यमाना अपि प्रारब्धं कार्यं कदापि न त्यजन्ति।

प्रारीप्सितकार्यविघातकेषु विघ्नेष्वस्वास्थ्यमप्यन्यतमकारणं भवति। येन न केवलं कार्यसिद्धिरेवावरुद्धा जायते अपि तु कार्यकर्तुः प्राणहानिरपि सम्भवति। महाकविना कालिदासेन विषयोऽयं सूक्तिरूपेण निर्दिष्टः शरीरमाद्यं खलु धर्मसाधनमिति। कश्चिद् मानवः यत्किमपि कार्यं कर्तुमुद्यतो भवति तदर्थं स्वस्थशरीरस्य परमावश्यकता भवति। स्वस्थशरीरमन्तरा कोऽपि किमपि कर्तुं न पारयति। स्वस्थया बुद्ध्या विचार्य कृतं कार्यं श्रेयसे स्थेयसे च कल्पते। इदमपि शास्त्रेषु दृश्यते यत् शरीरं व्याधिमन्दिरम् इति। यावन्तो रोगाश्चिकित्साग्रन्थेषु वर्णिताः सन्ति तेषामधिष्ठानं शरीरमेव भवति। अतः स्वस्थस्य स्वास्थ्यरक्षणमातुरस्य व्याधेः परिमोक्षणं चायुर्वेदस्य प्रयोजनद्वयं वर्तते। स्वस्थजनेन स्वास्थ्यरक्षायै प्रयत्नो विधेयः। आतुरेण च शीघ्रमेव तस्य चिकित्सा कर्तव्या। न हि स्वास्थ्यादृते मानवः किमपि कर्तुं पारयति।

धमार्थकाममोक्षेषु मोक्षस्य प्राधान्यं विद्यते। स च मोक्षो धर्मादनपेताभ्यामर्थकामाभ्यामुपलभ्यते। अर्थेन सर्वाणि कार्याणि सांसारिकसुखानि च सुलभानि भवितुं शक्नुवन्ति। कामेनैन्द्रियकसुखोपभोगः सम्भवति। इत्थं विचिन्तनेन ज्ञायते यच्चतुवर्गफलप्राप्तेः प्रधानं कारणं धर्म एवास्ति। तेषां समेषां मूलरूपेणारोग्यं विराजते। यतो ह्यस्वस्थो जनः सर्वथा परवशो भवति। चिकित्सकः पृच्छति 'कथं तव रोगो वृद्धिङ्गतः ? किं त्वयैतदपथ्यमाचरितम् ?' स कथयति न मयैतत् कृतम्। स जानन्नपि अनारोग्यचपलेन्द्रियोऽसत्यभाषणरूपमधर्ममाचरतीति सर्वेषामनुभवो दृश्यते।

एवमेवार्थोपार्जनेऽप्यारोग्यस्य परमावश्यकता भवति । यतो हि व्यापारे लक्ष्मीर्वसति, स एव व्यापारं कर्तुं प्रभवति यः सर्वात्मना नीरोगो वर्तते । व्यापारिणः पुरुषा अहर्निशं कार्येषु व्यापृता दृश्यन्ते । बसादियानेषु, द्विचक्रिका-त्रिचक्रिका-चतुश्चक्रिका-वायुयानादिषु वाहनेषु च जनानां यः संरम्भो दृश्यते स प्रायेण व्यापारमूलक एव । यदि नाम मानवो विविधै रोगैरेकेन वा रोगेण पीडितः स्यात् तर्हि कथं स व्यापारे प्रभवेत् ? असमर्थश्चेदर्थहीनतां यास्यति । ततोऽनर्थैः परिवारितो भविष्यति । यदि पैतृकं धनं विपुलं स्यात्तर्ह्यपि तत्सर्वं चिकित्सायां व्ययीभविष्यति । अशेषं धनं लुण्ठका आत्मसात् करिष्यन्ति । अस्वस्थावस्थायां न किमपि स्वात्मार्थे तस्योपभोगं कर्तुं स सक्षमो भविष्यति । आरोग्यविहीनस्य तेन धनेन किं भवेत् ?

सर्वाङ्गसुन्दरः, सुखसाधनशतैः समन्वितोऽपि रुग्णः क्षीणसर्वेन्द्रियः स केवलं रोदिति न च सुखभोगादिकमुपभोक्तुं प्रभवति । अतः सर्वैरपि मानवैरात्मनो जीवनं धार्मिकप्रकारेणारोग्यमूलकं करणीयम् । आरोग्यसम्पादनाय प्रमुखतया केचन नियमा विद्यन्ते । यथा हिताशी स्यान्मिताशी स्यात् कालभाजा जितेन्द्रियः । एतस्यायमेवाशयो यद् हितकरं भोजनमश्नीयात्तदपि परिमितं निश्चितसमयानुसारं सेवनीयम्, तत्रापि जितेन्द्रियतायाः परमावश्यकता भवति । यदि मानवः स्वाऽऽरोग्यस्य सम्पादनं न कुर्यात् तर्हि न केऽपि तस्मिन् स्निह्येयुः ।

**वनानि दहतो वह्नेः सखा भवति मारुतः ।**

**स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥**

अतो ब्रह्मचर्यादिनियमपरिपालनेन यथारोग्यलाभः स्यात्तथा प्रयतनीयम् । आरोग्यादृते मानवस्य न कोऽपि सखा विद्यते, प्रत्युत यथाक्रमं सर्वेऽपि शत्रुभावमापद्यन्ते । यतो हि स्वस्थशरीरवानेव मानवो धर्मार्थकाममोक्षादीन् प्राप्तुं समर्थो भवति ।

## प्रश्नाः

(क) मानवजीवनस्य मुख्यं लक्ष्यं किमस्ति ?

(ख) स्वकीयमनोरथान् पूरयितुं कः समर्थो भवति ?

(ग) के मानवमाकर्षन्ति ?

(घ) कीदृशा जनाः किमर्थं प्रारब्धकर्म परित्यजन्ति ?

(ङ) कर्माणि कर्तुं स्वस्थजीवनस्य आवश्यकता किमर्थं भवति ?

(च) शरीरं रोगाणामधिष्ठानं कथं भवति ?

(छ) अनारोग्यो जनः किं किं कर्तुं न पारयति ?

(ज) भावविस्तारं कुरुत

हिताशी स्यात् मिताशी स्यात् कालभाजा जितेन्द्रियः ।

(झ) मारुतः कस्य सखा वर्तते ?

(ञ) तात्पर्यं प्रकाशयत

प्रारभ्यते न खलु विघ्नभयेन नीचैः प्रारभ्यविघ्नविहता विरमन्ति मध्याः ।
विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः प्रारभ्य चोत्तमजना न परित्यजन्ति ॥

(ट) अधस्तनपद्यस्य सरलार्थं लिखत

वनानि दहतो वह्नेः सखा भवति मारुतः ।
स एव दीपनाशाय कृशे कस्यास्ति सौहृदम् ॥

**७. मम शरीरं नीरोगमस्तीति विषयमवलम्ब्यमेकमनुच्छेदं लिखत ।**

**८. अभिभावकं सम्पृच्छ्य यथेच्छं वा पुराणाश्रितां नैतिकशिक्षादायिनीं लघुकथां विलिख्य शिक्षकं दर्शयत ।**

### *परियोजनाकार्यम्*

**व्यासविरचितानां ग्रन्थानां नामानि अन्विष्य तेषु कस्यापि एकस्य ग्रन्थस्य परिचयं लिखित्वा कक्षायां प्रस्तुत ।**

# वेदव्यासः

पौरस्त्यसंस्कृतेर्महाकाशे यानि नक्षत्राणि दीप्तानि दृश्यन्ते तेषु कृष्णद्वैपायनो व्यासः परमतेजस्वि नक्षत्रं विद्यते। स धर्मदर्शनेतिहासादिपौरस्त्यपुराणपरम्पराणां समन्वयकर्ता संस्कर्ता प्रसारकश्च विद्यते। कृष्णद्वैपायनव्यासस्य व्यक्तित्वं कृतित्वं च यावद्विस्तीर्णं तावद् गभीरञ्च समुपलभ्यते। स सनातनसंस्कृतेश्चिरन्तनप्रतीकरूपेण विराजते। पौरस्त्यवाङ्मये वैवस्वतमन्वन्तरेऽष्टाविंशतेर्व्यासानां परिगणना विद्यते। व्यस्यति वेदानिति व्युत्पत्त्या निष्पन्नो व्यासशब्दो व्यास इत्युपाधिं जनयति। व्यास इति विस्तारकर्तुरपरं नाम। अष्टाविंशतिसङ्ख्यकेषु व्यासेषु चरमो व्यासः कृष्णद्वैपायननामको विद्यते। अस्य व्यासस्य कृष्णवर्णत्वात् कृष्ण इति, द्वीपे जातत्वाद् द्वैपायन इति, वेदानां विस्तारकत्वाद् व्यास इति च नामानि सङ्कलय्य कृष्णद्वैपायनव्यासनाम्ना प्रसिद्धिर्वर्तते। व्यासस्य कुलपरम्परा महाभारते एवं निर्दिष्टा विद्यते-



**व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।**
**पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥**

अस्य पद्यस्यानुसारेण व्यासो महर्षेर्वसिष्ठस्य प्रपौत्रः, निष्पापस्य महात्मनः शक्तेः पौत्रः, पराशरस्यात्मजः पुत्रश्चासीत् ।

व्यासस्य कुलविषये ब्रह्मवैवर्तपुराणेऽपि महाभारतसदृश एव प्रसङ्गो लभ्यते -

**वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशरः ।**
**पराशरसुतः श्रीमान् कृष्णद्वैपायनो हरिः ।**

वेदव्यासस्त्रिकालदर्शी स्वेच्छानुसारेण गतिमांश्चासीत् । स सर्वेषां मनसश्चिन्तनं विचारं च ज्ञातुं शक्नोति स्म । स इच्छयैव तत्कालं यत्र कुत्रापि गन्तुं समर्थ आसीत् ।

महाभारतानुसारेण व्यासजन्मसम्बद्धा कथा एवंविधा वर्तते-

एकदा पराशरः ऋषिर्यमुनायास्तटं प्राप्य नौकां चालयितुं निषादमन्वरुणत् । परन्तु भोजनं कुर्वन् निषाद आत्मनः सुतां मत्स्यगन्धां मुनिं पारेयमुनं प्रापयितुमाज्ञापयामास । ततो मत्स्यगन्धा नौकायामासीनं मुनिं संवाहयामास । कस्यचन महापुरुषस्य गर्भागमनग्रहानुकूलतां परिलक्ष्य दैवयोगात् पराशरश्चारुलोचनां मत्स्यगन्धां प्रत्यनुरक्तो जातः । मुनेर्धर्मच्युतिं वीक्ष्य विस्मिता मत्स्यगन्धा उक्तवती-

**कुलेन शीलेन तथा श्रुतेन द्विजोत्तमत्वं किल धर्मविच्च ।**
**अनार्यभावं कथमागतोऽसि विप्रेन्द्र मां वीक्ष्य च मीनगन्धाम् ॥**

पराशरो दुर्गन्धामपि तां योजनसुगन्धां सुरूपां च कृत्वा 'तव त्रैलोक्ये विख्यातः पुत्रो भविष्यति' इत्यवदत् । ततो मत्स्यगन्धायाः स्वीकृतौ स तस्यां गर्भमाधाय यमुनायां स्नात्वा स्वाश्रमं जगाम । मत्स्यगन्धापि ऋषिप्रसादेन सुगन्धयुक्ता सत्यवती अभवत् । गर्भवती सा आषाढमासस्य शुक्लपूर्णिमायां जन्मन एव जटाधारिणं परमतेजस्विनं च बालकं पुत्रं यमुनाद्वीपे सुषुवे ।

स जन्मकालादेव वेदवेदाङ्गतत्त्वज्ञस्तपस्विभावयुक्तश्चासीत् । जन्मनोऽनन्तरमेव स मातुराज्ञया तपस्तप्तुं वनं गतवान् । गमनसमये स 'मातः ! यदा स्मरिष्यसि तदा क्षणमात्रेणाहमागमिष्यामि' इत्युक्तवान् । एष एव कृष्णद्वैपायनो व्यासो भगवतो नारायणस्य सप्तदशोंऽशावतारो मन्यते । स वेदसंरक्षणार्थं लोकेऽवातरत् । तन्माता मत्स्यगन्धा पश्चात् शन्तनुना सह विवाहं कृत्वा हस्तिनापुरस्य महाराज्ञी बभूव ।

व्यासस्य जन्म नेपालस्य तनहुँमण्डलस्य दमौलीति स्थाने माद्रिकाशुक्लागण्डक्योः सङ्गमेऽभवदिति योगी नरहरिनाथस्तु 'देवदेशो हिमालयः' इति नामके ग्रन्थे निश्चितवानस्ति । यथा -

**दमौलीजन्मा बदरीवनस्थो व्यासो मुनिः सत्यवतीसुतोऽसौ ।**

**पराशरात्मा सरिदन्तराले चिरं चकारात्र तपस्तपस्वी ॥**

अस्य निकटे एव पारकोटनामकं स्थानं विद्यते । तत्र माद्रिकाशुक्लागण्डक्योः सङ्गमे तपसः सिद्धिप्रदायिनी पराशरगुहाऽद्यापि वर्तते । सा गुहा महर्षेः पराशरस्य तपःस्थलीति स्कन्दपुराणस्य हिमवत्खण्डे वर्णितमस्ति । व्यासोऽपि तत्रैव पञ्चगङ्गासङ्गमस्थले चिरकालं तपस्तप्तवानिति योगी नरहरिनाथो विश्वसिति ।

पुराणेषु व्यासस्य तपःस्थलीत्वेन विविधानां स्थानानां चर्चा विद्यते । तेषु प्रथमो बदरिकाश्रमो वर्तते । इदं बदरीनारायणस्य समीपवर्ति स्थानमस्ति । तत्र नारदेन साकं व्यासस्य संयोगोऽभवत् । दीर्घसत्रिणामृषीणां पुराणसंहितादीनां प्रवचनस्थलं नैमिषारण्यक्षेत्रम्, सरस्वतीनद्यास्तीरम्, शम्याप्रासक्षेत्रं च व्यासस्य तपसः क्षेत्राणीति पुराणेषु चर्चितमस्ति । एषु क्षेत्रेषु दीर्घकालपर्यन्तं निवासं कृत्वा मौनव्रती सन् भगवद्ध्यानेन समाधिसम्पन्नं सुदीर्घकालिकञ्च तपस्तप्त्वा वेदव्यासो ज्ञानं लब्धवानिति विश्वस्यते ।

वेदव्यासस्य पत्नी अरुणी-वटिका-पिङ्गलादिनामभिः सूचिता दृश्यते परं सा एकैवास्ति । जन्मत एव ब्रह्मज्ञानी विरक्तोऽवधूतस्वभावः श्रीमद्भागवतस्योपदेष्टा शुकदेवो व्यासस्य पुत्र आसीत् । कुरुवंशसंरक्षणाय मातुः सत्यवत्या आज्ञया नियोगविधिना जनिता धृतराष्ट्रपाण्डुविदुरा अपि अस्य पुत्रा एवासन् ।

तपस्या यद्यपि आत्मोन्नयनार्थं तप्यते तथापि वेदव्यासस्य तपस्या वेदसंरक्षणाय, धर्मसंस्थापनाय, लोककल्याणाय, महाभारतेतिहासपुराणब्रह्मसूत्रादीनां प्रवर्तनाय च प्रेरिता आसीत् । नारायणस्यांशावतारोऽयं व्यासो जन्मानन्तरमेव तपस्तप्तुं वनं गतवान् । अयं बाल्यादेव ब्रह्मचर्यव्रतम्, इन्द्रियनिग्रहं मौनव्रताभ्यासञ्चाकरोत् । बाल्यकालादेव स तपःशीलो ब्रह्मचर्यनिष्ठो वैराग्यपरायणश्चासीत् । स ग्राम्यजीवनाद् विरक्तः सन्नरण्यवासं कृत्वाऽऽध्यात्मिकसाधनायां जीवनं यापयामास ।

आदौ ज्ञानराशिर्वेद एक एवासीत्, स श्रुतिरूपेण गुरुपरम्परया प्रवहमाणश्चासीत् । कालान्तरे जनसामान्यस्यापक्षीयमाणं बोधस्तरमवलोक्य व्यासस्तं वेदमृग्यजुःसामाथर्वनामभिश्चतुर्धा व्यवस्थाप्य विभज्य च यथाक्रमं पैलवैशम्पायनजैमिनिसुमन्तुभ्यः स्वशिष्येभ्यः प्रदत्तवान् । एष वेदविभागो निखिलमानवसंस्कृतेः संरक्षणाय विहितं कर्माऽऽसीत् ।

विश्वस्य विशालकायं लक्षश्लोकात्मकं महाभारतमहाकाव्यं भगवता व्यासेन प्रणीतं वर्तते । इतिहासशब्देन सुगृहीतं महाभारतं कुरुपाण्डवानां युद्धकथया सहितं धर्मस्य सूक्ष्मतमस्वरूपविवेचनपरं शास्त्रमस्ति । 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' इति कथनान्महाभारतेऽप्राप्यं संसारे न किमप्यस्तीति महाभारतेनैव सूचितं विद्यते । महाभारते व्यासो राजधर्मम्, आपद्धर्मम्, स्त्रीधर्मम्, कर्तव्यद्वन्द्वम्, मानवस्य दुर्बलताम्, नैतिकसङ्घर्षांश्चात्यन्तगभीरतया निरूपितवानस्ति । अथ किम् ? चतुर्विधा एव पुरुषार्था महाभारते निरूपिताः सन्ति । उक्तञ्च-

**धर्मशास्त्रमिदं पुण्यमर्थशास्त्रमिदं परम् ।**
**मोक्षशास्त्रमिदं प्रोक्तं व्यासेनामितबुद्धिना ॥**

श्रीमद्भगवद्गीता महाभारतस्य हृदयं विद्यते। अत्र श्रीकृष्णार्जुनयोः संवादरूपेण कर्मयोग-ज्ञानयोग-भक्तियोगादयो विषया ससमन्वयं प्रतिपादिता विद्यन्ते ।

अष्टादशानां पुराणानां च कर्ता वेदव्यास एवास्ति । श्रीमद्भागवतमहापुराणे व्यासस्य भक्तिरसपरिपक्वता, आत्मसाक्षात्कारः, नारदोपदेशप्रभावश्चेत्यादयः स्पष्टतया दृश्यन्ते । व्यासो ब्रह्मसूत्राणामपि कर्ता वर्तते । उपनिषदां विषया अत्र सूत्ररूपेणोपस्थापिताः सन्ति । शङ्कराचार्यादयः पौरस्त्यदार्शनिका एतेषां सूत्राणां भाष्याणि विरचय्य अद्वैतादिदर्शनपरम्परां व्यवस्थापितवन्तः ।

व्यासस्य दर्शनं समन्वयात्मकं विद्यते । स कर्मणो ज्ञानस्य भक्तेश्च समन्वयं वाञ्छति । व्यासस्य मते धर्मः कठोरनियममार्गो नास्ति । तन्मते धर्मो करुणा-विवेकात्मबोधानां संयुक्तो जीवनमार्गोऽस्ति। वेदव्यासः पौरस्त्यसंस्कृतेर्मेरुदण्डरूपेण प्रतिष्ठितो वर्तते। अस्य व्यक्तिवृत्तं कृतित्वञ्च न केवलं पौरस्त्यादिदेशेषु एव, अपि तु विश्वस्मिन् मानवतां प्रेरयति, सन्मार्गञ्च प्रदर्शयति । व्यासो हि गुरूणां गुरुर्मन्यते । अतः प्रतिवर्षं गुरुपूर्णिमा व्यासजयन्तीरूपेण समाद्रियते ।

## शब्दार्थाः

| | | |
|---|---|---|
| कामयन्ते | = | अभिलषन्ति |
| संस्कर्ता | = | परिष्कारकर्ता |
| परिलक्ष्य | = | दृष्ट्वा विचार्य |
| भुक्त्वा | = | भोगं कृत्वा |
| झटिति | = | शीघ्रम् |
| अवधूतस्वभावः | = | स्वात्मरमणः |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) धर्मदर्शनेतिहासपुराणानां संस्कर्ता समन्वयकर्ता च कोऽस्ति ?

(ख) व्यासशब्दस्य व्युत्पत्तिः कथं भवति ?

(ग) कृष्णद्वैपायनशब्दस्यार्थः कः ?

(घ) वेदव्यासस्य पितुर्मातुश्च नाम किमस्ति ?

(ङ) जन्मनोऽनन्तरमेव तपस्तप्तुं वनं को गतवान् ?

(च) वेदव्यासस्य पत्न्याः नाम किमस्ति ?

(छ) वेदव्यासस्य पुत्रः कः ?

(ज) योगिनो नरहरिनाथस्य मते व्यासस्य जन्मस्थली का मन्यते ?

(झ) व्यासः कीदृशं महाभारतं रचितवान् ?

(ञ) व्यासजयन्ती कदा समाद्रियते ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) व्यासस्य व्यक्तित्वं कीदृशमस्ति ?

(ख) कृष्णद्वैपायनस्य जन्मनः प्रसङ्गं लिखत ।

(ग) पराशरेण मत्स्यगन्धायै वररूपेण प्रदत्ताशीर्वादाः के ?

(घ) व्यासस्य दर्शनं कथं समन्वयात्मकं मन्यते ?

(ङ) व्यासविरचितानि पुराणानि किं वर्णयन्ति ?

(च) वेदव्यासः किमर्थं वेदानां विभाजनं कृतवान् ?

(छ) वेदव्यासेन महाभारते किं प्रतिपादितम् ?

(ज) वेदव्यासस्य तपसो महत्त्वं किमस्ति ?

(झ) तात्पर्यं प्रकाशयत

धर्मः कठोरनियममार्गो नास्ति, धर्मस्तु करुणा-विवेकात्मबोधानां संयुक्तो जीवनमार्गोऽस्ति ।

३. 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' अस्याशयं स्फुटीकुरुत ।

४. वेदव्यासेन के ग्रन्था विरचिताः ? ते च कस्मिन् कस्मिन् विषये सम्बद्धाः सन्ति ?

५. वेदव्यासस्य जीवनचरितं सङ्क्षिप्य लिखत ।

६. अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत

महाभारते भीष्मो धर्मस्य त्यागस्य व्रतपरायणतायाश्च सजीवः प्रतिमूर्तिरस्ति । कौरवाणां पाण्डवानां च पितामहः स पौरस्त्यधार्मिकचिन्तनस्यादर्शपुरुषो मन्यते । तस्य जीवनं धर्मनिष्ठाया अखण्डप्रवाह आसीत् । राज्ञः शन्तनोर्गङ्गादेव्याश्च औरसपुत्रो भीष्मो बाल्यकाले एव दिव्यलक्षणैर्युक्त आसीत् । अष्टवसुषु अन्यतमोऽयं वसिष्ठस्य शापवशाद् मनुष्यलोकेऽवतीर्णः । देवतुल्यव्रताचरणात् स देवव्रतनाम्ना प्रथितो बभूव । वसिष्ठपरशुरामादीनां सान्निध्ये गुरुकुले शिक्षां प्राप्य स सर्वविद्याविशारदोऽतिरथश्चाभवत् । देवव्रतस्य पिता शन्तनुः सत्यवतीमुद्वोढुमैच्छत् । स सत्यवत्याः पितुः शपथेन बाधित आसीत् । स्वजीवनादपि पितुः सुखमधिकं मन्वानो देवव्रतो राज्यत्यागपूर्वकमाजीवनं ब्रह्मचर्यपालनस्य भीषणां प्रतिज्ञामकरोत् । अस्याः प्रतिज्ञाया भीषणतां दृष्ट्वा देवताश्च विस्मिता जाताः । शन्तनुश्च देवव्रताय इच्छामृत्युरूपं वरमददात् । ततः प्रभृति देवव्रतो भीष्मनाम्ना प्रथितोऽभवत् । भीष्मे दुःखसुखयोः समभावना आसीत् । स हस्तिनापुरराज्यस्य कुरुवंशस्य च संरक्षणार्थं सदा सेवाभावेन सन्नद्धो बभूव । हस्तिनापुरराज्यस्य राजनीतिकसङ्कटेषु, विवाहादिनिर्णयेषु, उत्तराधिकारविवादेषु स धर्मं कुलहितञ्च सर्वदा पुरस्कृतवान् । भीष्मो महाभारतयुद्धे धर्मसङ्कटापन्नामवस्थामनुभूतवान् । पाण्डवान् प्रति स्नेहयुक्तोऽपि राजभक्त्या स्वधर्मव्रतस्य पालनाय स कौरवाणां सेनापतित्वं बिभ्राणो युद्धे प्रवृत्तः । युद्धे तस्य शौर्यमनुपमेयमासीत् । दश दिनानि यावत् पाण्डवसेनाया निरोधं कुर्वन् स देवैरप्यजेयं पराक्रमं प्रादर्शयत् । अन्ततः शिखण्डिनं पुरस्कृत्यार्जुनेन प्रहितैर्बाणैः स रणभूमौ निपतितः । पतितोऽपि स इच्छामृत्योः कारणेन उत्तरायणपर्यन्तं प्राणान् धृत्वा शरशय्यायामशेत । तदानीमेव भगवतः श्रीकृष्णस्याज्ञया स युधिष्ठिरं प्रति राजधर्मापद्धर्ममोक्षधर्मानुपदिष्टवान् । ते सदुपदेशा महाभारतस्य शान्तिपर्वण्यनुशासनपर्वादिषु च विलोक्यन्ते ।

**प्रश्नाः**

(क) भीष्मः केषां पितामह आसीत् ?

(ख) भीष्मः कुतः शिक्षां लब्धवान् ?

(ग) भीष्मस्य पितुः मातुश्च नाम किमस्ति ?

(घ) भीष्मः सर्वदा किं पुरस्कृतवान् ?

(ङ) भीष्मस्य शौर्यं कीदृशमासीत् ?

(च) भीष्मः कदापर्यन्तं शरशय्यायामशेत ?

(छ) भीष्मो युधिष्ठिरादीन् किमुपदिष्टवान् ?

(झ) भीष्मोपदेशः कुत्र लभ्यते ?

## ७. सस्वरं पठित्वा आशयं लिखत

गृहे नित्यं बाला गणयति कराग्रेण दिवसान्

तथा कीनाशोऽपि प्रतिदिनमपेक्षाञ्च कुरुते ।

मया नाप्ता विद्या धनमपि तथा नार्जितमहो

न जाने कस्याहं वद सदनगामी च गिरिजे ॥

## ८. परस्परं मेलयत

| | |
|---|---|
| ऋग्वेदः | वैशम्पायनः |
| यजुर्वेदः | सुमन्तुः |
| सामवेदः | पैलः |
| अथर्ववेदः | जैमिनिः |

## ९. 'व्यासस्य दर्शनं समन्वयात्मकं विद्यते' इत्यस्या उक्तेराशयं स्फुटीकुरुत ।

## *परियोजनाकार्यम्*

**अधो लिखितानां महाभारताश्रितानां नारीचरितानां काँश्चन प्रेरकपक्षान् समाविश्य एकैकमनुच्छेदं विरचयत**

(क) सत्यवती (ख) गान्धारी (ग) कुन्ती (घ) द्रौपदी

# वेदव्यासस्यावदानम्

व्यासो भारतवर्षस्य सनातनधर्मसंस्कृत्योः वर्णाश्रमधर्मव्यवस्थायाश्च व्याख्याता प्रधान ऋषिरस्ति । स गुरुपरम्पराया उन्नायको मन्यते । यद्यपि व्यासस्य ज्ञानार्जनविषये विस्तरेण कुत्रापि चर्चा न लभ्यते तथापि स तपसः प्रभावेण ज्ञानसम्पन्नोऽभवदिति प्रसिद्धिर्वर्तते । व्यासो हि अलौकिकशक्तिसम्पन्नो महापुरुष आसीत् । तेन यानि ग्रन्थरत्नानि प्रणीतानि तानि साधारणमनुष्यस्य सामर्थ्यवशं नायान्ति । ज्ञान-भक्ति-वैराग्यादिभावनामुद्भाव्य ब्रह्मविद्यालोकं प्रकाश्य च व्यासो मानवमानसं समशोधयत् । स समये समये कौरवपाण्डवान् विपुलसङ्कटाद् ररक्ष, अन्यानि हिताधायकानि कार्याणि च चकार । व्यासस्यैवोपदेशेन आशीर्वचनेन च कुरुवंश्या व्ययसाध्यानि बहुकालव्यापीनि च यज्ञानुष्ठानादीनि सम्पादयामासुः । ग्रन्थसम्पादन-कथाविन्यसन-दर्शनप्रतिपादनेतिहासप्रकाशनादिकार्येषु व्यासो विस्मयजनकं कौशलं प्रादर्शयत् ।

व्यासो वेदस्य विभाजकः । पुरा वेदराशिरेक एवासीत् । तं वेदराशिं ऋग्वेदयजुर्वेदसामवेदाऽथर्ववेदरूपेण चतुर्षु भागेषु स विभक्तवान् येन वेदस्याध्ययनाध्यापने सरलेऽभूताम् । अतः स वेदव्यासनाम्ना प्रख्यातो जातः । उक्तञ्च -

**विव्यास वेदं यस्मात्स वेदव्यास इति स्मृतः ।**

वेदस्य सहस्राधिकाः शाखाभेदाः सन्ति । द्वापरे द्वापरे युगे विष्णुर्व्यासावतारं धृत्वा जगत्कल्याणार्थमेकमेव वेदं सुबहुधा कुरुते इति विष्णुपुराणे उक्तमस्ति । तद् यथा-

**द्वापरे द्वापरे विष्णुर्व्यासरूपो महामुनिः ।**
**वेदमेकं सुबहुधा कुरुते जगतो हितः ॥**

व्यासः कलौ मनुष्याणां धारणशक्तेः, वीर्यस्य, तेजसश्चाल्पीयत्वं ज्ञात्वा जगत्कल्याणाय वेदविभाजनं चकार । तेनैव कारणेन वेदस्य ऋग्यजुःसामाथर्वाख्याश्चत्वारो भेदाः, तेषां शाखाश्च जाता इति पुराणेषु प्राप्यते ।

**ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ।**
**इतिहासपुराणं च पञ्चमो वेद उच्यते ।**

वेदव्यासो विभक्तान् वेदान् पैलम्, सुमन्तुम्, जैमिनिम्, वैशम्पायनञ्चाऽध्यापयामास। तत्र पैल ऋषिः ऋग्वेदधरोऽभूत्। जैमिनिः सामगोऽभवत्। वैशम्पायनो यजुषां विषये निष्णातो जातः। सुमन्तुर्मुनिरथर्ववेदविषयान् धारयमास। रोमहर्षणश्च इतिहासपुराणानां ज्ञाताऽभवत्।

ब्रह्मनद्याः सरस्वत्याः पश्चिमे तटे शम्याप्रास इति प्रसिद्धो व्यासस्य आश्रम आसीत्। तस्मिन्नेवाश्रमे अप उपस्पृश्य आसीनो व्यासः समाधौ मनः स्थिरीकृतवान्। तदुक्तं भागवते-

**ब्रह्मनद्यां सरस्वत्यामाश्रमः पश्चिमे तटे।**

**शम्याप्रास इति प्रोक्त ऋषीणां सत्रवर्धनः॥**

वेदविभाजनसम्पादनादिकार्यैः दार्शनिकैतिहासिकपौराणिकग्रन्थानां प्रणयनेनानेन लोकाय ऐहिकामुष्मिकालोकः प्रदर्शितः। ततो वेदसारभूतं ब्रह्मतत्त्वं प्रतिपादयितुमसौ ब्रह्मसूत्रं विरचय्य वेदस्य ज्ञानमार्गं प्रावर्तयत्। ब्रह्मसूत्रोपरि बहुभिर्विबुधैर्भाष्याणि कृतानि। तेषु विद्वत्सु आद्यशङ्कराचार्यः, भास्कराचार्यः, रामानुजाचार्यः, मध्वाचार्यः, निम्बार्काचार्यः, श्रीकण्ठाचार्यः, श्रीपतिः, वल्लभाचार्यः, विज्ञानभिक्षुः, बलदेवाचार्यश्च प्रमुखाः सन्ति। न केवलमास्तिकदर्शनेष्वेव, अपि तु अर्वाचीनेष्वाधुनिकेषु च नास्तिकदर्शनेष्वपि ब्रह्मसूत्रस्य प्रभावो दृश्यते। एतत् सर्वं व्यासस्यैवावदानमेव विद्यते।

व्यासो विशालकायं महाभारतं रचितवान्। महाभारतं पञ्चमवेदत्वेन प्रसिद्धं वर्तते। महाभारतं न केवलं महान् ग्रन्थः, अपि तु प्राच्यधर्मदर्शनसंस्कृतिनीतीनां धर्मार्थकाममोक्षसम्बद्धानां विद्यानां च विश्वकोषो मन्यते। महाभारते एवोक्तं वर्तते-

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।**

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥**

महाभारतस्य भीष्मपर्वणि श्रीमद्भगवद्गीता वर्तते। सा वैदिकसनातनधर्मस्य प्रमुखग्रन्थेष्वन्यतमा। वेदव्यासो वेदार्थस्योपबृंहणेन महाभारतं पुराणानि च रचयामास।

आर्यावर्तस्येतिहासदर्शकं महाभारतं व्यासस्य विशिष्टमवदानं वर्तते। धर्मार्थकाममोक्षाख्यस्य पुरुषार्थचतुष्टयस्य प्रख्यापकं महाभारतं पञ्चमवेदस्य रूपेण समाद्रियते। सर्वविधज्ञानानां राशिरूपं ग्रन्थरत्नमिदं पाश्चात्त्या विद्वांसश्च विश्वकोषमामनन्ति, प्रशंसन्ति च। महाभारतं जनान् सत्पथम्, कर्तव्यम्, सदाचारम्, धर्मानुकूलजीवनयापनञ्च शिक्षयति। अस्य प्रभावः सर्वत्र व्यापृतो वर्तते। महाभारतस्य रचनायाः समये व्यासो मनसि श्लोकानां रचनां चकार, गणेशस्तद्रचितान् श्लोकान् तत्कालमेव लिखितवान्। इत्थं व्यासगणेशौ महाभारतग्रन्थं सम्पादयामासतुः।

तदन्तरं ऋषिर्व्यासश्चतुर्लक्षात्मकमतिविशालं पुराणवाङ्मयं व्यरचयत् । स सनातनधर्मसंस्कृतिपरम्पराणां महोद्धारं व्यदधात् । पुराणानां रचनया व्यासः सर्वेषां जनानां कृते सनातनधर्मे प्रवेशमार्गं समुद्घाटयामास । अयं व्यासोऽष्टचिरजीविनामन्यतमत्वेनापि परिगणितोऽस्ति । ऋषेर्व्यासस्य जन्म सर्वेषां मानवानां हितायाभवत् । स साधकानां समुद्धर्ता वर्तते । तस्यैव कारणेन वेदपुराणस्मृतीतिहासानां ग्रन्थाः प्रमाणरूपाः सन्ति । पौरस्त्यसंस्कृतिरिव व्यासोऽप्यमरत्वं भजते ।

समाजे पौराणिकवाङ्मयस्यातुल्यः प्रभावो वर्तते । ब्रह्मसूत्रं विरचय्य ज्ञानमार्गं दर्शितवता अमितबुद्धिना व्यासेन पुराणानि प्रणीय भक्तिमार्गश्च प्रख्यापितः । पुराणानि, उपपुराणानि, औपपुराणानि च विरचय्य, विरचयितुं शिष्यगणान् निर्दिश्य च व्यासो वैदिकधर्मस्य विस्तारं कृतवान् । न केवलं संस्कृतसाहित्ये, अपि तु नैपालकसाहित्येऽपि पुराणानां प्रभावः परिलक्ष्यते ।

सप्तदशानां पुराणानां रचनानन्तरमपि व्यासः सन्तुष्टो नैवाऽभूत् । असन्तोषं प्रकटयतो व्यासस्याऽग्रे नारद आगत्य भागवतपुराणरचनायै तं प्रेरयामास । मोक्षप्राप्तौ साधनारतोऽपि जनो यदि भगवद्भक्तिरहितो वर्तते तर्हि शोभाविहीनो भवतीति सम्बोध्य नारदेनोक्तम्-

**नैष्कर्म्यमप्यच्युतभाववर्जितं न शोभते ज्ञानमलं निरञ्जनम् ।**
**कुतः पुनः शश्वदभद्रमीश्वरे न चाऽर्पितं कर्म यदप्यकारणम् ॥**

ततो ब्रह्मनद्याः सरस्वत्याः पश्चिमे तटे शम्याप्रासाश्रमस्य निकटे बदरीखण्डमण्डिते आश्रमे स्थित्वा व्यासो भगवततत्त्वे मनो निधाय परमहंसानां संहितां श्रीमद्भागवतं रचयामास । तस्य श्रवणमात्रेणापि परमपुरुषे कृष्णे भक्तिरुत्पद्यते ।

व्यासोऽध्यात्मरामायणं विलिख्य रामकथामपि समाजे व्यस्तारयत् । ब्रह्माण्डपुराणस्य अंशभूतत्वादध्यात्मरामायणमपि व्यासस्य रचना मन्यते । रामायणमिदं वाल्मीकिरामायणाद् भिन्नं प्रसिद्धञ्चास्ति । अध्यात्मरामायणे सप्त काण्डाः, पञ्चषष्टिः सर्गाः, शतद्वयाधिकचतुःसहस्राणि श्लोकाः सन्ति । अध्यात्मरामायणं प्राणिनां हृदयगुहायामन्तर्यामिस्वरूपेण विराजमानस्य परमात्मनो रामस्य लीलाचरितवर्णनात्मको ग्रन्थो वर्तते । अतोऽत्र रामचरितं रामकथाप्रसङ्गाश्च आध्यात्मिकरहस्यप्रतिपादकत्वेन विन्यस्ताः सन्ति । व्यासो दार्शनिकविषयं कथाकथनकौशलेन सर्वजनसंवेद्यं विधातुमपूर्वं प्रावीण्यं प्रादर्शयत् । अध्यात्मरामायणमाश्रित्य तुलसीदासेन अवधीभाषायां प्रणीतं रामचरितमानसं नेपालीभाषायामादिकविना भानुभक्ताचार्येण विरचितं रामायणञ्च प्रसिद्धं लोकप्रियग्रन्थरत्नद्वयं वर्तते ।

सदाचाररूपधर्माचरणाय स स्मृतीरपि प्रणीतवान् । तेन व्यासस्मृतिः लघुव्यासस्मृतिश्चेति स्मृतिग्रन्थद्वयं प्रणीतं वर्तते । व्यासः समेषां लोकानां कल्याणं कामयते । साक्षान्नारायण एव व्यासरूपेण अज्ञानान्धकारनिमग्नानां प्राणिनां सदाचरणशिक्षणाय धरायामवतीर्णः । अतः स भगवान् इत्युपाधिना

सम्मान्यते । कवयो व्यासं त्रिदेवस्वरूपं च मन्वते । उक्तञ्च -

**अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।**

**अभाललोचनः शम्भुर्भगवान् बादरायणः ॥**

आद्यशङ्कराचार्यो व्यासस्य दर्शनं प्राप्यातिरिक्तं षोडशवर्षाणामायुष्यञ्च लेभे इत्युक्तिरस्ति । अन्ये महापुरुषाश्च व्यासाल्लाभान्विता बभूवुरित्यपि वर्णनं प्राप्यते । गीतादर्शनस्य कारणेनापि व्यासस्य कीर्तिर्विश्वव्यापिनी सञ्जाता । ज्ञानमयप्रदीपस्य प्रज्वालनादसौ गुरूणां गुरुरूपेण सम्मान्यते । अनेन प्रणीतानि निखिलानि ग्रन्थरत्नानि न केवलं सनातनसंस्कृतिमनुसरतां जनानां हिताय अपि तु सकललोककल्याणाय सन्ति । सत्यमेवोक्तम् -

**नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।**

**येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥**

व्यासः स्वजन्मना तपसा च नेपालधरामलञ्चकार इति जनश्रुतिरस्मान् सर्वान् गौरवपूर्णान् विदधाति । नेपालो व्यासस्य जन्मभूमिः, साधनाभूमिः, कृपाभूमिश्चेति भूयो भूयोऽनुभूय वयं हृष्टमानसाः स्मः ।

### शब्दार्थाः

| | | |
|---|---|---|
| उद्भाव्य | = | जनयित्वा |
| उपस्पृश्य | = | आचम्य |
| ऐहिकम् | = | सांसारिकम् |
| आमुष्मिकम् | = | पारलौकिकम् |
| आलोकः | = | प्रकाशः |
| व्यापृतः | = | विस्तृतः |
| प्रावीण्यम् | = | कौशलम् |

# अभ्यासः

## १. अतिसङ्क्षेपेणोत्तरं लिखत

(क) सनातनधर्मसंस्कृत्योः वर्णाश्रमधर्मव्यवस्थायाश्च प्रधानो व्याख्याता कः ?

(ख) वेदराशिः कतिभागेषु विभक्तः ?

(ग) कस्मिन् युगे वेदव्यासस्य जन्माभवत् ?

(घ) वेदव्यासेन कति पुराणानि रचितानि ?

(ङ) भक्तिमार्गस्य प्रख्यापका ग्रन्थाः के सन्ति ?

(च) श्रीमद्भगवद्गीता महाभारतस्य कस्मिन् पर्वणि वर्तते ?

(छ) अध्यात्मरामायणं कस्मिन् पुराणेऽन्तर्भूतम् ?

(ज) वेदव्यासेन कति स्मृतयः प्रणीताः ?

(झ) आद्यशङ्कराचार्यो व्यासात् किं लेभे ?

## २. सङ्क्षिप्तोत्तरं लिखत

(क) व्यासः कथं मानवमानसं समशोधयत् ?

(ख) व्यासस्य विस्मयजनकं कौशलं किम् ?

(ग) व्यासो वैदिकधर्मस्य विस्तारं कथं कृतवान् ?

(घ) वेदव्यासेन किमर्थं वेदविभाजनं कृतम् ?

(ङ) वेदव्यासस्य पौराणिकमवदानं किम् ?

(च) वेदव्यासः कान् शिष्यान् चतुर्वेदान् पाठयामास ?

(छ) महाभारतं किं शिक्षयति ?

(ज) व्यासः किमर्थं भगवान् कथ्यते ?

(झ) वेदव्यासविषये वयं किमर्थं हृष्टमानसाः स्मः ?

## ३. अधोलिखितमनुच्छेदं पठित्वा प्रश्नानुत्तरयत

नेपालदेशस्य प्युठानजनपदे स्थितं स्वर्गद्वारीनाम्ना प्रसिद्धं तीर्थस्थानमद्यापि आध्यात्मिकतेजसा ध्यानशान्त्या, गोसेवापरम्परया च विश्वविख्यातमस्ति। पर्वतश्रेणीमध्ये विद्यमानमेतत् क्षेत्रं प्रकृतिसौन्दर्यस्य दिव्यस्पर्शेन, देवालयसमूहैः, गुहाजालैः, अखण्डयज्ञेन चालङ्कृतमस्ति। धर्मनिष्ठानां साधूनां तपस्विनां च तपोभूमिरूपेणेयं भूमिर्जगति प्रसिद्धा वर्तते।

स्वर्गद्वारी इति नाम स्वर्गस्य द्वारमिति सूचयति। द्वापरयुगे भूभारहरणाय समागता देवांशभूताः पाण्डवाः श्रीकृष्णस्य नायकत्वे सर्वाणि कार्याणि सम्पाद्य बहुकालं यावद् राज्यं कृत्वाऽन्त्यसमये स्वर्गारोहणायास्मात् स्थानाद् गतवन्त इति जनश्रुतिर्वर्तते। तस्मादियं भूमिः स्वर्गद्वारनाम्ना प्रसिद्धा। पश्चात् स्वर्गद्वारीमहाप्रभोः हंसानन्दस्वामिनः (नारायणगौतमस्य) तपसा, गोसेवया, अखण्डयज्ञेन च स्थानस्यास्य पुनरुत्थानं जातम्। अस्य गुरोस्तपोबलात् स्वर्गद्वारीक्षेत्रमतीव पावनं पुण्यक्षेत्रं चाभवत्। महाप्रभुर्दीर्घकालपर्यन्तं पर्वतकन्दरासु योगाभ्यासम्, ध्यानसमाधिम्, गोसेवाम्, यज्ञादीनि चानवरतमकरोत्। तेनैकोनविंशशताब्द्यामखण्डहोमयागो प्रारब्धः। तदा तेन प्रज्वालितोऽग्निरद्यापि साक्षित्वेन प्रज्वलन्नस्ति। महाप्रभोः कठोरतपसः, निःस्वार्थसेवायाश्च प्रभावेणाद्यापि स्वर्गद्वारीतीर्थं लोकहृदये प्रतिष्ठितम्। तपसा दीप्तं तस्य जीवनं साधुनिष्ठायाः प्रतिमानमिव दृश्यते। स्वर्गद्वारीप्रदेशः प्राकृतिकशोभाया उत्कृष्टमुदाहरणम्। पर्वतश्रेण्यः, हरितवनराजयः, सुगन्धितपवनः, दूरस्थहिमशृङ्गदर्शनञ्चेति सर्वाणि स्वर्गद्वारीतीर्थं प्रति यात्रिणां मनांसि समाकर्षन्ति।

स्वर्गद्वारीक्षेत्रं न केवलं धार्मिकस्य किन्त्वाध्यात्मिकपर्यटनस्यापि प्रमुखं केन्द्रमस्ति। अत्र प्रतिवर्षं गुरुपूर्णिमायाम्, वैशाखपूर्णिमायाम्, शिवरात्रौ, अन्येषु पर्वसु च श्रद्धया भारतदेशाद्, नेपालस्य विविधस्थानेभ्यश्च सहस्रशो भक्ताः समागच्छन्ति। भक्ताः पर्यटकाश्च तत्र समागत्य दानधर्मगोसेवादिकार्याणि सम्पादयन्ति। एतत् क्षेत्रं धार्मिकजीवनस्य कृते बहूपयोगि मन्यते। एभिः कारणैः स्वर्गद्वारीक्षेत्रं नेपालस्य महत्त्वाधायकं तीर्थमस्ति। स्वर्गद्वारीक्षेत्रम् आध्यात्मिकजीवनस्य दीपस्तम्भ इव प्रतिभाति।

**प्रश्नाः**

(क) स्वर्गद्वारीक्षेत्रं नेपालस्य कस्मिन् जनपदेऽस्ति ?

(ख) इयं भूमिर्जगति केन कारणेन प्रसिद्धा वर्तते ?

(ग) पाण्डवाः किमर्थं स्वर्गद्वारीं प्राप्तवन्तः ?

(घ) स्वर्गद्वारीक्षेत्रे कः स्वामिवर्यस्तपश्चकार ?

(ङ) पाण्डवानां स्वर्गारोहणानन्तरं तत् क्षेत्रं केन नाम्ना प्रसिद्धम् ?

(च) अद्यावधि साक्षित्वेन तत्र किं दृश्यते ?

(छ) प्रतिवर्षं कदा कदा विशेषरूपेण भक्ताः स्वर्गद्वारीं समागच्छन्ति ?

(ज) केन कारणेन स्वर्गद्वारीक्षेत्रं लोकहृदये प्रतिष्ठितम् ?

(ञ) स्वर्गद्वारीतीर्थस्य विषये पञ्च मौलिकवाक्यानि रचयत ।

## ४. अधो लिखितस्य श्लोकस्यार्थं लिखत

त्रिभिर्वर्षैः सदोत्थाय कृष्णद्वैपायनो मुनिः ।

महाभारतमाख्यानं कृतवानिदमुत्तमम् ॥

## ५. श्लोकयोः सस्वरवाचनं कुरुत

(क) दानेन पाणिर्न तु कङ्कणेन स्नानेन शुद्धिर्न तु चन्दनेन ।

मानेन तृप्तिर्न तु भोजनेन ज्ञानेन मुक्तिर्न तु चन्दनेन ॥

(ख) श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।

विभाति कायः करुणापराणां परोपकारैर्न तु चन्दनेन ॥

## ६. तात्पर्यं प्रकाशयत

नमोऽस्तु ते व्यास विशालबुद्धे फुल्लारविन्दायतपत्रनेत्र ।

येन त्वया भारततैलपूर्णः प्रज्वालितो ज्ञानमयः प्रदीपः ॥

## ७. अधोऽङ्किताव्ययपदानि प्रयुज्य वाक्यानि रचयत

किञ्चित्, अवश्यम्, किमर्थम्, शीघ्रम्, इदानीम्, तर्हि, तदा, यतः, पुनः ।

## ९. वेदव्यासस्य त्रिदेवस्वरूपत्वं व्याख्यात ।

१०. महाभारतस्य वैशिष्ट्यं प्रतिपादयत ।

११. नेपालस्य कस्यचित् प्रसिद्धधार्मिकस्थलस्य वैशिष्ट्यं निर्दिश्य शैक्षिकभ्रमणार्थं गन्तुमभियाचनं पुरस्कृत्य प्रधानाध्यापकाय सामूहिकनिवेदनं लिखत ।

### *परियोजनाकार्यम्*

'नेपालो वेदव्यासस्य जन्मभूमिः' इति विषये विज्ञजनान् सम्पृच्छ्य, अन्तःसञ्जालादन्विष्य, इतिहासविषयकपुस्तकानि आधृत्य च तथ्यानि समाविश्य प्रतिवेदनं निर्मात ।

# मानदेवांशुवर्मणोः सुराज्यम्

नेपालस्य प्राचीनेतिहासस्य विषये स्पष्टतयोल्लेखो नास्ति परन्तु गोपालवंशिनः सर्वतः प्रथमं नेपाले शासनं सञ्चालयामासुरिति वंशावलीरधिकृत्य निश्चेतुं शक्यते । तत्पश्चाद् महिषपालवंशिनो गोपालवंशोद्भवान् राज्ञो विजित्य नेपालस्य शासनं चक्रुरिति चर्चा वंशावलीषु प्राप्यते । महिषपालानन्तरं किराता नेपालं शासितवन्तस्ततश्च लिच्छविवंशोद्भवा किरातान् पराजित्य नेपालेऽधिकारं स्थापितवन्त इति पुराणेषु वंशावलीषु चोल्लेखो दृश्यते । लिच्छविवंशोद्भवाः सूर्यकुले समुत्पन्नास्ते च किरातानाक्रम्य स्वशासनं सञ्चालितवन्त इति गोपालराजवंशावल्यां लिखितमस्ति । तथैव किरातान् वाण्याः प्रभावेण एवं युद्धे च परास्तं कृत्वा वैशाल्याः स्वामिनो लिच्छविवंशोद्भवा नेपाले आधिपत्यं संस्थापयामासुरिति चोट्टङ्कितं वर्तते । वैशाली चाधुना भारतस्य मुजफ्फरपुरस्य बसाढ इति नाम्ना सम्बोध्यते । तच्च स्थानमजातशत्रुनामकेन राज्ञा विजितम् । ततः पलायिता लिच्छविवंशोद्भवाः खीष्टसंवत्सरस्य प्रथमशताब्द्यां शरणार्थिरूपेण नेपालं प्रविष्टवन्त इतीतिहासविदो वदन्ति । गोपालवंशावल्यनुसारेण खिगुनामा, भाषावंशावल्यनुसारेण गालिजनामा, राइटवंशावल्यनुसारेण च गस्तिनामा किरातानामन्तिमो नृप आसीत् । लिच्छविवंशोद्भवास्तं विजित्य नेपालस्य शासनभारं गृहीतवन्त इति कथ्यते ।

लिच्छविकुलोत्पन्नाः कस्मिन् संवत्सरे नेपालस्य शासनभारमगृह्णन्निति निश्चयो नास्ति । परमितिहासविद् बाबुरामाचार्यः किरातान् पराजित्य लिच्छविवंशोद्भवा नेपालं शासितवन्त इति कथयति । तात्कालिकं शासकं प्रति जनानामसन्तोषो व्याप्त आसीत् । तज्ज्ञात्वा ते जनसङ्घर्षस्य नेतृत्वं कृतवन्तः । महत्या क्रान्त्या, रक्तपातेन च लिच्छविकुलोद्भवाः किरातेभ्यः शासनभारं गृहीतवन्तः । ते जनहितं सर्वोपरि मन्वते स्म, जनभावनानुसारेण शासनं च सञ्चालयन्ति स्म । तदाऽऽर्थिकी प्रोन्नतिश्च सञ्जाता । शिक्षाया विकासोऽपि तैर्विहितः । कलाकृतिभिः सुसज्जितस्य तात्कालिकस्य नेपालस्य चर्चा यात्रिभिः कृता दृश्यते । शिक्षासमृद्धिकलाकृतिभिर्लिच्छविकाल इतिहासे स्वर्णयुगं मन्यते ।

लिच्छविरयोध्याया राज्ञो दशरथस्य अष्टमवंशोद्भवोऽस्तीति मन्यते । अतो लिच्छविवंशोद्भवा दशरथकुले समुत्पन्नाः सूर्यवंशोद्भवाः कथ्यन्ते । अष्टम्यां शताब्द्यां लिच्छविवंशजातस्य जयदेवद्वितीयस्य पशुपतौ प्राप्ताभिलेखे लिच्छवेरनन्तरं त्रयोदशः कामदेव इव रूपयौवनसम्पन्नः सुपुष्पो राजा बभूवेत्युदीरितो वर्तते ।

परन्तु वंशावलीषु सुपुष्पो लिच्छविवंशगणनायां चतुर्थ आसीदिति प्राप्यते । कतिपये इतिहासज्ञाः सुपुष्प एव नेपालस्य प्रथमो लिच्छविवंशोद्भवो राजा आसीदिति तर्कं समुपस्थापयन्ति । लिच्छविवंशोद्भवोऽसौ लिच्छविराजवंशस्य संस्थापक आदिपुरुष आसीदिति विवदन्ति केचिद् बुधाः । गोपालराजवंशावल्यां स एव पशुपतिमन्दिरस्य निर्मातेति लिखितमस्ति चेद् राइटवंशावल्यां स राजा पशुपतिमन्दिरस्य छदिं सुवर्णमयीमकारयदिति उल्लेखोऽस्ति । तस्मिन्नेव वंशे लिच्छविकुलदीपको मानदेवोऽजायत ।

राजा मानदेवः शासनसञ्चालने कुशल आसीत् । तस्य कीर्तिश्चतुर्दिक्षु व्याप्ता आसीत् । तस्य शासने नेपालो व्यवस्थितः, विकसितः, सुदृढश्च अभवत् । स राजा लोकान् स्वपरिवारस्य सदस्यानिव मनुते स्म । समस्तराजगुणैः समलङ्कृतो स शास्त्रमर्मज्ञ आसीत् । स विक्रमस्य ५२१ तमात् संवत्सरादारभ्य ५६२ तमवर्षपर्यन्तमेकचत्वारिंशद् वर्षाणि यावद् नेपाले शासनमकरोत् । तस्य शासनकाले 'श्रीमानाङ्क', 'श्रीभोगिनी' इत्यङ्किते मुद्रे प्रचलिते आस्ताम् । कलायाः, शिक्षायाश्च विकासेऽयं महद्योगदानमकरोत् । स एव मानगृहनाम्नो राजप्रासादस्य निर्माणमकारयत् । तदा तस्य राज्यं प्राच्यां कौशिकीपर्यन्तम्, प्रतीच्यां गण्डकीपर्यन्तम्, उदीच्यां च हिमालयपर्यन्तं विस्तृतमासीत् । तस्य शासनकालाद्धि नेपालस्येतिहासस्य स्पष्टचित्रं प्राप्यते । तस्मात्कारणादसौ नेपालस्य प्रथमः प्रामाणिको राजा मन्यते ।



लिच्छविकालस्य प्रथमः प्रामाणिकोऽभिलेखो मानदेवनिर्मिते चाँगुनारायणमन्दिरे प्राप्यते । मानदेवकालस्याभिलेखो मुद्रा च नेपालस्येतिहासस्य प्रामाण्यं सङ्केतयतः, यतो हि विक्रमस्य षष्ठसंवत्सरानन्तरं नेपालस्य प्रामाणिक इतिहासो लभ्यते । मानदेवस्य शासनकालानन्तरं महिदेववसन्तदेवादयो राज्यं सञ्चालयामासुः । वसन्तदेवो बाल्ये एव राजा बभूव । तदामात्यौ रविगुप्तक्रमलीलौ शक्तियुक्तौ जातौ । ५३६ तमात् खीष्टसंवत्सरात् ५४५ तमं खीष्टसंवत्सरं यावद् राजामात्ययोः संयुक्तशासनस्य कारणेन राज्यव्यवस्थायामस्थिरता समुत्पन्ना । तत्पश्चाद् भौमगुप्तस्य काले शक्तिसङ्घर्षो जातः । शिवदेवः स्वभागिनेयस्यांशुवर्मणः सहयोगेन शासनस्य सुव्यवस्थितिं चकार । तदनु शिवदेवो निस्तेजा जातश्चेद् अंशुवर्मा शक्तिसम्पन्नः सन् राजा बभूव । नेपालस्येतिहासे एषैव मन्त्रिणा राज्याधिकारग्रहणस्य प्रथमा घटना सञ्जाता ।

अंशुवर्मणः शासनकालः ६०५ तमात् खीष्टसंवत्सरात् ६२१ तमं खीष्टसंवत्सरं यावदासीत् । तस्य शासनकाले नेपालः कृषिपशुपालनव्यापारादिक्षेत्रेषून्नतिं चकार । तदा परराष्ट्रसम्बन्धः सुदृढो जातः, रक्षाव्यवस्था प्रादुर्भूता, विकासस्य कार्याणि दृष्टिपथमागतानि । अत्यन्तं कलात्मकः, भव्यः, आकर्षकश्च कैलाशकूटनामको राजप्रासादः अंशुवर्मणा निर्मितः । तात्कालिकाभ्यां तिब्बतचीनदेशाभ्यां सह

परराष्ट्रनीतिस्तदा सफलतया सञ्चालिता । भारते हर्षवर्धनो राजा आसीत् । अतस्तिब्बतस्य शक्तिशालिना स्रङ्चङ्गम्पोनृपेण सह सुमधुरः सम्बन्धोंऽशुवर्मणा स्थापितः । तदर्थं तेन तिब्बतराजेन सह स्वतनयाया राजकुमार्या भृकुट्या विवाहः सम्पादितः । स धार्मिकरूपेणोदारमना आसीत् । तस्य राज्ये समस्ताः प्रजाः सुखिनः सन्तः स्वातन्त्र्यस्यानुभवं कुर्वन्ति स्म । तस्यैव काले कलाया विद्यायाश्च विकासो जातः, देशः सुसङ्घटितः, उन्नतश्चाभवत् । देशोन्नत्याः कारणेन सर्वप्रथमं स 'महाराजाधिराजः' इत्युपाधिना विभूषितो जातः ।

राजा अंशुवर्मा एव विधिवद्रूपेण देशे युवराजघोषणस्य परम्परां प्रारभत । स हिन्दुराजरूपेण 'पशुपतिपादानुगृहीतः' इत्युपाधिमधारयत् । विद्यावान् स 'शब्दविद्या' इति नामाख्यं ग्रन्थमरचयत् । तत्र च 'प्रजाहितसमाधानतत्परः', 'कथं प्रजा मे सुखिनो भवेयुः' इत्यादिभावयुक्तानां पदावलीनां समावेशोऽस्ति । एतेन ज्ञायते यद्, एष सदैव प्रजाहितचिन्तनरतः, देशोन्नत्यभिलाषी, सुधी च राजा आसीदिति । ६२८ तमे विक्रमसंवत्सरे समुन्नतिप्रियो राजा अंशुवर्मा पञ्चत्वं गतवान् । लिच्छविशासकयोर्मानदेवांशुवर्मणोः सुराज्यस्य चर्चा न केवलं नेपालस्येतिहासे, अपि तु यात्रिणां यात्रावर्णनेऽपि विहिता दृश्यते । तौ प्रजाहित-तत्परौ आस्ताम् । तेषां कार्याणि वीक्ष्य नेतृगणैस्तद्गुणा अनुकरणीया इति स्पष्टतया अवगन्तुं शक्यते ।



### शब्दार्थाः

| | | |
|---|---|---|
| उट्टङ्कितम् | = | उल्लिखितम् |
| छदिः | = | आच्छादनम् |
| प्रामाण्यम् | = | प्रामाणिकता |

# अभ्यासः

## १. अतिसङ्क्षेपेणोत्तरयत

(क) परम्परानुसारेण नेपालस्याद्याः शासकाः के आसन् ?

(ख) किरातान् के पराजितवन्तः ?

(ग) लिच्छविवंशोद्भवाः कस्माद् वंशात् समुत्पन्ना मन्यन्ते ?

(घ) नेपालस्य प्रथमः प्रामाणिको राजा क आसीत् ?

(ङ) प्रथमः प्रामाणिकोऽभिलेखः कस्मिन् मन्दिरे प्राप्तः ?

(च) को मानगृहनामकं राजप्रासादं निर्मितवान् ?

(छ) लिच्छविराजवंशस्य संस्थापकः को मन्यते ?

(ज) को मानदेवस्यानन्तरं राज्यं समचालयत् ?

(झ) महाराजाधिराज इत्युपाधिं प्रथमं कोऽधारयत् ?

(ञ) अंशुवर्मणो दुहिता भृकुटी केन सह विवाहिता आसीत् ?

## २. सङ्क्षिप्तोत्तराणि लिखत

(क) लिच्छविवंशोद्भवाः कथं नेपालस्य शासनभारं गृहीतवन्तः ?

(ख) लिच्छविवंशस्य प्रथमस्य राज्ञो विषये कीदृशी वार्ता प्रचलिता अस्ति ?

(ग) मानदेवस्य प्रमुखाणि कार्याणि कानि ?

(घ) अंशुवर्मा विदेशनीतिं कथं सुदृढीकृतवान् ?

(ङ) लिच्छविकाले कलाशिक्षयोः कीदृशो विकासोऽभवत् ?

(च) मानदेवकालीनानामभिलेखानां मुद्राणां च किं महत्त्वमस्ति ?

(छ) अंशुवर्मणः शासनव्यवस्थायां कीदृशं योगदानं दृश्यते ?

## ३. नेपालदेशे लिच्छविवंशस्योदयः कथमभूत् ?

## ४. मानदेवस्य शासनकालं तस्यावदानञ्च विवेचयत ।

५. **अंशुवर्मणः प्रशासनम्, विदेशनीतिम्, विकासकार्याणि च विस्तरेण लिखत ।**

६. **लिच्छविकालो नेपालस्येतिहासे किमर्थं स्वर्णयुगं कथ्यते ?**

७. **अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

मत्स्येन्द्रनाथो नाथसम्प्रदायस्य प्रमुखः सिद्धयोगी मन्यते । स च करुणामयबोधिसत्त्वस्य रूपेण पूज्यते । नेपालदेशे विशेषतः काष्ठमण्डपोपत्यकायां मत्स्येन्द्रनाथस्य रथयात्राऽत्यन्तं प्रसिद्धा भव्याऽपि भवति । अयमुत्सवो धार्मिकसांस्कृतिकसामाजिकदृष्ट्या एकताया अद्वितीयं प्रतीकं वर्तते । हिन्दुबौद्धसम्प्रदाययोः समन्वयस्य द्योतकत्वेनाप्येषा यात्रा महन्महत्त्वं बिभर्ति । पुरातनकथानुसारेण प्राचीनकाले उपत्यकायां दीर्घकालपर्यन्तं वर्षाभावोऽभवत् । तेन जना दुःखिता अभवन् । तेषां रक्षणार्थं मत्स्येन्द्रनाथस्यागमनमावश्यकमिति मनीषिणोऽवदन् । अतस्तस्योपासना विहिता । तेन कारणेन वर्षाऽभवत्, कृषकाणां जीवनं पुनः समृद्धमभवत् । अतो मत्स्येन्द्रनाथो वर्षादेवता, करुणामयश्चेति मत्वा श्रद्धया पूज्यते । अद्यापि ललितपुरनगरे (पाटनक्षेत्रे) एतस्य रथयात्रा महतोत्साहेनायोज्यते । तत्र विशालरथः काष्ठनिर्मितो भवति, यस्य निर्माणे परम्परागतशिल्पिनः संलग्ना भवन्ति । रथस्योच्चभागो दर्शकानां मनसि विस्मयं जनयति । मत्स्येन्द्रनाथस्य मूर्तिं रथे स्थापयित्वा नगरस्य विविधभागेषु परिभ्रमणं क्रियते । सहस्रशो भक्ता रज्ज्वा रथमाकर्षन्ति । गानवाद्यनृत्यादिभिः सहोत्सवोऽसौ बहुदिनानि यावत् प्रचलति । यात्रायाः प्रारम्भो बुङमतीग्रामाद् भवति । यतो हि मत्स्येन्द्रनाथस्य मूलमन्दिरं तत्रास्ति । ततो रथो ललितपुरस्य मङ्गलबजारस्थानं प्रति नीयते । यात्राया अन्ते भोटोजात्रानामको विशेषसमारोहो भवति यत्र 'भोटो' इति प्राचीनकञ्चुकाकारवस्त्रस्य प्रदर्शनं जनसमक्षं क्रियते । मत्स्येन्द्रनाथरथयात्रा न केवलं धार्मिकसमारोह एव, अपि तु सांस्कृतिकोत्सवोऽपि वर्तते । अत्र नेवारसमुदायस्य परम्परा, शिल्पकला, वाद्यसङ्गीतम्, सहकार्यं च द्रष्टुं शक्यते । विभिन्नसम्प्रदायानां जना भेदभावं विना एकत्रागत्योत्सवं सफलं कुर्वन्ति । एषा यात्रा सामाजिकसौहार्दस्य चोत्तममुदाहरणमस्ति ।

**प्रश्नाः**

(क) मत्स्येन्द्रनाथः कस्य सम्प्रदायस्य प्रमुखः सिद्धयोगी मन्यते ?

(ख) मत्स्येन्द्रनाथः कस्य रूपेण पूज्यते ?

(ग) नेपालदेशे विशेषतः कस्यां नगर्यां मत्स्येन्द्रनाथस्य रथयात्रा प्रसिद्धा अस्ति ?

(घ) रथयात्रा कस्या एकतायाः प्रतीकमस्ति ?

(ङ) प्राचीनकाले उपत्यकायां का आपद् आपतिता ?

(च) जनानां रक्षणार्थं कस्यागमनमावश्यकमासीत् ?

(छ) मत्स्येन्द्रनाथस्य मूलमन्दिरं कुत्रास्ति ?

(ज) रथयात्राया आरम्भः कस्माद् ग्रामाद् भवति ?

(झ) यात्राया अन्ते को विशेषसमारोहो भवति ?

(ञ) मत्स्येन्द्रनाथरथयात्रा सामाजिकसौहार्दस्योदाहरणतां कथं याति ?

## ८. अधस्तनपद्यस्य सरलार्थं लिखत

अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ॥

## ९. अधो लिखितस्यानुच्छेदस्य स्वमातृभाषायामनुवादं कुरुत

बुढानीलकण्ठमन्दिरं काष्ठमण्डपनगरस्योत्तरे स्थितं प्रख्यातं पवित्रं च तीर्थस्थानमस्ति । अस्मिन् मन्दिरे भगवतो विष्णोः शेषशय्यायां शयनरतो विशालः शिलामयो जलशायी नारायण इति नाम्ना विख्यातो विग्रहो विराजते । स विग्रह एकस्माद् विशालात् शिलाखण्डात् निर्मितोऽस्ति । स कुण्डस्य मध्ये प्रतिष्ठितो दृश्यते । भक्तजनाः प्रतिदिनं तत्रागत्य पूजां प्रार्थनां च कुर्वन्ति । हरिबोधिन्यामेकादश्याम् अन्येषु पर्वसु चात्र महान् उत्सवो भवति । अस्य मन्दिरस्य वातावरणं शान्तिपूर्णं मनोहरं चास्ति । एतत् मन्दिरं दर्शनार्थिनां हृदये आध्यात्मिकीं भावनां जागरयति । अतो बुढानीलकण्ठमन्दिरं नेपालदेशस्य धार्मिकसांस्कृतिकवैभवस्य महत्त्वपूर्णं उपहारोऽस्ति ।

## १०. मानदेवांशुवर्मणोः समविषमगुणानां सूचीं निर्मात ।


## *परियोजनाकार्यम्*

**अन्वेषणमाध्यमेन नेपालस्य अरनिकोनामधेयस्य कलाकारस्य इतिवृत्तं कक्षायां प्रस्तुत ।**

पञ्चदशः पाठः

# चाँगुनारायणाभिलेखः

नेपालस्य भक्तपुरमण्डले प्राचीनतमं चाँगुनारायणमन्दिरं विराजते । अत्र प्राचीनकाले एव निर्मिता मूर्तयः सन्ति । समये समये निर्मितानि शिवाष्टमातृकाछिन्नमस्ताकीलेश्वरकृष्णादीनां मन्दिराणि च चाँगुनारायणपरिसरे द्रष्टुं शक्यन्ते । तत्र त्रयोदशशताब्द्या विष्णुविक्रान्तस्य, अष्टम्याः शताब्द्या विश्वरूपस्य, चतुर्दशशताब्द्या नरसिंहस्य च मूर्तयः सन्ति । तत्र स्थितश्चतुर्थशताब्द्या मानदेवस्य शिलालेखस्तात्कालिकेतिहासस्य सूचनाधारो विद्यते ।



चाँगुनारायणमन्दिरस्य पश्चिमदिशि प्रमुखं दर्शनद्वारं वर्तते । तत्रैव सार्धहस्तपरिमितः खण्डितः शिलालेखो वर्तते परन्तु कदा एष खण्डितो जात इति न कोऽपि वक्तुं पारयति । केचिद् इतिहासविदो बङ्गालशासकेन सुल्तानसमसुद्दीनेन शिलालेखोऽयं खण्डीकृतः स्यादिति कथयन्ति । कूर्माकारितायां शिलायां शिलास्तम्भोऽयं प्रतिष्ठितो विद्यते । शिलास्तम्भस्य चतुर्षु भागेषु त्रयो भागा अक्षरैरङ्किताः सन्ति । प्रथमे भागे कानिचिदक्षराणि खण्डितानि सन्ति चेद् द्वितीये तृतीये चाक्षराणि स्पष्टतया स्थितानि सन्ति । योगी

नरहरिनाथः, इतिहासशिरोमणिर्बाबुरामाचार्यः, पण्डितो नयराजपन्तश्चेत्यादिभिर्बुधजनैरस्याभिलेखस्य विषये काश्चित् सामग्र्यः प्रकाशिताः सन्ति ।

चाँगुनारायणस्य मूर्तिः केन स्थापिता इति विषये स्तम्भलेखः स्पष्टतया वदति- 'दोलाद्रौ निवसञ्जयत्यनिमिषैरभ्यर्चमानो हरिः' इति । अनेन मानदेवात् प्रागेव तत्र नारायणस्य मूर्तिः प्रतिष्ठितासीदिति ज्ञायते । अत एव हरिदत्तवर्मणा द्वितीयशताब्द्या अन्त्ये तृतीयताब्द्याः प्रारम्भे वा चाँगुनारायणमन्दिरं निर्मितमिति मन्यते । यद्यपि मल्लकालीनाभिलेखेषु चाँगुनारायणो गरुडनारायणनाम्ना व्यवहृतं दृश्यते । गरुडासनस्य मूर्त्यां मानदेवस्य प्रतिकृतिश्चित्रितास्तीति केचिद् वदन्ति । ते गरुडासनेऽवलोक्यमानं श्मश्रु तत्प्रमाणरूपेणोपस्थापयन्ति ।



पूर्वं तु मानदेवस्य चाँगुनारायणाभिलेखो नेपाले प्राप्ताभिलेखेषु सर्वप्राचीनोऽभिलेखो मन्यते स्म परन्तु इतोऽपि प्राचीनोऽभिलेखः पशुपतिमन्दिरपरिसरे प्राप्तः । पशुपतिपरिसरे प्राप्तोऽभिलेखः ३८१ शकसंवत्सरस्य वर्तते चेत् चाँगुनारायणस्य अभिलेखे 'संवत् ३८६ ज्येष्ठमासे शुक्लपक्षे प्रतिपदि १' इति विलिखितं वर्तते । अनेन यद्यपि अस्य सर्वप्राचीनता निरस्ता, तथाप्ययं शिलालेखो नैपालकेतिहासस्य सूचकत्वान्महत्त्वपूर्णो वर्तते । शिलालेखोऽयं न केवलं मानदेवमेव स्तौति, अपि तु नेपालस्य तात्कालिकान् राजनीतिकधार्मिकार्थिकसामाजिकपक्षांश्च उद्घाटयति । शिलालेखोऽयं नेपालस्य सीमविषयेऽपि किञ्चिदुल्लिखति । शिलास्तम्भे राज्ञो मानदेवस्य गुणा वर्णिता दृश्यन्ते । तदनुसारेण स सर्वगुणसम्पन्न इव परिलक्ष्यते । शिलास्तम्भे 'प्रमुष्टकनकश्लक्ष्णावदातच्छविः', 'पीनांसः', 'चारुभुजः', 'विकचासितोत्पलदलप्रस्पर्द्धमानेक्षणः' इत्यादीनि विशेषणानि मानदेवस्य कृते प्रयुक्तानि सन्ति ।

चाँगुनारायणाभिलेखमाधृत्य मानदेवो विशुद्धकाञ्चनवपुः, शस्त्रास्त्रप्रयोगनिपुणः, लोकव्यवहारकुशलः, धार्मिकः, शूरः, वीरः, पराक्रमी, धैर्यवान्, सहिष्णुः, जनप्रेमी, दम्भदुर्भावरहितः, अनाथदरिद्रमित्रः, अतिथिसेवकः, शत्रुदर्पविनाशी च राजा आसीदिति ज्ञायते । स सर्वान् जनान् प्रति स्मितं विहस्य प्रसन्नचेता भूत्वा व्यवहरति स्म इति च शिलालेखे उल्लिखितमस्ति । स कामदेव इव सुन्दर आसीदिति च तत्राभिलेखे प्राप्यते । तत्र मानदेवस्य वंशानुक्रमणमपि विहितमस्ति । तदनुसारेण वृषदेवो नीतिमान्, ऐश्वर्यशाली, विद्वान्, वचनस्थापकः, गम्भीरः, स्फूर्तिमान्, शूरः, अनुशासनयुक्तश्चासीत् । वृषदेवस्य पुत्रः शङ्करदेव उन्नत्यभिलाषुकः, अजेयः, तेजस्वी, पुरुषसिंहः, यशस्वी चासीत् । तत्पुत्रो धर्मदेवो धर्मनिरतः, कर्मप्रवृत्तः, यशस्वी, दण्डनीतिज्ञश्चावर्तत । धर्मदेवोऽकाले पञ्चत्वं गतवान्, तदनन्तरं तस्य पुत्रो मानदेवो बाल्ये एव राजाऽभवदिति मानदेवस्य वंशचरितवर्णनं चाँगुनारायणाभिलेखे वर्तते ।




शङ्करदेवस्य समयात् शिलालेखस्थापनायाः परम्परा विकसिताऽभवदिति चाँगुनारायणाभिलेखाज्ज्ञातुं शक्यते । अत एव स नेपालस्य प्रथम ऐतिहासिको राजा मन्यते । तस्मिन् कालेऽपि सतीप्रथायाः परम्परा समाजे प्रचलिता आसीदिति च तदभिलेखाज्ज्ञायते । मानदेवस्य पितुर्धर्मदेवस्य मृत्युरकस्मादेव अभवत् । तदनन्तरं सत्यर्थमभिप्रेरिता राज्ञी राज्यवती मानदेवेन निवारिता । तत्पश्चात् सा सतीव्रतं परिपाल्य स्थिता । पुत्रेण मानदेवेन सह राज्यवती धर्मदेवस्य मृत्युसंस्कारं सविधि विहितवती । राज्यवती मन्दिरेऽर्चनारता आसीत् । तदैव धर्मदेवस्य मृत्युरभवत् । एतेन कर्मकरा व्याकुला जाताः । सैव मानदेवाय धर्मदेवस्य निधनस्य समाचारमयच्छदित्यपि प्रसङ्गोऽभिलेखात् प्राप्यते । एतेन तदा मृत्युसंस्कारस्य प्रचलनं चासीदिति बुध्यते ।

मानदेवस्य राज्यारोहणे सामन्तराजा उपस्थिता नासन् । तेऽवसरं वीक्ष्य स्वतन्त्रतायै प्रयता भविष्यन्तीति विचार्य शस्त्रास्त्रपारङ्गतो मानदेवो मातुरनुमत्या पूर्वक्षेत्रं गतवान् । तत्रत्याः सामन्ता मानदेवस्याधिपत्यं स्वीकृतवन्तः । तेन मानदेवस्योत्साहो वर्धितः । ततः स पश्चिमक्षेत्रमगच्छत् । गण्डक्याः पारे मल्लपुर्यासीत् । तत्र सामन्ता मानदेवस्याधिपत्यं स्वीकर्तुं सन्नद्धा नाभवन् । एतेन रुष्टो मानदेवो मातुलस्य सहयोगं गृहीत्वा आक्रमणमकरोत् । युद्धात् परास्तास्ते मानदेवस्याधिपत्यं स्वीकृतवन्तः । ततः परावृत्य मानदेवो राज्यवत्या सह दानादीनि पुण्यकर्माणि व्यदधात्, विजयस्तम्भरूपेण चाँगुनारायणे शिलास्तम्भं च निरमादिति प्रसङ्गः शिलालेखे प्राप्यते ।

लिच्छविकालिकेतिहासस्य महत्त्वपूर्णान् विषयान् चाँगुनारायणस्य शिलालेख उद्घाटयति । मानदेवस्य वंशपरम्परायाः, सतीप्रथायाः, सतीव्रतस्य, मृत्युसंस्कारस्य च चर्चां विधाय तदभिलेखोऽस्मभ्यमस्माकं प्राचीनपरम्पराया विषये सूचनां प्रददाति । स एव शङ्करदेवं प्रथमैतिहासिकराजरूपेण परिचाययति । विशेषतो राज्ञो मानदेवस्य रूपपराक्रमचातुर्यकलानां वर्णने शिलालेखेन शब्दा व्ययीकृताः सन्ति । तद्वर्णने एव तेन नेपालस्य प्राचीनः समाजोऽपि प्रदर्शितो वर्तते । अतश्चाँगुनारायणाभिलेखोऽस्माकं महत्त्वपूर्णोपलब्धिरस्त्यत्र न काचित् शङ्का ।

## शब्दार्थाः

| | | |
|---|---|---|
| प्राक् | = | पूर्वम् |
| श्मश्रु | = | मुखस्थरोम |
| स्तौति | = | स्तुतिं करोति |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) चाँगुनारायणमन्दिरं कस्मिन् स्थाने विराजते ?

(ख) मन्दिरं कीदृशमस्ति ?

(ग) मन्दिरे केषां मूर्तयः सन्ति ?

(घ) मानदेवस्य शिलालेखः कस्मिन् स्थाने अस्ति ?

(ङ) शिलास्तम्भः कस्य काले स्थापितः ?

(च) चाँगुनारायणस्य नामान्तरं किम् ?

(छ) मानदेवस्य पितुर्नाम किम् ?

(ज) मानदेवस्य मातुर्नाम किम् ?

(झ) को नेपालस्य प्रथम ऐतिहासिको राजा मन्यते ?

(ञ) चाँगुनारायणस्य शिलालेखः कस्य वंशस्येतिहासं प्रकाशयति ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) चाँगुनारायणमन्दिरस्य प्राकृतिकपरिवेशः कीदृशः ?

(ख) मन्दिरपरिसरे कासां देवदेवीनां मूर्तयो दृश्यन्ते ?

(ग) शिलालेखे मानदेवस्य के गुणा वर्णिताः सन्ति ?

(घ) सतीप्रथाया विषये शिलालेखे किमुल्लिखितम् ?

(ङ) मानदेवः कथं स्वराज्यं सुरक्षितवान् ?

(च) चाँगुनारायणशिलालेखः कस्य संवत्सरस्य उल्लेखं करोति ?

(छ) लिच्छविकालीनसमाजस्य विषये शिलालेखात् किं ज्ञायते ?

३. **चाँगुनारायणशिलालेखमाधृत्य मानदेवस्य जीवनचरित्रं विस्तरेण वर्णयत ।**

४. **चाँगुनारायणमन्दिरस्य ऐतिहासिकं धार्मिकं च महत्त्वं विवेचयत ।**

५. **शिलालेखस्य माध्यमेन लिच्छविकालिकस्य नेपालस्य सामाजिकराजनीतिकस्थितिं वर्णयत ।**

६. **मानदेवस्य वंशपरम्परां तस्य विजययात्रां च विस्तारपूर्वकं निरूपयत ।**

७. **अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

राजकुमारी भृकुटी नेपालदेशस्य इतिहासे विशिष्टस्थानं धारयति । सा लिच्छविवंशोद्भवस्य राज्ञोंऽशुवर्मणः पुत्रीति परम्परया स्वीकृताऽस्ति । सप्तम्यां शताब्द्यां तस्या विवाहस्तिब्बतदेशस्य प्रख्यातेन राज्ञा स्रङ्चङ्गम्पो इत्यनेन सह अभवत् । एष विवाहः केवलं राजनीतिकसम्बन्धस्य साधनं नासीदपि तु नेपालतिब्बतयोः सांस्कृतिकधार्मिकसम्बन्धस्य सुदृढीकरणस्य प्रमुखं कारणं चासीत् । भृकुटी न केवलमेकाकिनी तिब्बतदेशं गतवती, अपि तु बौद्धधर्मस्य मूर्तिम्, शिल्पकलाम्, वास्तुविद्याम्, चित्रकलाम्, बौद्धविचारं च सा सहैव नीतवती । सा तिब्बते बौद्धधर्मप्रचाराय विशेषावदानं कृतवती । तस्याः प्रेरणया तत्र विहारनिर्माणं बुद्धप्रतिमास्थापनं च सञ्जातमासीत् । तिब्बतस्य लोकमान्यतायां भृकुटी हरिततारा मन्यते । सा नेपालस्य उन्नतशिल्पपरम्परायाः प्रचारं तिब्बतदेशे विहितवती । गृहादिनिर्माणकौशलम्, प्यागोडाशैलीया वास्तुकला, धातुकला, मूर्तिकला चेत्यादीनां माध्यमेन तिब्बते नेपालस्य ख्यातिस्तया प्रसारिता । तस्या राजनीतिकयोगदानमपि महत्त्वपूर्णमासीत् । तया नेपालतिब्बतयोर्मैत्रीसम्बन्धो दृढीकृतः, व्यापारिकमार्गाः सुरक्षिताः, पारस्परिकं सहकार्यं च वर्धितम् । सा स्वदेशाद् दूरं गत्वा नूतने देशे स्वसंस्कृतेर्गौरवं रक्षितवती । तस्याः साहसः, कर्तव्यनिष्ठता, समर्पणं चाद्यापि प्रेरणां प्रददति । अतस्तस्या योगदानं स्मरणीयमनुकरणीयं चास्तीति कथयितुं शक्यते ।

**प्रश्नाः**

(क) भृकुटी कुत्रत्या राजकुमारी आसीत् ?

(ख) सा कस्मिन् वंशे जाता ?

(ग) भृकुट्याः पिता क आसीत् ?

(घ) तस्या विवाहः केन सह अभवत् ?

(ङ) तस्या विवाहः किमर्थं महत्त्वपूर्ण आसीत् ?

(च) सा तिब्बतदेशे किमनयत् ?

(छ) भृकुट्याः प्रेरणया तिब्बतदेशे किं निर्मितम् ?

(ज) तिब्बते सा केन नाम्ना प्रसिद्धा आसीत् ?

(झ) सा कीदृश्याः शिल्पपरम्परायाः प्रचारं कृतवती ?

(ञ) तस्या राजनीतिकयोगदानं किमासीत् ?

(ट) तस्या गुणाः के के सन्ति ?

(ठ) तस्या विषये किं कथयितुं शक्यते ?

(ड) अनुच्छेदे प्रयुक्तानि षष्ठ्यन्तपदानि सप्तम्यन्तपदानि च लिखत

| **षष्ठ्यन्तपदानि** | **सप्तम्यन्तपदानि** |
|---|---|
| | |

## ८. अधस्तनपद्यस्य भावार्थं लिखत

हिमवत्पर्वतस्यास्य मध्ये देशो मनोहरः ।

नेपालाख्यो महान् पुण्यः सर्वतीर्थफलप्रदः ॥

## ९. अधो लिखितस्य अनुच्छेदस्य सारं कथयत

सपादलक्षदीपप्रज्वलनस्य महत्त्वं पूर्वीयसंस्कृतौ अत्यन्तं विशिष्टमस्ति । दीपः प्रकाशस्य, ज्ञानस्य, शुद्धेश्च प्रतीको मन्यते । यदा सपादलक्षसङ्ख्यकदीपाः प्रज्वलन्ति तदा तस्य दृश्यस्य आध्यात्मिकं सौन्दर्यं भक्तानां हृदये श्रद्धाभावं जागरयति । एतत् कार्यं केवलं धार्मिकपरम्परायाः पालनं न, अपि त्वन्धकारनाशस्य ज्ञानप्रकाशस्य विस्तारं च सङ्केतयति । सपादलक्षदीपप्रज्वलनेन समाजे ऐक्यसहकार्यपरस्परप्रेमाणि च वर्धन्ते । मन्दिरेषूत्सवेषु चास्यायोजनं भक्तानां मनसि शान्तिम्,

उत्साहम्, शुभभावञ्च जनयति । अतः सपादलक्षदीपप्रज्वालनं धार्मिकसांस्कृतिकदृष्ट्याऽतीव महत्त्वपूर्णमस्तीति कथ्यते ।

**१०. पाठमाधृत्य लिच्छविकालिकसमाजस्य स्वरूपं प्रदर्शयत ।**

## *परियोजनाकार्यम्*

**अन्वेषणमाध्यमेन मञ्जुश्रीविहितं योगदानं सङ्कलय्य कक्षायां प्रस्तुत ।**

षोडशः पाठः

# मल्लशासकाः

९३६ तमे विक्रमवर्षे नेपालसंवद् आरब्धम् । ततः १८२५ तमं विक्रमवर्षं यावन्नैपालकेतिहासस्य मध्यकालत्वेन गृह्यते । ऐतिहासिकदृष्ट्या लिच्छविकालस्य समाप्तेरनन्तरं मल्लशासनस्य पतनपर्यन्तं नेपालस्य मध्यकालो मन्यते । वस्तुतो नेपालस्य सन्दर्भे मध्यकालपदेन मल्लकालः समायाति । मल्लशासनकालस्यारम्भे नेपालः लिच्छविराज्यवद् विशाल आसीत् । अनन्तरं क्रमशः स्थाने स्थाने लघुस्वतन्त्रराज्यानि अभवन् । मध्ये मध्ये पुनरेकीकरणप्रयत्ना विस्ताराश्चाभवन् । अतो मध्यकालिकनेपालस्य भौगोलिकी स्थितिः कदाचिदेकीकृता, कदाचिद् विखण्डिता, कदाचिद् विस्तृता, कदाचित् सङ्कुचिता च दृश्यते ।

त्रयोदशशताब्द्या आरम्भादेव काष्ठमण्डपोपत्यकायां मल्लानां शासनव्यवस्था स्थापिता मन्यते । यद्यपि मल्लवंशस्य प्रथमशासकत्वेन अरिमल्लो गृह्यते तथाप्यरिमल्लात् पूर्वमेव मल्लानां शासनकार्येषु सक्रियता आसीत् । अरिमल्लात् शताब्द्याः पूर्वमेव मल्लाः केनापि रूपेण शासनव्यवस्थायां संलग्ना आसन्निति गोपालराजवंशावल्यां कतिपयाभिलेखेषु चोल्लिखितमस्ति । प्राचीनसंस्कृतवाङ्मये मल्लानामुल्लेखो विशिष्टक्षत्रियरूपेण कृतोऽस्ति । महाभारते, विविधबौद्धसाहित्येषु, मनुस्मृतौ, अन्येषु पुराणेषु च मल्लानां सन्दर्भो लभ्यते । महाभारते कोशलैः सह मल्लानामपि समाना चर्चा दृश्यते । मार्कण्डेयपुराणे मिथिलाया विदेहैः सह तेषां तुलना विहिता दृश्यते ।

खीष्टपूर्वस्य पञ्चम्यां षष्ठ्यां वा शताब्द्यां सङ्घटितगणराज्यानि सञ्चाल्य स्थिता बहवो राजवंशाः कालानन्तरं राजतन्त्रात्मकशासनव्यवस्थायां प्रविष्टाः । साम्राज्यविस्तारस्य कारणेन निर्वासितेषु तेषु कतिपये नेपालभूभागे प्रविष्टा इति प्राचीनस्रोतांसि सूचयन्ति । खीष्टपूर्वस्य पञ्चम्यां शताब्द्यां भारतस्य साम्राज्यवादिनो गुप्तशासकस्य चन्द्रगुप्तमौर्यस्य दिग्विजयेन पावाकुशीनगरप्रदेशौ मौर्यराज्ये सम्मिलितौ । ततोऽत्र स्थिता मल्लवंशोद्भवाः पलाय्य वर्तमाननेपालस्य शिवालिकपर्वतप्रदेशं प्राप्तवन्त इति इतिहासविदः कथयन्ति । लिच्छविकोलियशाक्यादयोऽपि शरणार्थिरूपेण नेपाले प्रविष्टाः । शाक्या उपत्यकायां निवासमकुर्वन् । कोलियाः कान्तिपुरे इदानीन्तने केलटोलनामके स्थानेऽवसन् । मल्ला आदौ गण्डकीक्षेत्रे पश्चाद् उपत्यकायाः कतिपयस्थानेषु न्यवसन् ।

उत्तरभारते मगधगुप्तसम्राजो दिग्विजयात् पराजिता वैशालीवासिनो लिच्छविवंशोद्भवा यथा काष्ठमण्डपोपत्यकायां प्रविष्टास्तथैव कुशीनगरमूलका मल्ला अपि शरणार्थिरूपेण नेपालस्य गण्डकीक्षेत्रं

प्राप्तवन्तः। राजल्लदेवस्तथा कठयमल्लो ललितपुरस्य दक्षिणे चम्पागिरिस्थाने (चापागाउँ) वसतिं स्थापयामासतुः। तेन मल्लानां काष्ठमण्डपप्रदेशे राजनीतिकप्रभावो वर्धितः। मानदेवेन मल्लप्रदेशे कृतस्य आक्रमणस्य प्रमुखमुद्देश्यं मल्लानां निग्रह एव आसीत्। लिच्छविशासनस्य दुर्बलतायां मल्लानां केन्द्रे शासनस्याकाङ्क्षा ववृधे। अस्मिन् कार्येऽरिदेवः (अरिमल्लः) सफलोऽभवत्। १२१० तमे विक्रमवर्षे जातोऽरिदेवः १२५७ तमे विक्रमवर्षे राजा अभवत्। कतिपयवर्षाणि राज्यं कृत्वा १२७४ तमे वर्षे स देहं त्यक्तवान्। अरिमल्लानन्तरम् अभयमल्लः १२७४ तमे विक्रमवर्षे राजा अभवत्। स अष्टात्रिंशद् वर्षाणि यावत् शासनं चकार।

मल्लकाले एकीकृतनेपालोपत्यकाया राजधानी भक्तपुरमासीत्। राजानो युथनिम्हम इति नाम्नि त्रिपुर इति नाम्नि वा प्रासादे स्थित्वा शासनं सञ्चालयन्ति स्म। अन्यदेशानामाक्रमणाद् रक्षणार्थं चतुष्कोणरूपेण प्रासादो निर्मित आसीत्। तत् स्थानीयभाषायां चौक्वाँठ इति कथ्यते। सङ्घटितमल्लराज्यस्यान्तिमो मल्लराजा यक्षमल्ल आसीत्। तस्य शासनपर्यवसाने उपत्यका कान्तिपुरपाटनभादगाउँ इति नामभिस्त्रिधा विभक्ता अभवत्।

हरिसिंहदेवः कर्णाटकवंशस्य अन्तिमः शासक आसीत्। तस्य शासनकाले दिल्लीनगरस्य मुगलसम्राट् गयासुद्दीनतुगलकनामा आक्रमणं कृत्वा तद् राज्यं ध्वंसितवान्। उपत्यकाया मल्लराजानां कुलदेव्याः रूपेण पूज्यमाना तुलजाभवानी वस्तुतः कर्णाटकराजानामेव कुलदेवी आसीत्। हरिसिंहदेवस्य पत्नी देवलदेवी शरणार्थिन्या रूपेण उपत्यकां प्राविशत्। सा तुलजादेव्याः कलशमपि आनयत्। देवलदेव्यास्तस्याः पुत्रस्य जगतसिंहस्य चोपत्यकाप्रवेशानन्तरं कर्णाटकस्य प्रभाव उपत्यकायामभवत्, तत् स्वाभाविकमेव आसीत्।

हरिसिंहदेवस्य मृत्युर्दोलखागमनसमयेऽभवत्। तस्मिन् समये उपत्यकायां रुद्रमल्लस्यारिमल्लस्य च संयुक्तं शासनं प्रवर्तते स्म। अरिमल्लो नाममात्रेण शासक आसीत्। रुद्रमल्लो हरिसिंहदेवस्य मृत्योरनन्तरं राज्ञीं देवलदेवीं पुत्रं जगतसिंहञ्च स्वप्रासादेऽस्थापयत्। देवलदेव्या आनीतस्तलेजुदेव्याः कलशः प्रासादे स्थापितः। अनन्तरं नेपालदेशस्य शासका अपि तलेजुदेव्या उपासका अभवन्। देवलदेव्याः पुत्रस्य जगतसिंहस्य विवाहो मल्लराजकुमार्या नायकदेव्या सह सम्पन्नोऽभवत्। तयोः पुत्रीरूपेण राजल्लदेव्या जन्म अभवत्। एषैव राजल्लदेवी जयस्थितिमल्लेन सह परिणीता आसीत्।

पूर्वे नुवाकोटपर्यन्तम्, पश्चिमे केदारपर्यन्तम्, उत्तरे तिब्बतपर्यन्तम्, दक्षिणे तराईप्रदेशपर्यन्तञ्च खसमल्लराज्यं विस्तीर्णमासीत्। खसमल्लराज्यस्य द्वारं कैलालीकञ्चनपुरयोर्मल्लवार इति नाम्ना प्रसिद्धमासीत्। तिब्बतस्य केचन भागा अपि अस्य राज्यस्य प्रभावे आसन्। पश्चिमे गढवालकुमाऊँप्रदेशात् पूर्वे गोरखासन्धिपर्यन्तं विस्तीर्णं खससाम्राज्यं विशालमासीत्। खसराज्यस्य राजधानी सिँजा आसीत्। तिब्बतस्य खाडीप्रदेशाद् आगतो नागराजो द्वादशशताब्द्यां कर्णालीप्रदेशे स्वतन्त्रं खसराज्यं स्थापितवानिति मन्यते।

खसराज्यस्य अस्तित्वं षड्विंशत्युत्तरद्विशतवर्षपर्यन्तमासीदिति अनुमीयते । खसराज्यस्य पतनानन्तरं सुदूरपश्चिमे बझाङ्गादिक्षेत्रेषु डोटीजाजरकोटादयो द्वाविंशती राज्यानि जातानि । वर्तमानकालेऽविकसितं मन्यमानमेतत् क्षेत्रं मध्यकालेऽतीव शक्तिशालिराज्यरूपेण स्थितमासीत् । पश्चिमखसराज्यस्य सर्वाधिकं प्रमुखं योगदानं भाषासम्बद्धमस्ति । वर्तमाने प्रयुक्ताया नेपालीभाषाया उत्पत्तिः खसमल्लराज्ये एव अभवत् । अतोऽस्या भाषायाः खसकुरा, सिँजाली भाषा इत्यादिकं नामापि प्रचलितमस्ति । खसमल्लराजा एतां भाषां राजकार्यार्थं माध्यमरूपेण स्वीकृत्य राष्ट्रभाषायाः स्थानं दत्तवन्तः । तेन कारणेन एषा भाषा निरन्तरं परिमार्जिता विकसिता चाभवत् । खसमल्लराज्यस्य विघटनानन्तरं उत्पन्नेषु द्वाविंशत्यां चतुर्विंशत्यां वा राज्येषु अपि एषैव भाषा व्यापकरूपेण प्रयुज्यमाना अभवत् । तेषु राज्येषु राजभाषारूपेण एषैव भाषा प्रतिष्ठिता जाता । पश्चाद् विशालनेपालस्य एकीकरणानन्तरमेषा भाषा नेपालदेशस्य राष्ट्रभाषा अभवत् । इदानीमियं भाषा नेपालाद् बहिरपि प्रचलिता वर्तते ।

कान्तिपुरे हनुमद्द्वारप्रासादस्य निर्माणं द्वादशशताब्द्यां राज्ञो गुणकामदेवस्य कालेऽभवदिति वंशावल्यामुल्लिखितमस्ति । प्रतापमल्लेन तस्मिन् प्रासादे बहवः खण्डा योजिताः । तेन कारणेन प्रासादो विशालो जातः । पृथ्वीनारायणशाहे कान्तिपुरराजसिंहासनमारूढे सति कतिपयान् पुरातनखण्डानपास्य नवीनाः संयोजिताः ।



पश्चिमतः पूर्वमध्यकालपर्यन्तं सुदूरपश्चिमगण्डकीकर्णालीप्रदेशैः सह कुमाऊँगढ़वालकेदारखण्डपर्यन्तं विस्तीर्णः प्रदेशः सपादलक्षपर्वतशिखरयुक्तः खसदेश इति कथ्यते स्म । पूर्वमध्यकाले जुम्लादेशस्य सिँजाक्षेत्रे नागराजेन राज्यं विस्तार्य सिँजाक्षेत्रं शीतकालिकराजधानीरूपेण ताक्लाकोट इति स्थानं ग्रीष्मकालिकराजधानीरूपेण च स्थापितम् ।

अनेन ज्ञायते यद् एकादशशताब्द्या अन्त्ये वर्तमानो विशालो नेपालस्त्रिधा विभक्त आसीत्, पश्चिमे कर्णालीप्रदेशे खसमल्लराज्यम्, दक्षिणे तिरहुतप्रदेशे कर्णाटकसिम्रौनगढ़राज्यम्, उपत्यकायां नेपालमण्डलञ्च। पश्चाद् यक्षमल्लस्य काले नेपालमण्डलमपि भक्तपुरराज्यम्, कान्तिपुरराज्यम्, ललितपुरराज्यञ्चेति त्रिधा विभक्तममभवत्।

**शब्दार्थाः**

| | | |
|---|---|---|
| न्यवसन् | = | वासमकुर्वन् |
| परिणीता | = | विवाहिता |
| अपास्य | = | निष्कास्य |

## अभ्यासः

### १. अतिसङ्क्षेपेणोत्तरयत

(क) नेपालसंवत् विक्रमस्य कस्मिन् वर्षे आरब्धम् ?

(ख) नेपालस्य मध्यकालः कदा समाप्तः ?

(ग) मध्यकालस्य अन्यत् नाम किम् ?

(घ) काष्ठमण्डपोपत्यकायां मल्लानां शासनव्यवस्था कदा स्थापिता ?

(ङ) मल्लकालिकनेपालस्य राजधानी का आसीत् ?

(च) सङ्घटितमल्लराज्यस्य अन्तिमो राजा कः ?

(छ) खसमल्लराज्यस्य राजधानी का आसीत् ?

(ज) नेपालीभाषाया उत्पत्तिः कुत्राभवत् ?

(झ) यक्षमल्लस्य काले नेपालमण्डलं कतिधा विभक्तम् ?

(ञ) मल्लानां शासनव्यवस्था कदा स्थापिता मन्यते ?

### २. सङ्क्षिप्तोत्तराणि लिखत

(क) नेपालस्य मध्यकालिकी भौगोलिकी स्थितिः कथं परिवर्तिता अभवत् ?

(ख) प्राचीनग्रन्थेषु मल्लानामुल्लेखः कथं प्राप्तः ?

(ग) मल्लप्रदेशे मानदेवस्याक्रमणस्य उद्देश्यं किमासीत् ?

(घ) गोपालराजवंशावली अरिमल्लस्य विषये किं कथयति ?

(ङ) खसमल्लराज्यस्य विस्तारेण कानि क्षेत्राणि तत्र समाविष्टानि ?

(च) नेपालीभाषा कथं राष्ट्रभाषारूपेण प्रतिष्ठिताऽभवत् ?

(छ) मल्लकालिकी शासनप्रणाली कीदृशी आसीत् ?

### ३. नेपालस्य मध्यकालिकेतिहासं मल्लशासनस्य सन्दर्भे विस्तरेण वर्णयत ।

### ४. मल्लवंशोदयस्य कारणानि तस्य राजनीतिकप्रभावञ्च विवेचयत ।

५. **खसमल्लराज्यस्य योगदानं निरूपयत ।**

६. **मध्यकालिकनेपालस्य भाषिकीम्, सामाजिकीम्, राजनीतिकीञ्च स्थितिं व्याख्यात ।**

७. **अधो लिखितमनुच्छेदं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

नेपालस्य मध्यकालिकेतिहासे प्रतापमल्लो जयस्थितिमल्लश्चेत्येतौ द्वौ राजानौ सुव्यवस्थायाः, प्रशासनसुदृढीकरणस्य, सांस्कृतिकविकासस्य च दृष्ट्याऽतीव महत्त्वपूर्णौ स्तः । उभयोः शासनकाले राज्ये सामाजिकनियमाः, न्यायप्रणाली, कलावास्तुविकासश्च विशेषरूपेण प्रवर्धिताः । जयस्थितिमल्लः काष्ठमण्डपोपत्यकायां सामाजिकसंरचनायाः पुनर्घटनकर्तेति प्रसिद्धो वर्तते । तेन वर्णव्यवस्था विहिता, व्यवसायाधारितोपाधिविभागश्च व्यवस्थितः । समाजे कर्तव्यविभाजनमाचारनियमानां निर्धारणञ्च तस्य शासनकालेऽभवत् । एतेन समाजेऽनुशासनं स्थापितम्, न्यायव्यवस्थायाः परिष्कारः कृतः; अपराधानुसारेण दण्डप्रणाली विन्यस्ता, भूमिमापनप्रणाली व्यवस्थिता, करसङ्ग्रहव्यवस्था च सुसङ्घटिता । अतो जयस्थितिमल्लः समाजपरिष्कर्ता विधिनिर्माता च मन्यते । प्रतापमल्लः कान्तिपुरराज्यस्य प्रख्यातः शासक आसीत् । स न केवलं पराक्रमी अपि तु विद्यानुरागी कलाप्रेमी चासीत् । तस्य शासनकाले प्राशासनिकसंरचना सुदृढाऽभवत्, नगरव्यवस्था, करप्रणाली, सुरक्षाव्यवस्था च सुसम्बद्धा अभवन् । स विविधदेवालयानाम्, विहाराणाम्, तीर्थस्थानानां च निर्माणं कृतवान् । हनुमद्द्वारप्रासादक्षेत्रे तेन निवासस्य सुव्यवस्थायै बहुकार्यं कृतम् । तस्य शासनकाले साहित्यस्य विकासोऽभवत् । स स्वयं संस्कृतनेवारीभाषयोर्ज्ञाता आसीत् । तेन स्थापिताः शिलालेखा बहुभाषिकाः सन्ति । ते तस्य विद्वत्तां दर्शयन्ति । तेन राज्ये शान्तिसुरक्षाव्यवस्था सुदृढा कृता, व्यापारः प्रोत्साहितः, धार्मिकोत्सवाश्च सम्यक् व्यवस्थापिताः । जयस्थितिमल्लः समाजस्य संरचनाकर्ता आसीत्, प्रतापमल्लस्तु कलासंस्कृत्योः प्रशासनस्य च उन्नायकोऽवर्तत ।

**प्रश्नाः**

(क) मध्यकालिकनेपालस्य इतिहासे कौ द्वौ राजानौ प्रसिद्धौ स्तः ?

(ख) प्रतापजयस्थितिमल्लयोर्योगदानं केषु क्षेत्रेषु आसीत् ?

(ग) जयस्थितिमल्लः काष्ठमण्डपोपत्यकायां कथं प्रसिद्ध आसीत् ?

(घ) जयस्थितिमल्लेन कीदृशी व्यवस्था विहिता ?

(ङ) जयस्थितिमल्लस्य शासनकाले किं स्थापितम् ?

(च) प्रतापमल्लः कस्य राज्यस्य शासक आसीत् ?

(छ) प्रतापमल्लः कीदृशो राजा आसीत् ?

(ज) प्रतापमल्लेन निर्मितानि वस्तूनि कानि ?

(झ) प्रतापमल्लस्य शासनकाले कस्य विकासोऽभवत् ?

(ञ) कः समाजस्य संरचनाकर्ता मन्यते ?

८. **अधस्तनपद्यं पठित्वा पशुपतिनाथविषये एकमनुच्छेदं लिखत**

यस्य प्रसादेन सुखं लभन्ते जनाः समस्ताः शरणं प्रपन्नाः ।

पापक्षयं मोक्षप्रदं प्रसन्नं वन्दे सदाऽहं पशुपतिनाथम् ॥

९. **अधो लिखितस्यानुच्छेदस्य पञ्चभिर्वाक्यैः संश्लेषणं कुरुत**


चन्दननाथस्य मन्दिरं कर्णालीप्रदेशस्य जुम्लामण्डले स्थितमस्ति । अस्य मन्दिरस्य धार्मिकं सांस्कृतिकं च महत्त्वमत्यधिकं वर्तते । जनश्रुत्यनुसारेण चन्दननाथो भगवान् शिवस्यावताररूपेण पूज्यते । अत्र प्रतिवर्षं भक्तजनाः श्रद्धया आगत्य पूजामाराधनां च कुर्वन्ति । विशेषतश्चन्दननाथमेलकं तस्मिन् मण्डलेऽत्यन्तं प्रसिद्धमस्ति यस्यावसरे देशस्य विभिन्नप्रदेशेभ्यो जनाः समागच्छन्ति । एतद् मन्दिरं न केवलमास्थायाः केन्द्रमपि तु स्थानीयसंस्कृतेः परम्परायाश्च संरक्षणस्थलमपि विद्यते । अतश्चन्दननाथस्य मन्दिरमतीव गौरवपूर्णं वर्तते ।

१०. **मल्लकालस्य आधुनिके समाजे कः प्रभावो विद्यते ? विवेचयत ।**

११. **मल्लकालिकराज्यानां विभाजनेन का शिक्षा लभ्यते ? पाठाधारेण लिखत ।**

### *परियोजनाकार्यम्*

**अभिभावकं तद्विषयविज्ञं वा सम्पृच्छ्य नेपालस्य पश्चिमक्षेत्रे प्रसिद्धस्य मष्टोदेवस्य परिचयं प्रस्तुत ।**




नेपालसर्वकारः

शिक्षाखेलकुदमन्त्रालयः

पाठ्यक्रमविकासकेन्द्रम्

सानोठिमी-भक्तपुरम्